शास्त्रसंदेश-३९

# स्तोत्रसंदेशमाला

## शेषतीर्थंकरजिनस्तोत्राणि

१३



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-३१

# स्तोत्र संदेशमाला- १३

## शेष तीर्थंकरजिनस्तोत्राणि

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્
વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી
પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના
શિષ્યરત્ન
પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.


પ્રકાશક-પ્રાપ્તિ સ્થાન

**शास्त्रसंदेश**

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,
આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૧૩

## शेष तीर्थंकरजिनस्तोत्राणि

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૨ + ૨૩૧ + ૪

સ્તોત્ર : ૧૨૫ શ્લોક : ૧૫૨૯

: પ્રમાર્જના :

પૂ.પં.શ્રી શ્રુતતિલકવિજયજીગણી

પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા.

: છંદ-સંયોજના :

પૂ.સા.શ્રી ભવ્યરત્નાશ્રીજી મ.સા.ના શિષ્યા

પૂ.સા. શ્રી પુણ્યરત્નાશ્રીજી મ.સા.

ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.

વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!     અનુમોદનીય...!     અનુકરણીય...!

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૧૩-૧૪ ના
## દ્રવ્ય લાભાર્થી

## શ્રી ચિંતામણી પાર્શ્વનાથ જૈન
## શ્વેતામ્બર મૂર્તિપૂજક તપાગચ્છ સંઘ
## નાશિક

*આપશ્રીએ જ્ઞાનદ્રવ્યથી કરેલી શ્રુતભક્તિની*
*અમો ભૂરિ ભૂરિ અનુમોદના*
*કરીએ છીએ.*
*ટ્રસ્ટીગણ ના અમો આભારી છીએ.*

*શાસ્ત્રસંદેશ, સુરત*





**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | जयश्रीर्गर्भगे मातुर्यत्राभूदक्ष- | पू.आ. श्री मुनिसुन्दरसूरि | १ |
| २ | विश्वेश्वरं मथितमन्मथभूपमानं | पू.आ.श्री जिनप्रभसूरि | ५ |
| ३ | भगवन्नजितस्वामिन्!, विजय- | पू.आ.श्री हेमचन्द्रसूरि | ९ |
| ४ | विश्वप्रभुं सेनमही न नाथं, | पू.उपा. श्री सूरचन्द्र वि. | १० |
| ५ | ध्यानासिधारजितकर्मशात्रवं, | पू.मु.श्री गुणविजय | १३ |
| ६ | केवलज्ञानसम्पूर्णं, वन्देऽह- | पू.सा. श्री मेरुलक्ष्मीगणिनी | १३ |
| ७ | नो जीयते यो विषयैः खलीयैः | पू.मु.श्री रंगविमलगणि | १४ |
| ८ | विजयासुत वन्दनतोऽतिभवा | | १४ |
| ९ | जगती भविनामद्य पदमहिमं | | १५ |
| १० | वरविजय विमानं पुण्यवान् | | १५ |
| ११ | इक्ष्वाकुवंशविशदामरमार्गसूरं | | १६ |
| १२ | तारुण्यरूपो जितलोकरूपो, | | १७ |
| १३ | अजितनाथजिनेश्वरमीश्वरं, | | १८ |
| १४ | दिव्यातुलां सुखततिं विजयेऽ- | | १९ |
| १५ | जयवानजितोदेवो, न च | | १९ |
| १६ | सुखदजन्मनि यस्य मुदन्विताः | | २० |
| १७ | विगय सयल दोसं पुण्णं | | २० |
| १८ | नत्वा क्रमकजयुगलं | पू.उपा.श्री नयविमलगणि | २१ |
| १९ | सकलविघ्नविघातकरस्वरः, | पू.आ. श्री विबुधविमलसूरि | २३ |
| २० | चतुर्ज्ञानधर! चतु-र्यामधर्म- | पू.आ.श्री हेमचन्द्रसूरि | २४ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| २१ | कामं नमोऽस्तु सततं जिन- | पू.आ.श्री कल्याणसागरसूरि | २५ |
| २२ | नतामराधीश्वरशोभितक्रमो | पू.मु. श्री गुणविजयजी | २७ |
| २३ | भुवनाद्भुतभाग्यभरेज्यपदं | | २७ |
| २४ | यतो वै जनानामुदेतीह बोधो | | २८ |
| २५ | ग्रैवेयकात्सप्तमतोऽतिपुण्य- | | २९ |
| २६ | महाप्रातिहार्यश्रिया शोभमानं | पू.आ.श्री भुवनसुंदरसूरि | २९ |
| २७ | लावण्यगेहं कलहेमवर्णं | पू.आ.श्री कल्याणसागरसूरि | ३१ |
| २८ | वाणीं वाणीमियं दद्यात्, | पू.आ.श्री सोमविमलसूरि | ३२ |
| २९ | नुवामि मेघक्षितिपालनन्दनं | | ३६ |
| ३० | विद्रुमपद्मोपलसमवर्णाऽ- | | ३८ |
| ३१ | निःशेषभुवनकोश-पद्म- | पू.आ.श्री हेमचन्द्रसूरि | ३९ |
| ३२ | नित्योदयोदयपुरप्रथित- | पू.उपा.श्री यशोविजयजी | ४० |
| ३३ | जयानन्द सम्पत्पदा पूर्वचिन्ता- | मुनिप्रवर श्री विनयहंसगणि | ४२ |
| ३३ | भुवनमोहनरूपमनोहरं, हसित- | | ४६ |
| ३५ | यस्याऽमरा न विदधुर्नतिम- | पू.आ. श्री जयतिलकसूरि | ४७ |
| ३६ | नम्राऽमरेन्द्रगणमौलिवतंसहंस- | पू.आ. श्री जयतिलकसूरि | ४८ |
| ३७ | सुरासुरनरैर्मूर्ध्नि, धार्यमाण- | पू.आ.श्री हेमचन्द्रसूरि | ५४ |
| ३८ | सुमेरुसन्मौलिकृताभिषेककं, | पू.मु. श्री आनन्दवल्लभ वि. | ५५ |
| ३९ | श्री महासेननृपाङ्गज ! नाथ !, | पू.मु. श्री हरिचन्द्रविजय | ५७ |
| ४० | ॐ चन्द्रप्रभ प्रभाधीश, | | ५८ |
| ४१ | नमो महसेननरेन्द्रतनूज जग- | पू.आ. श्री जिनप्रभसूरि | ५८ |
| ४२ | चंदप्पह ! चंदप्पह !, पणमिय | पू.आ.श्री जिनप्रभसूरि | ६१ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ४३ | महसेणलक्खसुअं चंदपहं | पू.आ.श्री धर्मघोषसूरि | ६३ |
| ४४ | वीतरागोऽसि चेद्रागः, | पू.आ.श्री हेमचन्द्रसूरि | ६४ |
| ४५ | सुविधिनाथजिनं नयनामृतं | पू.आ.श्री कल्याणसागरसूरि | ६५ |
| ४६ | नवमश्रमणपवरममरव्रजपरम- | पू.मु.श्री गुणविजयगणि | ६६ |
| ४७ | त्वत्पादपङ्कजनख-द्युतिजाल- | पू.आ.श्री हेमचन्द्रसूरि | ६७ |
| ४८ | वृषभतुल्यगतिं वृषदं सदा, | पू. मुनि श्री मलूकचन्द्र वि. | ६८ |
| ४९ | सकल-मङ्गल-केलि-निवेशनं | | ६९ |
| ५० | अमन्दाऽनन्दनिःस्यन्द-दायिने | पू.आ.श्री हेमचन्द्रसूरि | ७० |
| ५१ | नितान्तभीषणमितः, प्रसृतं | पू.आ.श्री हेमचन्द्रसूरि | ७१ |
| ५२ | श्रीमन्तं वासुपूज्यं प्रबलबल- | पू.आ.श्री पार्श्वचन्द्रसूरि | ७२ |
| ५३ | देव ! त्वद्दर्शनेनाऽद्य, दुःखं | पू.आ.श्री हेमचन्द्रसूरि | ७४ |
| ५४ | देहभाजां मनोवित्तं, विषयै- | पू.आ.श्री हेमचन्द्रसूरि | ७५ |
| ५५ | सम्मत्तनाण-दंसण-वीरिय- | पू.आ.श्री जिनप्रभसूरि | ७६ |
| ५६ | विजयस्व जगच्चक्षु-श्चकोरा- | पू.आ.श्री हेमचन्द्रसूरि | ७८ |
| ५७ | जयश्रियं यस्तनुते स्मृतेरपि, | पू.आ.श्री मुनिसुन्दरसूरि | ७९ |
| ५८ | श्रीशान्तिनाथो भगवानष्टापद- | पू.आ. श्री जिनप्रभसूरि | ८० |
| ५९ | महिम्नस्ते भावी सुरवरनराऽ- | पू.आ.श्री इन्द्रनन्दिसूरि | ८२ |
| ६० | सकलदेवनरेश्वरवन्दितं | पू.आ.श्री कल्याणसागरसूरि | ८८ |
| ६१ | दद्याच्छ्रीशान्तिदेवो वरकनक- | पू.आ.श्री कल्याणसागरसूरि | ९० |
| ६२ | श्रेयोदशाप्रवेशोऽद्य, जगतो- | पू.आ.श्री हेमचन्द्रसूरि | ९३ |
| ६३ | देवाधिदेवाय जगत्-तायिने | पू.आ.श्री हेमचन्द्रसूरि | ९४ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ६४ | कल्याणकायमोजःश्रीकल्याण | पू.आ.श्री जयवन्तसूरिः | ९५ |
| ६५ | शिवश्रीवरं चङ्गसारङ्गवासम्, | पू. उपाध्यायश्री मेरुनन्दनगणि | ९९ |
| ६६ | विश्वेसेनमहीनाथ-वंशपङ्कज- | पू.उपा.श्री सूरचन्द्रवि. | १०२ |
| ६७ | नमः श्रीशान्तिनाथाय, विना- | पू.मु.श्री मणिविजयजी | १०३ |
| ६८ | शान्तिनाथं भजे शान्तिसुख- | पू.उपा.श्री समयसुन्दर वि. | १०४ |
| ६९ | हिमगिरितनयेशशत्रुजेता, | पू.मु.श्री मलूकचन्द्र वि. | १०५ |
| ७० | न स्नेहाच्छरणं प्रयान्ति भग- | | १०६ |
| ७१ | कल्याणकारणमकारण- | | १०८ |
| ७२ | विश्वातिशायिमहिमा, | | १०९ |
| ७३ | सुरराजसमाजनतांह्रियुगं, | | ११० |
| ७४ | सदोदितानन्दमनन्तदर्शनं निर- | पू.आ.श्री रामचन्द्रसूरि | १११ |
| ७५ | सिरिविस्ससेणअइरासुअं | पू.आ.श्री धर्मघोषसूरि | ११५ |
| ७६ | अप्पडिहयधम्मचक्केण | पू.आ.श्री जिनवल्लभसूरि | ११६ |
| ७७ | अति आणंदि नमेवि, | पू. उपाध्यायश्री विनयप्रभ वि. | ११९ |
| ७८ | सिरिमरुदेसमज्झारि तल- | पू. मु. श्री कीर्तिराज वि. | १२१ |
| ७९ | जय सयलसुरासुरनमियपाय, | | १२४ |
| ८० | लग्गु थुणेहुँ पयत्थ-विचित्तं। | महाकवि स्वयंभू | १२७ |
| ८१ | थुओ सन्ति-णाहो। कय- | महाकवि स्वयंभू | १२९ |
| ८२ | अजि कुद काफु जुनूवि शहरि | पू.आ.श्री जिनप्रभसूरि | १३० |
| ८३ | चतुर्धाधर्मदेष्टारं, चतुर्गात्रं | पू.आ.श्री हेमचन्द्रसूरि | १३४ |
| ८४ | जय शरदशकलदशहयवदन | पू.आ.श्री जिनप्रभसूरि | १३५ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ८५ | जय त्रिभुवनाऽधीश !, जय | पू.आ.श्री हेमचन्द्रसूरि | १३६ |
| ८६ | असुरनिर्जरबन्धुरशेखर-प्रचुर- | उपा. श्री वल्लभ वि. | १३७ |
| ८७ | रोरारेरां ररीरीर, रैरीरा | | १४६ |
| ८८ | दिष्ट्या प्रणमतां भाले, त्व- | पू.आ.श्री हेमचन्द्रसूरि | १४७ |
| ८९ | जिनेन्द्रस्य यस्यास्ति जङ्घायुगं | | १४८ |
| ९० | श्रीकुम्भभूपालविशालवंश- | | १४९ |
| ९१ | पणयजणकप्पवल्लिं नियठाण- | | १५० |
| ९२ | देवस्तनोतु हरितोत्पलकोश- | पू.आ.श्री रामचन्द्रसूरि | १५३ |
| ९३ | त्वत्पाददर्शनस्यैव, प्रभावोऽयं | पू.आ.श्री हेमचन्द्रसूरि | १५७ |
| ९४ | श्रीकैवल्याऽवगमविदिता- | पू.आ.श्री ज्ञानसागरसूरि | १५८ |
| ९५ | सुर-समुदय-सेवित-पद- | पू.आ. श्री ऋषिवर्द्धनसूरि | १६६ |
| ९६ | घणवण्णं चिण्हट्ठियकुम्मं | पू.आ.श्री धर्मघोषसूरि | १६७ |
| ९७ | तिहुयणजणमणलोयणपंके- | पू.आ.श्री रत्नसिंहसूरि | १६८ |
| ९८ | जय सिरिसमलंकिय गय- | पू.आ.श्री जिनप्रभसूरि | १६९ |
| ९९ | केवलज्ञानसञ्ज्ञेन, चक्षुषा | पू.आ.श्री हेमचन्द्रसूरि | १७१ |
| १०० | जयश्रियाढ्यं कनकाभदेहं, | पू.आ. श्री मुनिसुन्दरसूरि | १७३ |
| १०१ | जयश्रिया मोहरिपोरवाप्त- | पू.आ. श्री मुनिसुन्दरसूरि | १७४ |
| १०२ | श्रीमन्तमर्हन्तमनन्तचिन्मयं | पू.आ. श्री जिनसुन्दरसूरि | १७८ |
| १०३ | कल्याणलतासुवसन्तर्त्तुम्, | पू.आ श्री शीलरत्नसूरि | १८२ |
| १०४ | चेतन ! कुरु सीमन्धरशरणं, | पू.महो. श्री सोमविजयगणि | १८३ |
| १०५ | श्रेयः श्रीणां निधानं सुमहिम- | पू.पं.श्री सहजमण्डनगणि | १८४ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १०६ | यस्य नामापि सम्पत्पदानन्ददं | मुनिप्रवरश्री विनयहंसगणि | १८८ |
| १०७ | पूर्वसुविदेहपुष्कलविजय- | पू.उपा.श्री समयसुन्दर वि. | १९२ |
| १०८ | श्रीसर्वज्ञसमग्रसौख्यपदवी | पू.पं.श्री जिनहर्षगणि | १९३ |
| १०९ | ब्रह्माण्डमण्डलविबोध- | पू.मु.शरी सकलचन्द्रगणि | १९७ |
| ११० | जयतु जिन जगदेहभानु, काम | पू.मु.श्री भावविजयजी | २०१ |
| १११ | जय स्वामिन्! जिनाधीश! | | २०२ |
| ११२ | सकल-सुरासुर-नर(न)त- | पू.आ. श्री ऋषिवर्द्धनसूरि | २०३ |
| ११३ | सीमन्धराधीश महाविदेह- | पू.आ.श्री जयतिलकसूरि | २०४ |
| ११४ | श्रेयांस वप्ता जननी तु सत्यकी, | पू.आ. श्री आणंदविमलसूरि | २०७ |
| ११५ | द्वीपेऽत्र सीमन्धरमानमामि, | | २०९ |
| ११६ | महाविदेहावनिमण्डलश्री- | | २१० |
| ११७ | सीमन्धरं श्रीयुगमन्धरं च, | | २१० |
| ११८ | सीमन्धरं स्तौमि युगन्धरं च, | | २११ |
| ११९ | अतिरसहरिसरसेण विहसिय- | पू.पं.श्री मेरुनन्दनोपाध्याय | २१२ |
| १२० | श्रीसीमंधरदेव देवनरदाणव- | पू.पं.श्री धर्मशेखरगणि | २१७ |
| १२१ | नमिर-सुर-असुर-नर- | पू.उपा.श्री विनयप्रभ वि. | २१९ |
| १२२ | सलूणउ सुसोहामणउ | पू.मु. श्री विजयतिलकोपाध्याय | २२३ |
| १२३ | केवलनाण सणाहं, विदेह- | | २२६ |
| १२४ | जय जणिय सुक्ख, जय | पू.आ.श्री जयशेखरसूरि | २२८ |
| १२५ | भत्ति-सरोवरु ऊलटिउ | पू.उपा.श्री मेरुनन्दन वि. | २२९ |

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

# १. ॥ श्रीतारणदुर्गालङ्कारश्रीअजितनाथ-स्तोत्रम् ॥

जयश्रीर्गर्भगे मातुर्यत्राभूदक्षदेवने ।
तिष्ठापयिषिते चात्र श्रीचौलुक्यमहीपतेः ॥ (अनुष्टुप्) १

श्रीमत्तारणदुर्गस्थं श्रीमन्तमजितं जिनम् ।
जगज्जैत्रेण मोहेनाजितं तं संस्तुवे मुदा ॥ (अनुष्टुप्) (यु.) २

अशक्तपङ्क्तौ तव नाथ ! संस्तवे
सुरेश्वराद्या अपि नूनमासते ।
न तेऽपि कुर्वन्ति न तं स्वशक्तितः
शिवाशयेतीह ममापि सूद्यमः ॥ (वंशस्थ) ३

विधीयमाना भगवन् ! गुणानां
स्तुतिस्तवाल्पाऽपि ददात्यभीष्टम् ।
सुधा यदल्पाऽपि निपीयमाना
नीरोगतां प्राणभृतां तनोति ॥ (उपजाति) ४

अनन्तं ते ज्ञानं न पथि वचसां नापि च सुखं
न गम्यं ते रूपं न तव चरितस्याप्युपमितिः ।
गुणास्तेऽनन्तत्वाज्जिन ! न विषया वाङ्मनसयो-
र्न शक्यं स्तोत्रं तत्तव तदपि यत्नोऽत्र फलवान् ॥(शिखरिणी)५

न विश्वासः प्रोक्तेऽह्यनिखिलविदां शुद्धमनसां
भवेन्मोहग्रस्तो न पुनरखिलं वेदितुमलम् ।
त्वदन्यो नामोहः प्रभवति तवैवागमनिधिं
भजन्ते याथात्म्यात्फलमपि लभन्ते च कृतिनः ॥(शिखरिणी)६

नैकोऽपि दृश्येत सुरान्तरेषु यः
स्फुरन्त्यनन्ता अपि ते गुणास्त्वयि ।
सुरद्रुमा ये बहवोऽपि नन्दने
भवन्ति सैकोऽपि मरौ किमाप्यते ? ॥ (उपजाति) ७

न शस्यते कैः स कुमारभूपतिस्तवात्र तीर्थामरवृक्षरोपणात् ।
सतां भवक्लेशजदुःस्थताभयं
जहार यो मुक्तिगमी भवद्वयात् ? ॥ (वंशस्थ) ८

कुमारपालस्य कथं न मित्रं
गोविन्दसङ्घाधिपतिर्भवेत्सः ? ।
ग्रीष्मे कलौ म्लेच्छदवा-ग्नितापैस्-
तन्न्यस्तबिम्बापगमेन शुष्कम् ॥ (उपजाति) ९

पुण्यद्रुमं तस्य नवत्वदेतद्बिम्बप्रतिष्ठापनतस्तदर्थैः ।
जलप्रवाहैः किल योऽभिषिच्य
प्रभोऽधुना पल्लवयाञ्चकार ॥ (उपजाति) (यु.) १०

श्रीहेमचन्द्रगुरुमिद्धगुणैः परं न
श्रीसोमसुन्दरगुरुप्रभवोऽनुकुर्युः ।
किं तु त्वदीयनवबिम्बमहाप्रतिष्ठा-
कृत्यैरपीश ! दलितोग्रकलिप्रभावैः ॥ (वसन्ततिलका) ११

प्रभो ! तवैतैर्विविधैः प्रतिष्ठा-महोत्सवैर्नेत्रपथं प्रपन्नैः ।
जनिव्रतज्ञानमहान् पुराणान्
प्रत्येति कस्तान्न सचेतनोऽपि ? ॥ (उपजाति) १२

भवाम्बुधेस्तारणतो द्विधाऽ-रिभीतिक्षितेस्तारणदुर्ग एषः ।
संसर्गतस्ते त्वमिवाजितेश !
नगोऽपि जज्ञे किल सान्वयाह्वः ॥ (उपजाति) १३

संसारतृष्णोग्रकषायताप-चिरार्ज्जितादृष्टमलप्रणाशैः ।
अर्थैस्त्रिभिर्नायकभावतीर्थ-माराधितं मुक्तिमिदं तनोति ॥१४
(उपजाति)

द्विधाऽपि शत्रून् जितशत्रुजन्मा
जित्वा भवान्निर्वृतिमाप युक्तम् ।
ख्यातस्तु चित्रं विजयाङ्गजोऽपि
भक्तेषु भूमिर्विजयोद्भवस्य ॥ (उपजाति) १५

कथं नु सम्यक् तव दर्शनाय
बुधा यतन्तेऽपि तपस्क्रियाऽऽद्यैः ।
जातं हि तद्यस्य न तस्य रूपं
विलोकते कश्चन लोचनाभ्याम् ? ॥ (उपजाति) १६

अनादिमिथ्यात्वतमःप्रणाशतः
सुतत्त्वरत्नप्रकरप्रकाशतः ।
शिवप्रदं तात ! जगत्सुखाकरः
त्वमागमं दीपमदिदीपः स्थिरम् ॥ (वंशस्थ) १७

अनन्तमोहप्रभवं निरस्य
विकल्पजालं भवपातहेतुम् ।
त्वदागमार्थाऽमृतपानशर्म-
लीनं मनो मेऽस्तु तव प्रसादात् ॥ (उपजाति) १८

स्थेष्ठेऽदृष्टप्रतिभुवि विभौ शक्नुयां नातिगन्तुं
मोहस्याज्ञां स च तनुमतामर्दनैकस्वभावः ।
औदासीन्यं भजसि भगवंश्चेत्तदाऽऽज्ञावशेऽत्रा-
नन्यत्राणे त्रिजगति कथं तद्भविष्याम्यहं ही ॥(शिखरिणी) १९

भक्ता यद्यपि सन्ति तेऽत्र बहवः प्रौढाः सुरेशादयो
रङ्कं न्यस्य तथापि मामपि विभौ पाल्यत्वचिन्ताऽध्वनि ।
भीष्मग्रीष्मखरातपार्द्दिततनूनासारतोऽद्रीन् यथा
शैत्यं प्रापयतेऽम्बुदः किमु तथा नो वालुकायः कणान् ? ॥२०
(शा.वि.)

मोहेनास्मि वशीकृतो जिन ! भजे सम्यक् तवाज्ञां न चेत्
को दोषो मम तत्तवैव महिमा ह्येवं कलङ्कं श्रयेत् ।
भूतेन ग्रहिलिकृतो न कुरुते तत्सेवकः कोऽपि चे-
द्दत्ताज्ञां किल दूषणं सुमहतस्तन्मान्त्रिकस्यैव यत् ॥ २१
(शा.वि.)

तत्त्वं श्रीअजित ! प्रसीद तमरिं निर्जित्य मोहं तत-
स्तायिन्मोचय मां पदं नय निजं स्वं सेवकं भाक्तिकम् ।
किं तस्य प्रभुता प्रभोर्न ददते भक्तस्य यो वाञ्छितं
युक्ता तेऽर्हविचारणा ननु जगत्त्राणैकसन्धाभृतः ॥ २२
(शा.वि.)

किं भक्तः स न यः प्रभुं वशयितुं शक्नोति भक्त्याऽऽत्मनः ?।
॥ पाठान्तरम्
तदर्थये तात मुहुर्मुहुस्त्वां-त्रैलोक्यचिन्तामणिमेकमेवम् ।
प्रदेहि किञ्चिन्मम तत्पुनर्न येनार्थये त्वामपरं च नाथ ! ॥ २३
(उपजाति)

न कः स्तुते तारणदेवि ! भक्त-
विपत्सरित्तारणकर्मठे ! त्वाम् ? ।
पासि प्रतीता रणनिर्जितारि-
र्या तीर्थमेतज्जिनभक्तिकांश्च ॥ (उपजाति) २४

एवं तारणदुर्गभूषणमणेः कृत्वा स्तवं ते मुदा
दृष्ट्वा प्राग्मुनिसुन्दरस्तुतिततीर्बालस्वभावादहम् ।
याचे श्रीअजितप्रभो ! भवरिपुक्षेपाज्जयश्रीप्रदां
शुद्धां बोधिरमामनन्तमचिराच्छ्रेयो लभेऽहं यया ॥ २५
(शा.वि.)

पू.आ.श्री जिनप्रभसूरिविरचितम्

## २. ॥ श्रीअजितजिनस्तवनम् ॥

(वसन्ततिलका)

विश्वेश्वरं मथितमन्मथभूपमानं
देवं क्षमातिशयसंश्रितभूपमानम् ।
तीर्थाधिराजमजितं जितशत्रुजातं
प्रीत्या स्तवीमि यमकैर्जितशत्रुजातम् ॥ १

विज्ञानरागविकलङ्कदशान्तमोह-
विज्ञानरागविकलङ्कदशान्तमोह ।
त्वामुल्लसत्पुलकपक्ष्मलदेहदेशाः
सम्यक् प्रणम्य न लभन्ति कदाचनाऽपि ॥ २

आनन्दकन्दलितमानसदैवतेन
स्तोतव्यो यः सुरपुरन्ध्रिकटाक्षपाशः ।

आनन्दकन्दलितमानसदैवतेन
त्वामेव वीरमपहाय न मन्मथोऽन्यः ॥ ३

राजन्मदेवरमणीरुचिराजितारं
नानाविधं वपुषि भूषणमुद्वहन्ती ।
नाऽचुक्षुभज्जिन भवन्तमुदारकान्ति
राजन्मदेवरमणीरुचिराजितारम् ॥ ४

भीमे भवेऽत्र जितशत्रुनरेन्द्रवंश-
कासारतामरसभाजितहेमदीप्ते ।
कासारतामरसभाजितहेमदीप्ते
स्वामिन् ! विमोच्य तव दर्शनमेकमन्या ॥ ५

त्वय्यात्मवृत्तिमकरोज्जनताजनानां
यावल्लभेत तरसामहितासदक्षे ।
किं कौतुकं दिवि शिवेऽपि सुखश्रियं सा
यावल्लभेततरसा महितासदक्षे ॥ ६

व्यापारिता स्तुतिविधौ तव कोविदैः स्वा
कां कां करोति कमलां विगलत्कलङ्काम् ।
नागेन धीरतरलाञ्छितविग्रहस्य
नागेन धीरतर लाञ्छितविग्रहस्य ॥ ७

सत्पादराजितसमानवकामदारो
सत्पादराजितसमानवकामदारो ।
सत्पादराजितसमानवकामदारो
सत्पादराजितसमान व कामदारो ॥ ८

नत्वाभवन्निह तमोहरणं भवेरं
कल्याणगौरवपुषं यतयो गतेते ।
कल्याणगौरवपुषं यतयोगतेते
नत्वा भवन्निह तमोहरणं भवेरम् ॥ ९

शं वर्द्धिनं दितमलं प्रमदादराग
शंवर्द्धिनन्दितमलं प्रमदादराग ।
मन्देतरा ममलतोयमदं भवन्तं
मन्देतराममलतोयमदं भवन्तम् ॥ १०

ज्ञानं ददाननय सज्जनतां प्रकाश-
मानन्दिता गजगते हतमोहराज ।
ज्ञानं ददाननय सज्जनतां प्रकाश
मानं दितां गजगते हतमोहराज ॥ ११

सम्पन्नकामलसदागमनाभिभूत
भावारितापवितिकारसभारतीते ।
भव्याय देहितरसा तरसा प्रसिद्ध
भूमानमत्रभवतीः कमलायताक्ष ॥ १२

सम्पन्नकामलसदागमनाभिभूत
भावा रितापवितिकारसभारतीते ।
भव्याय देहि तरसा तरसा प्रसिद्ध
भूमान मत्रभवतीः कमलायताक्ष महायमकम् ॥ १३

अस्मारि येन नहि सर्परमानिवासः
प्रीत्या भवान् प्रथितकीर्त्तिरमानिवासः ।

सम्पद्यतां कथमिवाऽत्र नरो गतापत्
स्वामिन् ! विधूतविनमज्जनरोगताप ॥ १४

माराजितं भुवनरक्षणबद्धकक्ष-
माराजितं जिनपतिं प्रतिनम्रतां यः ।
माराजितं प्रविततं लभते स राज्य-
माराजितं वितजयश्रुपयामदीक्षः ॥ १५

या निर्मलेन जनतामनसारसेन
देवार्चिताङ्घ्रियुग सज्जनसारसेन ।
आज्ञाविधौ भवति तेनलसारसेन
बम्भ्राम्यते भवसरस्वतिसारसेन ॥ १६

आख्यातमीश ! भवता भवतापतप्त
भव्याङ्गिचन्दनरसं नरसङ्घमुख्याः ।
केचित् कृपारसमयं समयं शरण्यं
भव्या व्रजन्ति शरणं शरणं गुणानाम् ॥ १७

दृष्ट्वा तवास्यमकलङ्कमलानिशान्तं
शान्तं दृशोरमृतमात्मगतं महर्षे ।
हर्षेरिताश्रुसलिलप्रवहैः कदाहं
दाहं भवाग्निजनितं प्रशमं नयामि ॥ १८

पञ्चाशदञ्चितचतुःशतचापमानं
हेम्नः सृजन्तमभिरामरुचापमानम् ।
विश्वाधिपङ्कपरिशोषणघर्मरश्मिं
विश्वाधिपं शरणमेष जनो गतस्त्वाम् ॥ १९

स्तोत्रे तवाऽत्र यमकैर्यमकैरवेन्दो
पुण्यं यदार्जि सुरसे सुरसेव्यदृब्धे ।
तेनैधि मे कृतभवान्त भवान्तरेऽपि
स्वामी त्वमेव शमिना शमिनान्तरारो ॥ २०

यं त्रैलोक्यपितस्तव स्तवमिमं संस्तब्धवान् मुग्धधी-
रप्याचार्य जिनप्रभः श्रवणयोरानन्दिनिस्यन्दिनम् ।
भक्तिव्यक्तितरङ्गरङ्गिसनसं पुंसाममुं सादरं
पापः पापठतां प्रयाति विलयं संसारनामा रिपुः ॥ २१

(शा.वि.)

पू.आ.श्री हेमचन्द्रसूरिविरचितः

प्रभोर्दीक्षाग्रहणानन्तरं सगरनरेशकृतः

## ३. ॥ श्रीअजितनाथ-जिनस्तवः ॥

(अनुष्टुप्)

भगवन्नजितस्वामिन् !, विजयस्व जगद्गुरो ! ।
त्रैलोक्यपद्मिनीखण्ड-विकासनदिवाकर ! ॥ १

मतिश्रुतावधिमनः-पर्ययैर्नाथ ! शोभसे ।
ज्ञानैश्चतुर्भिरुद्दामै-रर्णवैरिव मेदिनी ॥ २

त्वं हेलयापि कर्माणि, प्रोन्मूलयितुमीशिषे ।
अयं परिकरस्तु ते, लोकानां मार्गदर्शकः ॥ ३

भगवन्नन्तरात्मा त्वं, मन्येऽहं सर्वदेहिनाम् ।
तेषामऽद्वैतसौख्याय, यतसे कथमन्यथा ? ॥ ४

हित्वा कषायान् मलवत्-कृपाजलपरिप्लुतः ।
त्वमेवाऽसि विशुद्धात्मा, निर्लेपः पद्मपत्रवत् ॥ ५

राज्येऽपि न्यायनिष्ठस्य, न स्वो न च परस्तव ।
प्राप्ताऽवसरमेतत्ते-ऽधुना साम्यं किमुच्यते ॥ ६

वितर्कयामि भगवन् ! दानं यद् वार्षिकं तव ।
त्रैलोक्याऽभयदानोरु-नाटकस्याऽऽमुखं हि तत् ॥ ७

धन्यास्ते विषया ग्रामा, नगर्यः पत्तनानि च ।
मलयाऽनिलवद्यानि, प्रीणयन् विहरिष्यसे ॥ ८

पू.उपा. श्री सूरचन्द्रगणिविरचितः

श्री शान्तिनाथत्रयोदशश्लोकबद्धस्तवगर्भित-

## ४. ॥ श्रीअजितजिनस्तवः ॥

(उपजाति)

विश्वप्रभुं सेनमही न नाथं, सुवंशजं पङ्कजडत्वहारम् ।
श्रीभास्करं श्रीअजितं च भूया, आनन्दकन्दं त्वचिरेणतायं ॥१

जनाशुधीशं करमंशुकान्तिं, वन्दे महाशान्तिमहं सदा यम् ।
सुरासुरक्ष्मापनराह्यधीश-संसेवितं श्रीसुमनःप्रभुं च ॥(यु.) २

(शार्दूलविक्रीडित)

वर्ण्यस्वर्णसवर्णरुक्समगुणक्षेत्रं रसारम्यको,
जन्मानन्तसमुद्रसज्जतरणिः सारङ्गरङ्गाकरः ।
दुष्कर्मालिरिपुप्रवारकतमः संहारता कारिक-
स्त्राणं मां करुणास्पदं ह्यजितराट् सूरोऽवतात्तामसात् ॥ ३

मिथ्यात्वद्रुमभङ्गवारणनिभं रङ्गेण भव्यप्रदं,
सन्नित्यं सुखभङ्गिभद्र बिनिकाद्यं संतुतं सन्ततम् ।

मोहाद्द्रि स्वरुकं शिवं खरनिभच्छेदं क्षमं वज्रस-
द्न्ताभोगविधिं वरं नमनमश्रीबन्धुरं चाजितम् ॥ ४

(स्रग्धराः)

वैश्वप्राधान्यसेद्धः सुगुणनिकरखानिर्जितो नन्दिविद्या-
सच्छ्रीशान्तिः सलीलः सदुपशमधनीतालयः पात्वपायात् ।
सद्ध्यानो हर्षकारः समगुणवसतिर्व्वर्ज्जिताज्ञानभारो,
नुन्नक्रोधारिवर्गः प्रदितभवनिवासाकरः श्रीजिनेशः ॥ ५

अच्छाच्छात्माचिराच्च प्रथितमहिसमाख्योत्करः सादरोघो-
दारस्कन्नोदरीशोऽतिदरकरिहरीशो दशाश्वप्रचारः ।
मन्दारद्रुप्रमल्लिस्मितसुमकलिकाजातिमुख्यैः पयोजैः,
श्रीदेवाः पूजयन्ति प्रजितगदमदः सुक्रमः सोऽस्तु लक्ष्म्यै ॥६

ध्यातो देवाधिपैः सद्दयहृदयधरो दामसो व्याधिवारा-
द्विश्वप्रष्ठोरसेनोघनदनुजनृपांच्यो हि योगप्रराजः ।
यस्य ध्यानात्समेऽत्र क्षयमहितगणा यान्ति रोगालिनाशी,
दुष्टास्ताक्ष्र्यादिवोग्रागरलवदुरगाः सोऽचिरात्पातु नन्दी ॥ ७

दक्षो भास्वन्मनः पाः अतुलबलकलो युद्धमुक्तः सशुष्मा
भव्यान् भद्रैकपात्रं (वि)गतभवभयौघप्रगाढः ससातः ।
श्रेयः श्रेयः सुकेली सदनुपमनिवासानुकारो विभोगो,
रक्ष्यात्प्राणीगुणीशकमलमुखकलोऽशोचनः सोऽजितेशः ॥ ८

नित्यं सच्चन्द्रचङ्गोऽद्रिरिपुनतपदः कामहा चन्द्रकायः,
सर्वं मद्रं सुकीर्तिः करिकरसुकरो रातु शं कृज्जनानाम् ।
विद्याशालब्धिकारः समयनयधनो मानरिक्तोल्लमारः
प्राज्योजो मारकोग्र्यो मुनिजनसुमनः पुङ्गवः शान्तिदोऽसौ ॥९

नृणां नाथो जिनोऽच्र्यो दलितकलिमलः साधु जीयाच्चिरं यो,
गोप्ता विश्वस्य सार्वस्त्रिजगदवकृज्जन्मना नाधिनी (? ना) शी।
निस्सन्तापः स शीघ्रं शमयमनिरतो हेमवर्णाभदेहो,
वर्यः पापं हरोतीह भुवि कृततनूमन्मतौघो नितान्तम् ॥ १०

अंहो निस्तारकोऽसावयद इह भवाम्भोधितोऽलब्धसन्धेः,
स्फूर्ज्जत्सम्पत्तिकार्युद्धरतु भविजनान् कम्ररूपो जिनेशः ।
साधुप्राण्यब्जबोधप्रियतरतरणिः सारणिः सारसम्प-
द्वल्लीवृद्धौ समन्ताज्जितरवजलधिः सेवधिः सौख्यराशेः ॥११

सातत्यं पाहि पाहि प्रवरगुणजिनाधीश ! संसारवार्धि-
मध्यान्निःशोध्य नेतः प्रभवविसरहा सत्स्मर प्राणहन्तः ।
संसक्तं युष्मदंह्रिप्रवरजलरुहापातिनं मां जिनेश !,
सौभाग्यप्रष्ठभाग्य ! प्रथनदतमसां संहरापन्नपाप ॥ १२

कल्याणप्रख्यकायच्छविरशुभहरः सन्ततं विग्रहच्छित्,
सौवीं वाचं प्रयच्छ प्रशमततिकरीं त्वं जनाधारदेव ! ।
नित्यं सम्प्रार्थयेऽहं जयनिचयकरांशुप्रभो हि ध्रुवं म-
एतद्दे वन्द्यशान्तिप्रदगतवृजिनेशोतिदायं च प्राप्त ॥ १३

एवं स प्रातु वो वाञ्छितमिह नियतं सर्वदा सूरचन्द्रो,
जाविश्वेशो नुनावात्र सविनयनयं सौवभक्तप्रभुर्यं ।
स श्रेयाः श्रेयसे षड् विधु मितभगवत्स्तोत्रमिश्रस्तवेन,
श्रीचारित्रोदयांह्रिद्वयकजमधुकृत्सूरचन्द्रो वशी शः ॥ १४

पू.मु.श्री गुणविजयविरचितम्

## ५. ॥ श्रीअजितनाथचैत्यवन्दनम् ॥

(उपजाति)

ध्यानासिधाराजितकर्मशात्रवं, सुराजराजं जितशत्रुनन्दनम् ।
विराजमानामरपूजित-क्रमम्
नमामि रागैरजितं मुदाऽजितम् ॥ १

दीप्रप्रभा भास्वर भानुजित्वरमवेक्षणीये क्षण पुण्डरीककम् ।
विशाल सौन्दर्य विभूषिताङ्गकम्
नमामि रागैरजितं मुदाऽजितम् ॥ २

रागारिहन्ता विषयाजिताजितः सन्तापसन्तापनतापनद्युतिः ।
पुनाति यो जन्तुकलापकं गिरा
पायादपायात्परेमशिता नृणाम् ॥ ३

प्रवर्तिनी सा.श्री मेरुलक्ष्मीगणिनीकृतम्

## ६. ॥ तारङ्गामण्डनश्रीअजिनाथस्तवनम् ॥

(अनुष्टुप्)

केवलज्ञानसम्पूर्णं, वन्देऽहमजितं जिनम् ।
इक्ष्वाकुवंशशृङ्गारसारमुक्ताफलोपमम् ॥ १

जितशत्रुकुलाम्भोजे, विजयाकुक्षिपल्वले ।
सुस्वरः शुद्धपक्षोऽयं, राजते राजहंसवत् ॥ २

मोहमल्लविजेतारं, रागद्वेषविवर्जितम् ।
स्तौमि श्रीअजितं देवं, सुरासुरनमस्कृतम् ॥ ३

अनन्तगुणधातारं, सन्तोषसुखसागरम् ।
प्रणमामि महाभक्त्या, वैजयेयं जिनेश्वरम् ॥ ४

एवं स्तुतो मया भक्त्या, तारणाद्रिविभूषणम् ।
श्रीमान् श्रीअजितस्वामी, दद्यान्मे वाञ्छितं फलम् ॥ ५

पू.मु.श्री रंगविमलगणिविरचितम्

## ७. ॥ श्रीअजितनाथचैत्यवन्दनम् ॥

[इन्द्रवज्रा]

नो जीयते यो विषयैः खलीयैः सञ्जीयते धर्म चमूभटीयैः ।
वम्वन्द्यते यं सुरराजराजिः श्रेयोऽजितो वः कुरुताज्जिनेशः ॥१

यन्नामनावा भुवनोदधिं शं द्वेषादिनक्रं सहसा तरन्ति ।
यत्पूजया पाणिगता रमा सा वन्देऽजितन्तञ्जितरागकान्तम् ॥२

लेखद्रूधेनुप्रतिमग्रभावम् मार्तण्डमाजित्वरभासमूहम् ।
सन्मङ्गलं श्रीअजिताधिनाथं वन्दे भजेऽहङ्गुरु मुक्तिरङ्गः ॥३

## ८. ॥ श्रीअजितनाथचैत्यवन्दनम् ॥

(तोटक)

विजयासुत वन्दनतोऽतिभवा जगतीह समीहितभावधाराः ।
जनताजनिमोक्षविला(ना?)सपरा प्रणमामि ततोऽहमिमं प्रमुदा॥१

अचिरात् सुचिरार्जितपापहरं भविनां भवहारकभावकरम् ।
मदिनां मनसि स्थितिकं सुभगं विबुधैर्नतपादसरोजयुगम् ॥२

जगतामहितं दलितं विकृतं विभनाशुकृतं सुकृतं द्युतिदम् ।
न कथं बिभजेयमहं तमिभं मदनादिकमूलिसमूलकषम् ॥ ३

## ९. ॥ श्रीअजितनाथचैत्यवन्दनम् ॥

(तोटक)

जगती भविनामद्य पदमहिमं दृढमोहमहागजकेसरिणम् ।
अजितं सव्रतं जिनचन्द्रमहं प्रणमामि विभुं नृसुरप्रणतम् ॥ १

भवकर्म खलानभिजित्य बलादसमाचलमाप पदं रूचिरम् ।
स विभुः प्रवरोऽभयरोपकरो मतिदो वरदोऽस्तु सदोदयदः ॥२

जगतां प्रभुतां भवितारकता भविता लविता भववल्लिवनम् ।
सुतपश्चरिता शिवमातनुतां जितशत्रु सुनन्दन आप्तवरः ॥ ३

## १०. ॥ श्रीअजितनाथचैत्यवन्दनम् ॥

[मालिनी]

वरविजयविमानं पुण्यवान्प्रोज्झ्यसद्यो
हतभवमनुजाङ्ग, प्राप्तवान्प्राप्तरेखः ।
क्षपितभवभयारिर्ध्येयमूर्ति प्रभावो-
ऽजितजिनवृषराशि र्मङ्गलं वो ददातु ॥ १

सकलभुवनसौख्य-श्रेणिदाताऽवदात-
चरितगुणगणेनो-द्भासमानाङ्गयष्टिः ।
जगति सकलमान्यो भव्यमद्रास्वरूपः
स जयति यतिपूज्यो, वायुभुग्योनिरीशः ॥ २

विलसति शिवशान्तिर्यस्य पादारविन्दे,
अघविततिरजस्त्रं दूरतः संस्थिता च ।
नरपतिजितशत्रोरवन्याब्धिक्षपेशः
स विभुरजितनाथस्त्रायतां भूतसंघान् ॥ ३

कलितकलिगुणानां मानवानां नतानां,
निजपदमतिशोकं दानदक्षो ददानः ।
प्रवरमहिमभर्त्ता तारको यः श्रिताना-
मजितजिनवरोऽसौ पातु मां तीर्थनाथः ॥ ४

जननमरणशान्तिर्यत्क्रमाम्भोजयुग्मं
सकृदपि मनुजानां जायते पश्यतां द्राग् ।
कृतनिजकृतिशान्तिर्मग्नतान्तिप्रकारः
स जगदखिलसिद्धिं तीर्थनाथो ददातु ॥ ५

## ११. ॥ श्रीअजितनाथचैत्यवन्दनम् ॥

(वसन्ततिलका)

इक्ष्वाकुवंशविशदामरमार्गसूरं
व्यूढोदयप्रवरवर्त्मनि सार्थवाहम् ।
त्रैलोक्यवर्यसरसोरुहघस्त्ररत्न-
मीडे जिताहितसुताजितनाथसंज्ञम् ॥ १

सामान्यमानवसुधारुहमत्तपीलुं
लोभाशुगाशनविकल्पनभूरिकायम् ।
वंशाभिमानमृगनाथगजक्रमं च
ईडे जिताहितसुताजितनाथसंज्ञम् ॥ २

ऐश्वर्य मानगहने वरगन्धवाहं
शौर्याभिमानचिकिलात्ययसूर्यतापम् ।
रूपस्मयाब्धिदयितापतिवाडवाग्नि-
मीडे जिताहितसुताजितनाथसंज्ञम् ॥ ३

नूनं तपोमदमहावसतीनभोगं
शास्त्रोत्कटस्मयगदात्ययजापुकारम् ।
नाशीकृताखिलभवाब्धिनिदानमान-
मीडे जिताहितसुताजितनाथसंज्ञम् ॥ ४

धर्मोत्तमव्रततिपेटकनूतनाब्दं
गात्रप्रमाणधनुसार्द्धचतुःशतोच्छ्रम् ।
श्रीवत्सलाञ्छितभुजान्तरमत्र रेजे
ईडे जिताहितसुताजितनाथसंज्ञम् ॥ ५

## १२. ॥ श्रीतारङ्गामण्डनचैत्यवन्दनम् ॥

[इन्द्रवज्रा]

तारुण्यरूपो जितलोकरूपो,
रंहो रहो ध्येय ! विचिन्त्यरूपः ।
गानं यदीयं त्रिजगत्सु गाते,
मन्दोऽपि मर्त्योऽजितनाथमीडे ॥ १

ददाम यश्चेन्द्रियदामदक्षः
नाके यदीयोऽतिप्रकीर्तिपक्षः ।
धीमान् यशस्वी च तपस्विराजः
शास्ता नृणां योऽजितनाथमीडे ॥ २

जितारिषड्वर्गसुदीप्तकान्तिः
ततातिकीर्त्तिश्च प्रशस्यशान्तिः ।
नानाविधामर्त्यनरेन्द्रपुंसां
नाथैः सुपूज्याजितनाथमीडे ॥ ३

यशो यदीयं बहु भाति लोके,
धर्मश्च यस्यातिशयं चकास्ति ।
न मे च त्वत्तो व्यतिरिक्तमेतन्
नः स्यान्मनस्त्वाजितनाथमीडे ॥ ४

## १३. ॥ श्रीअजितनाथचैत्यवन्दनम् ॥

(द्रुतविलम्बित)

अजितनाथजिनेश्वरमीश्वरं,
ह्यमरदैत्यसुमानवपूजितम् ।
अधिगताऽनुपमाऽतिशयश्रियं,
जगदतीवविशुद्धमतिप्रदम् ॥ १

सकललोकमनोरथपूरकं,
विजितमोहमदादिकविद्विषम् ।
जगदपारमहामहिमाकरं,
परिणुमः सततं वरदायिनम् ॥ २

अपरजित्वरमारविजित्वरं,
भजति यं सकलं भुवनत्रयम् ।
द्विरदलाञ्छनमेनमहम्भजे,
शिवसुखं परिलिप्सुयतीन्द्रकः ॥ ३

## १४. ॥ श्रीअजितनाथस्तुतिः ॥

(वसन्ततिलका)

दिव्यातुलां सुखततिं विजयेऽनुभूयाऽ-
योध्यापुरी च विजयाशुभकुक्षिशुक्तौ ।
मुक्तोपमोऽजितजिनोऽवततार विज्ञः
श्वेतत्रयोदशदिनेऽमलमाधवीये ॥ १

यस्याष्टमी वरदिने सित पक्षमाधे
जन्मोत्सवोऽमखराः प्रचकार मेरौ ।
माघे सिते च नवमी शुभवासरेयो
दीक्षां ललौ प्रविशदोन्नत भावनाढ्य ॥ २

ध्यानान्तरीयसमये गतघातिकर्मा
संप्राप्य केवलमनन्तपदार्थबोधम् ।
लेभे शिवं सकलकर्मविनाशकाले
कर्मा-जिताजित-प्रभुं प्रणिदध्महे तम् ॥ ३

## १५. ॥ श्रीअजितनाथस्तुतिः ॥

जयवानजितो देवो, न च कोप्यजितं जयेत् ।
अजितेन जिताः सर्वे, अजिताय नमो नमः ॥ १

अजिता जयवन्तोन्ये, अजितस्य जयो महान् ।
अजिते जय लक्ष्मीश्च, सुखं वसति सर्वदा ॥ २

एतादृशोऽजितो देवो, ममाहो हृदयाम्बुजे ॥
सदा तिष्ठतु भाग्यं चेत् मराल इव मानसे ॥ ३

## १६. ॥ श्रीअजितनाथस्तुतिः ॥

(द्रुतविलम्बित)

सुखदजन्मनि यस्य मुदन्विताः निरयवासगत(?)अंशुशालिनः।
सुखदमासनमाचलतां गतं तमभिनौम्यजितं गजचिह्नतम् ॥ १

भविजनाम्बुजभासनभास्करो भुवनबान्धव इहितदायकः ।
प्रणत वासवचक्रिनृपावलि-
र्विजयतामजितोऽत्र जिनाधिपः ॥ २

खदमिनं खमनोरथनिरतिं मदनखं खमिलानघलेपनम् ।
जिनखमप्रतिकारमनारतं तमजितं भविनीरजं स्तुवे ॥ ३

## १७. ॥ श्रीअजितनाथचैत्यवन्दनम् ॥

(मालिनी)

विगय सयल दोसं पुण्णं संपत्ति गेहं
पसम सुह नियाणं सव्वया सुद्ध देहं ।
विगलिय भव चक्कं भव्व पाहोय भाणु
अजिय जिण वरिंदं भावजुत्ता णमे मो ॥ १

अमरवइ नरिंदोहत्थुयं पूयणिज्जं
तिजय विइयनामं तित्थनादं सरेमो ।
भवियण हियवायं पुज्जपायारविंदं
पसमनिहि मुहज्जं विस्सनाहं थुणेमो ॥ २

अहिय विमल सुक्कज्झाण जोइस्सरूवं
पयडिय निहिलात्थत्थोम सच्चस्सरूवं ।
सयल हियय जोग क्खेम कज्जप्पवीणं
अजिय जिगयदेवं हं नमामिप्पहाअे ॥ ३

पू.उपा.श्रीनयविमलविजयविरचितः
'हरि''शब्दनिबद्धः

# १८. ॥ श्रीअजितजिनस्तवः ॥

नत्वा क्रमकजयुगलं, सद्विज्ञान–तत्त्वज्ञानदक्षगुरोः ।
मनुजगणैः कृतसेवं, देवं वन्देऽहमजिताख्यम् ॥ १ (आर्या)

(तोटकम्)

प्रणमामि जिनं जिनराजहरिं, निजवक्त्रविनिर्जितचारुहरिम् ।
भविकाम्बुजभासनदीप्रहरिं
यमितातुलचञ्चलचित्तहरिम् ॥ २

वररागमतङ्गजभेदहरिं, करणोरगयन्त्रणजय्यहरिम् ।
सुदृशोत्करचित्तरसालहरिं, दुरितोत्कररेणुसमूहहरिम् ॥ ३

पदपङ्कजनामितसर्वहरिं, गमनाधरितप्रबलैकहरिम् ।
अयशोगुरुपत्रघटीन्ध्रहरिं(?), मदनाशुभवारणचण्डहरिम् ॥४

स्वकचारुपिचण्डजितैकहरिं(?), समयागमपद्धतिसृष्टिहरिम् ।
ममतातरुकर्त्तनतीक्ष्णहरिं, जितशत्रुनृपान्वयसिन्धुहरिम् ॥ ५

मनुजन्ममनोगतभावहरिं, विजयोदयकन्दरशायिहरिम् ।
तनुकान्तितिरस्कृततारहरिं, धृतरागनिबर्हणतीव्रहरिम् ॥ ६

कुमतक्रुचशैलभिदेकहरिं, भवसागरशोषणसाधुहरिम् ।
हरिराशि विराजितचारुहरिं, अरुजाक्षरपत्तनधुर्यहरिम्(?) ॥७

वरतुर्यमहाव्रतभारहरिं, शुभगुल्मिनीवल्लवनैकहरिम् ।
अतितीव्रपरिसहजिष्णुहरिं, कठिनान्तरवैरिविकालहरिम् ॥ ८

सुमतिव्रततिस्थितिचारुहरिं, गुणमौक्तिकजन्मनिवृद्धहरिम् ।
भवसिन्धुपतज्जनतैकहरिं, निजनक्रविनिर्जितभव्यहरिम् ॥ ९

परवादिवचःपवनैकहरिं, सुदृगङ्गिमनःसरसीद्धहरिम् ।
विषयाचलभेदननव्यहरिं, विशदीकृतचिद्गुणतैकहरिम् ॥ १०

अशुभोत्करकाननदीप्रहरिं, भविभावविभावनचारुहरिम् ।
दशनद्युतिभर्त्सितसर्वहरिं, जनताप्रतिपूजितपूज्यहरिम् ॥ ११

स्ववचोभिरमर्षितचारुहरिं, ततमानमहीधरभेदहरिम् ।
निजदानविगर्हितदेवहरिं, प्रणमामि जिनं जिननाकिहरिम् ॥१२

इत्थं स्तुतोऽजितजिनो जितचित्तजन्मा,
श्रीवापिकापुरि नयाद् विमलेन भक्त्या ।
प्राज्ञप्रकाण्डविनयाद् विमलांह्रिपद्म-
सेवासुधीरविमलाख्यगुरुप्रसादात् ॥ (वसन्त.) १३

श्रीमत्तपागच्छाचार्यश्री विबुधविमलसूरिरचितम्

## १९. ॥ श्रीसम्भवनाथस्तोत्रम् ॥

(द्रुतविलम्बित)

सकलविघ्नविघातकरस्वरः, प्रहतमन्मथदर्प्पमहाज्वरः ।
कनकवर्णशरीरसुखाकरो, विजयते भुवि शम्भवशङ्करः ॥ १

भवसि नाथ ! कृपाकरविक्रमो, विनिहतापरदेवपराक्रमः ।
भवसमुद्रसमुद्धरणक्षम-स्त्रिजगदेकविभो ! भवते नमः ॥ २

विगतरोगवियोगविपच्चय !, मदनमानपराभवसाध्वस ! ।
सुखनिवास ! शुभाशयराशिधे !,
गुणगभीरतया जितवारिधे ! ॥ ३

गजगते ! सितदन्तततेऽहते !, सुरनते ! विगते ! सुमते ! स्तुते !।
जिनपते ! पतितेनपतेऽपते !, तव वचो भिदुरं कुमतेर्मते ! ॥४

अमरसुन्दरिलोचनपूजितो, न भववासनया किल रञ्जितः ।
मुनिगणप्रणिधानधिया धृतः, कथमयं भवता जन उद्धृतः ? ॥५

समतयाऽमतया मुनिभिः श्रित !, सकलताकलतागुणसेवितम् ।
गततमस्ततमातपवारणं, शिरसि ते रसितेश्वरतालयम् ॥ ६

कुमुदबान्धव एव जितारिजो, विबुधवन्दितवन्द्यपदाम्बुजः ।
कुवलये विदधन् मुदमङ्कहा, भवति मे शरणं भविबान्धवः ॥७

कुरु कृपां त्रिजगज्जनपालक ! जननदुःखभयोद्भववारक ! ।
भ्रमरतां समुपैतु मनः सदा, मम तृतीयजिनेश्वरपत्कजे ॥ ८

इति धरति सुकण्ठे सम्भवस्तोत्रमालां,
विबुधविरचितां तां सद्गुणैः पुष्परूपैः ।
न भवति किल पीडा रोगशोकोद्भवा तु,
शिवसुखसमुदायस्तस्य गेहाङ्गणेऽस्ति ॥ ९

पू.आ.श्री हेमचन्द्रसूरिविरचितः
दीक्षास्वीकृत्यनन्तरं श्रीशक्रेण सन्दृब्धः

## २०. ॥ श्रीसम्भवनाथ-जिनस्तवः ॥

(अनुष्टुप्)

चतुर्ज्ञानधर ! चतु-र्यामधर्मप्रदर्शक ! ।
चतुर्गतिप्राणिगण-प्रीतिदायिञ्जय प्रभो ! ॥ १

धन्यास्तास्त्रिजगन्नाथ !, भरतक्षेत्रभूमयः ।
तीर्थेश ! जङ्गमं तीर्थं, यासु त्वं विहरिष्यसे ॥ २

अस्मिन् वससि संसारे, संसारेण न लिप्यसे ।
पङ्कजं पङ्कजमपि, याति पङ्किलतां न हि ॥ ३

तवाऽसिधारासोदर्यं, जयतीदं महाव्रतम् ।
कर्मपाशच्छेदनाय, प्रभविष्णु जगत्प्रभो ! ॥ ४

निर्ममोऽपि कृपालुस्त्वं, निर्ग्रन्थोऽपि महर्द्धिकः ।
तेजस्व्यपि सदा सौम्यो, धीरोऽपि भवकातरः ॥ ५

नितान्तं पूजनीयः सः, नाकिनां मानवोऽपि सन् ।
विहरन् कार्यसे येन, पारणं विश्वतारणम् ॥ ६

महोपकारजनकं, स्वामिन्नविरतस्य मे ।
औषधं व्याधितस्येव, भवद्दर्शनमीदृशम् ॥ ७

त्रिजगन्नाथ ! नाथामि, त्वयि भूयान्मनो मम ।
अनुस्यूतमिवोत्कीर्ण-मिव श्लिष्टमिवाऽनिशम् ॥ ८

पू.आ.श्री कल्याणसागरसूरिविरचितम्

चतुर्थीविभक्त्यन्तपदयुक्तम्

## २१. ॥ सूर्यपुरीयश्रीसम्भवजिनस्तवनम् ॥

(वसन्ततिलका)

कामं नमोऽस्तु सततं जिनसम्भवाय
चन्द्राननाय कमलामललोचनाय ।
देहप्रभास्थगितलोकचमत्कराय
दुर्ध्यानपादपविभेदनसिन्धुराय ॥ १

देवैः स्तुताय भवसागरपारगाय
कीर्तिप्रसूनसुरभीकृतविष्टपाय ।
सन्मूर्तिकान्तिततिरञ्जितमानवाय
सेनाङ्गकुक्षिवरशुक्तिकमौक्तिकाय ॥ २

अब्जोपमाय जिनशासनदीपकाय
सूर्य्याख्यबन्दरमनोरममण्डनाय ।
भव्याब्जकाननविभासनभास्कराय
नानार्थदानहरिचन्दनसन्निभाय ॥ ३

आदेयनामकलिताय शुभाशयाय
सिद्ध्यङ्गनामिलनसादरलोलुपाय ।
राद्धान्तहार्दकथनोत्तरकोविदाय
तेजःप्रभावयशसामवनीश्वराय ॥ ४

अज्ञानमोहभयसञ्ज्वरभेषजाय
सौभाग्यभाग्यगुणरत्नकरण्डकाय ।
अष्टापदाभतनुवर्णविराजिताय
निर्लोभहंसरतिखेलनमानसाय ॥ ५

आह्वानमन्त्रविनिवारितपातकाय
कल्याणसागरतरङ्गकलाधराय ।
दुष्टारिचक्रलवणाम्बुधरोपमाय
वाचासुधाश्रवणहर्षितनागराय ॥ ६

सद्धर्म्ममार्गविधिदेशनदेशिकाय
दुःखौघवारणमृगेन्द्रपराक्रमाय ।
लोकातिशायिमहिमाचलभूषणाय
गन्धर्वलञ्छनसुशोभितपत्कजाय ॥ ७

शस्यौघवृद्धिकरणाय जितेन्द्रियाय
शुद्धान्वयोन्नतिकराय कृपालयाय ।
मिथ्यात्वतापशशिचन्दनपादपाय
दुष्कर्म्मवायुभुजगाय नरार्चिताय ॥ ८

सङ्कल्पकल्पनविवर्जितमानसाय
गाम्भीर्य्यधैर्य्यमणिसम्भवरोहणाय ।
सुज्ञानबुद्धिवरदाय गुणाकराय
कौशल्यवल्लिपरिवर्द्धनमण्डपाय ॥ ९

स्तोत्रं चतुर्थ्यन्तविभक्तिसंयुतं
ध्यायन्ति ये सम्भवदेवरागिणः ।
तिष्ठन्ति तद्धाम्नि शुभाः समृद्धयः
कल्याणसम्पादनकामधेनवः ॥ (इन्द्रवंशा) १०

लक्ष्मीकेलिगृहं सदावलिनतं, श्रीसंभवाख्यं जिनं
सन्मार्तण्डपुरामलाचलवरोष्णीषे भवाब्धौ तटम् ।
देवाधीशनरेशशेषपटलैः संसेवितं कामदं
मुक्तिस्त्रीसुखरङ्गलीनमनिशं सेवे मुदा सिद्धये ॥ ११

(शार्दूलविक्रीडित)

पू.मु. श्री गुणविजयविरचितम्

## २२. ॥ श्रीसम्भवनाथचैत्यवन्दनम् ॥

नतामराधीश्वरशोभितक्रमो विशुद्धसंवेदननाथसम्भवः ।
सतां सुसेव्यः स मनोमनोरथान् ददातु कामं विनयानताङ्गिने॥१

(वंशस्थ)

गीर्वाण गीर्वाणविपक्षवृन्द-सद्भक्तिभावाञ्चितपार्श्वदेशम् ।
प्रमर्दितारात्यतिगर्ववर्गं सेनाप्रसूसम्भवसम्भवं स्तुवे ॥ २

(उपजाति)

समस्तविध्वस्तविपक्षपक्षकः समस्तवस्तुव्रजभावभासकः ।
पवित्रपादैर्जगतीं पवित्रयन् स सम्भवो वोऽवतु विन्मयात्मकः॥ ३

(वंशस्थ)

## २३. ॥ श्रीसम्भवनाथचैत्यवन्दनम् ॥

(तोटक)

भुवनाद्भुतभाग्यभरेज्यपदं भवनीरधिपोतनिभं शमदम् ।
चितकर्मगदौष-छमासवरं प्रणमन्तु जितारिसुतं भविकाः ॥ १

जलदं रुचिपादपपल्लवने सकलाङ्गिहितप्रदसूक्तिततिम् ।
विमलातिशयर्द्धि-समूहयुतं नम सम्भवनाथ-जिनाधिपतिम् ॥२

जगतीतले भूषणमारहरं स्वपवर्ग-सनातन-सौख्यकरम् ।
स्थिरशान्तिनिधिं विपुनर्भवनं प्रणमामि गजध्वजदेहमहम् ॥३

## २४. ॥ श्रीसम्भवनाथचैत्यवन्दनम् ॥

(भुजङ्गप्रयात)

यतो वै जनानामुदेतीह बोधो
यतोऽज्ञानराशिर्दरीं सेवतेऽरम् ।
यतो जन्म जीवैः फलीभूतमीशं
क्रियेताभिवन्दे प्रभुं सम्भवन्तम् ॥ १

प्रभूताञ्जनान् यः सुसेनाङ्गजातो
व्यतारीत्प्रमोहाज्जितारिप्रमोदी ।
स्वयन्त्यागराशिर्भवाशा विदारी
भजध्वं हृदा मानवाः सम्भवेशम् ॥ २

सदा श्वेतभावानलज्योतिषेह
सतो यस्य याता विपाकावलिः सा ।
जराजन्ममृत्युच्च्युतः सिद्धकेती
सदा सम्भवः पातु वः पातु रङ्गम् ॥ ३

## २५. ॥ श्रीसम्भवनाथस्तोत्रम् ॥

(उपजाति)

ग्रैवेयकात्सप्तमतोऽतिपुण्य-श्च्युत्वाऽतिशस्तान्मृगशीर्षजन्मा ।
नमाम्यहं सम्भवनाथमीशं, तं मोक्षदं देवगणं वरेण्यम् ॥ १

निधानमक्षीणममन्दसम्पदां, निदानमक्षय्यगुणव्रजानाम् ।
पात्रं परं ज्ञानवचोऽमृतानां, ध्यानाधिरूढं कुरु युग्मराशिम् ॥२

यद्भक्त्यधीनीकृतमानसाब्जाः, सद्यो बभूवुर्भवभीतिमुक्ताः ।
सद्भावनोल्लासगुणानुरक्ता-स्तं देवदेवाधिपतिं भजन्तु ॥ ३

सुखप्रदं पन्नगयोनिमन्तं, योनिप्रभेत्तारमनल्पवीर्यम् ।
जगत्त्रयाधारमखण्डभावं, जिनेश्वरं सम्भवमाश्रयामि ॥ ४

श्रीमान् प्रतापाश्रयसम्भवेशो-विश्वोपकाराय कृतप्रवृत्तिः ।
स सेव्यतामक्षयसम्पदायै, दीव्यानुभावो भुवि भव्यलोकाः ?॥५

पू.आ.श्री भुवनसुन्दरसूरिविरचितम्

पावकपर्वतमण्डन-

## २६. ॥ श्रीसम्भवजिनस्तोत्रम् ॥

(भुजङ्गप्रयात)

महाप्रातिहार्यश्रिया शोभमानं सुवर्णादिरत्नत्रयीदीप्यमानम् ।
स्फुरत्केवलज्ञानवल्लीवसन्तं स्तुवे पावके भूधरे शम्भवं तम् ॥१

कलाकेलिकेलीविनाशैकदक्षं समस्ताङ्गिनां प्रार्थिते कल्पवृक्षम्।
त्रिलोकीतले पापपूरं हरन्तं स्तुवे पावके भूधरे शम्भवं तम् ॥२

महाभाग्यसौभाग्यभङ्गीधरं तं महामोहसर्पप्रणाशे सुपर्णम् ।
प्रभामण्डलोल्लासिगाङ्गेयवर्णं
स्तुवे पावके भूधरे शम्भवं तम् ॥ ३

सुधासोदरोल्लासिवाणीविलासं प्रमादादिविद्वेषिदत्तप्रवासम् ।
त्रिलोकीस्थितान् सर्वभावान् विदन्तं
स्तुवे पावके भूधरे शम्भवं तम् ॥ ४

स्थितं पुण्डरीकाचलस्यावतारे-ऽखिलक्ष्माधरश्रेणिशृङ्गारहारे ।
तृतीयं जिनं कुन्ददन्तं भदन्तं
स्तुवे पावके भूधरे शम्भवं तम् ॥ ५

प्रभो ! मज्जता भीमसंसारकूपे
मया देव ! लब्धोऽसि दुःखैकरूपे ।
दृढालम्बनं यस्त्वमेवोल्लसन्तं
स्तुवे पावके भूधरे शम्भवं तम् ॥ ६

ददास्यङ्गिनां देव ! सर्वार्थसिद्धिं हरस्युग्रमिथ्यात्वमोहादिबुद्धिम्।
अतोऽभीष्टदो यस्त्वमेवोल्लसन्तं
स्तुवे पावके भूधरे शम्भवं तम् ॥ ७

प्रभो ! देवरत्नं मया लब्धमद्य
समासादितः कल्पवृक्षोऽपि सद्यः ।
यतः प्रापि भाग्योदयैर्यो भवन्तं
स्तुवे पावके भूधरे शम्भवं तम् ॥ ८

चाम्पानेरपुरावतंसविशदश्रीपावकाद्रौ स्थितं
सार्वं शम्भवनायकं त्रिभुवनालङ्कारहारोपमम् ।
इत्थं यो गुरुभक्तिभावकलितः संस्तौति तं वृण्वते
ताः सर्वा अपि मङ्गलोत्सवरमा भोगान्विताः सम्पदः ॥ ९

(शा.वि.)

पू.आ.श्री कल्याणसागरसूरिविरचितम्
चतुर्थपादावृत्तियुक्तम्

# २७. ॥ सूर्यपुरभूषणस्थश्रीसम्भवनाथाष्टकः ॥

(इन्द्रवज्रा)

लावण्यगेहं कलहेमवर्णं छद्मोज्झितं सुन्दरवाहचिह्नम् ।
लक्ष्मीकलापार्णवधिष्ण्यनाथं देवैर्नतं सम्भवनाथमीडे ॥ १

सेनाङ्गजं दारुणकर्मशत्रौ वीरं वरं पूतचरित्रशोभम् ।
क्षेमास्पदं सद्गुणरत्नखानिं देवैर्नतं सम्भवनाथमीडे ॥ २

ईक्ष्वाकुवंशं वरतिग्मरश्मिराकेन्दुवक्त्रं गतवक्रमान्द्यम् ।
अज्ञानवैश्वानरशान्तिनीरं देवैर्नतं सम्भवनाथमीडे ॥ ३

दुःखोदधौ पीतसमुद्रमिद्धं सत्प्रातिहार्याष्टकराजिराजम् ।
क्षमानिधिं विस्तृतपुण्यमूर्त्तिं देवैर्नतं सम्भवनाथमीडे ॥ ४

भव्यैर्मुदा सेवितपादपद्मं सज्ज्ञानवज्राहतमोहभूधरम् ।
संसारदावाकुलमर्त्यमेघं देवैर्नतं सम्भवनाथमीडे ॥ ५

सत्कीर्त्तिपात्रं दुरितारिसेव्यं जगज्जनानन्दकरं शरण्यम् ।
कारुण्यसंयुक्तपवित्रचित्तं देवैर्नतं सम्भवनाथमीडे ॥ ६

कुन्दार्हदन्तं कजलोचनं वै वपुः श्रिया तर्जितसूर्यकान्तिम् ।
पापान्धकारेऽमलदीपकं तं दैवेर्नतं सम्भवनाथमीडे ॥ ७

प्रसादनातत्परसेवकस्येप्सितार्थदाने सुरदेववृक्षम् ।
सुखैरनेकैर्युतचारुदेहं देवैर्नतं सम्भवनाथमीडे ॥ ८

कलशः ।

इत्यष्टकं श्रीजिनसम्भवस्य पठन्ति ये मञ्जुलभावयुक्त्या ।
तेषां गृहे पुण्यनिधानभव्याः कल्याणकाराश्च भवन्ति ऋद्धयः॥९

पू.आ.श्री सोमविमलसूरिविरचितम्

अष्टोत्तरशतसंवरशब्दार्थगर्भितम्

## २८. ॥ श्रीअभिनन्दनजिनस्तोत्रम् ॥

(अनुष्टुप्)

वार्णी वाणीमियं दद्यात्, स्वरद्वन्द्वविपर्ययाम् ।
तामेव बिभ्रती ज्ञालीं प्रपूर्वां तां च कुर्वती ॥ १

श्रीहेमविमलसंवरममलं संवरधरं गुरुं नत्वा ।
श्रीसंवरनृपसंवर-नेत्री संवरभवं स्तौमि ॥ २

वरसंवरज-समानं मुखसंवरजं विभाति यस्य विभोः ।
पदसंवरजं तस्य च करोम्यहं हृदयसंवरजे ॥ ३

संवरवाहनिनादं संवरनिधिसंवराभशुद्धतरम् ।
संवरजसकलवदनम्, गीतं संवरजनयनाभिः ॥ ४

संवरजजनित-संवरशायिक-संवरदवाहनैः सेव्यम् ।
संवरजपुत्रपुत्री-संवरभवमन्दिरापूज्यम् ॥ ५

असंवरवराकारं संवरधिजशुद्धगुणगणागारम् ।
संवरजबन्धुसदृशप्रतापमीशं वरं वन्दे ॥ (त्रिभि.) ६

संवरसमानगुणभृत्, कषायसंवरविताशने कृष्णः ।
कर्मकरिसंवराऽरिः संवरनयनो जिनो जीयात् ॥ ७

जय जिन ! संवरवारक ! भवसंवरराशिसंवरे प्राप्तः ।
संवरमदवरगन्धः संवरजनबोधिदो देवः ॥ ८

संवरया रहितो दशशतसंवरजसंवरं प्राप्य ।
संवरजासनसंस्थो ध्यानमकार्षीत् श्रिये सोऽस्तु ॥ ९

यो विस्संवररहितं तथैव संवरयुतं सुसाधूनाम् ।
मार्गं कथयति विससंवरैर्नुतः संवरस्त्वमसः ॥ १०

जय जिन ! संवरवैरिजि-दपूर्वसंवरविनाशकैर्विनतः ।
विसमोहसंवरारे ! विसमदसंवरमहासेनः ॥ ११

संवरज-महासंवरज-संवरोऽद्भुत-मुखनिधानानि ।
यो दत्ते स जीयात् संवरभवचारुवरकण्ठः ॥ १२

रागोरुगसंवरनिधि-भवसंवरराशिसूमणे नाथ ! ।
जय संवररेहगमनः संवरशिरच(श्च)न्द्रवत् सुखदः ॥ १३

असंवरान् नमस्कृत्य, मुक्त्वाऽसंवरमात्मनः ।
संवरधनतां प्राप्तो योऽसौ श्रीतीर्थपो जीयात् ॥ १४

यः संवरकरोऽत्यन्तं संवरादिषु जन्तुषु ।
श्रीविलासं वरं कुर्यात्, सोल्लासं वरसंयुतम् ॥ १५

त्वमेव संवरः स्वामिन्नसंवरिनृणां विभो !
त्वमेव संवरस्वामी, त्वमेव संवरप्रदः ॥ १६

देहि मे त्वं जिनाधीश ! संवरं संवरं त्ववम् ।
अशोकसंवरं बिभ्रत् संवरत्रयमाश्रितः ॥ १७

त्वमश्च संवरो जीयात्, साधुतारकसन्ततेः ।
तथैव संवरः स्वामिन् ! मुक्तिकस्तूरिकाततेः ॥ १८

असः संवरदो देवः संवरप्रतिबोधदः ।
संवरः शिवकान्तायाः वदने संवरः प्रभो ! ॥ १९

दुःकर्मकंसरिपुमर्दनसंवरारि-र्मानाऽसमानगिरिभञ्जनसंवरारिः ।
जीयान्मदाम्बुरहरर्हन्(?), भव्याम्बुजप्रकरसंवर ! त्वम् ॥ २०
(वसन्ततिलका)

श्रीसंवरेशकुलसंवरदाऽऽश्रये त्वम्,
प्रोद्यत्प्रतापभरतिर्मलसंवरांशुः ।
जीयाज्जिनेश ! नतसंवरबाहवाह !
श्रीसंवरोद्भवमहाकरिसंवरेशः ॥ (वसन्ततिलका) २१

विवाऽऽसंवरो धर्मवल्लीविताने, सुकासंवरः क्षान्तिनीरस्य नाथः।
कुसं संवरापारनीरेशतीरो, जयासंवरद्वेषपूरेण मुक्तः ॥ २२

श्रीसंवराङ्कजिन संवरतुल्यकायः
चञ्चत्प्रतापभरसंवरजाड्कदेवः ।
तीर्थेशसंवरभवाङ्कमुखात् सुलब्ध-
त्वत्सत्प्रभावगणसंवरभूधरार्च्यः ॥ (वसन्ततिलका) २३

अष्टोत्तराणि च सहस्रमितानि शम्भो-
र्लक्ष्मानि(णि) यस्य करसंवरजे विभान्ति ।
सच्छत्रसंवरज संवरजात यूप,
प्रासाद संवरमुखानि स वः श्रियेऽस्तु ॥(वसन्ततिलका) २४

दद्यादनन्ता[न्त्या]क्षरसंवरो हि, जिनाधिपः केशवसंवरेशाम् ।
यः संवरेशादिकलोकपालै-रभ्यर्चितः संवरवैरिवारी ॥ २५
(उपजाति)

जय जिनेश ! यशसाऽवसंवरः, शमरसस्तथैव च संवरः ।
अपवसंवरशस्त्रधरैर्नृतो, विगतसंवरसंयमसंयुतः ॥(द्रु.वि.)२६

अयस्संवरः पापकुष्टेऽत्यनिष्टे
सितासंवरः क्रोधतापेऽतिदुष्टे ।
सदा दर्शनात् संवरक्षेमकारी,
प्रभुः संवराङ्कानन: पुण्यचारी ॥ (भुजङ्गप्रयात) २७

एवं संवरराशिजातविलसद्रत्नैः सदर्थैः स्त्रजं-
कृत्वा यो रुचिरां सुहेमविमलं सौभाग्यहर्षप्रदाम् ।
सार्वेशाधिपसांवरेय सुलसत्कण्ठे निधत्ते मुदा,
स श्रीसौख्यनिधिं सुसोमविमलः प्राप्नोतु पृथ्वीतले ॥ २८
(शार्दूलविक्रीडित)

# २९. ॥ श्रीसुमतिनाथजिनस्तुतिः ॥

(वंशस्थ)

नुवामि मेघक्षितिपालनन्दनं
सुरासुरालीकृतपादवन्दनम् ।
अशर्म-कर्मौघनिदाघचन्दनं
मुनीशसद्ध्यानविलासनन्दनम् ॥ १

तवाभिधानामलदुग्धवारिधौ-
वगाह्य धौताखिलकर्मकश्मलाः ।
भवन्ति विध्यातकषायशीतलाः
निवृत्ततृष्णा मनुजा गतश्रमाः ॥ २

तनुं त्वदीयां श्रितकल्पवल्लरीं
भवज्वरोन्मादमदप्रमाथिनीम् ।
विहाय मन्दाः प्रतिजानते भव-
भ्रमिं नरस्वर्ग्यधिपालिपूजिताम् ॥ ३

नयं समाश्रित्य च नैगमाभिधं
प्रमाणयन्तीरितकर्मवैभवाः ।
न ते जिनं द्रव्यतयाल्पमेधसो
ह्यतीतभाव्यास्पदमागमाविदः ॥ ४

निवारिताशेषविशेषरोधक-
जगत्त्रयाज्ञानतमिस्रसञ्चयम् ।
समस्तदेवासुरमर्त्यसंसदि
दिशं तमच्छं कुशलोपदेशकम् ॥ ५

परे न पश्यन्त्यहहो जडाशया
लसन्तमत्युज्ज्वलकेवलश्रिया ।
प्रणष्टमिथ्यात्वविवेकचक्षुषः
सहस्रधामानमिवान्धतामसाः ॥ ६

चतुःप्रकारं भवतः स्वरूपकं
प्रकुर्वते ये नतिगोचरं जनाः ।
गतिं प्रयास्यन्त्यचिरात् सुरालये
समाप्य भोगानमृतं गतांहसः ॥ ७

जयाहतामङ्गल ! मङ्गलोदर-
दरीमृगेन्द्रार्भक ! विश्वपालक ! ।
गुणौघवासाक्षयलब्धिसागर !
सदा समाधेहि पदाम्बुजान्तिके ॥ ८

## ३०. ॥ श्रीपद्मप्रभजिनस्तुतिः ॥

(मौक्तिकमाला)

विद्रुमपद्मोपलसमवर्णाऽ-नन्तगुणाप्यष्टकगुणकीर्ण ! ।
सर्वशरीरोपचितिविमुक्त ! ज्ञानविधानाक्षयगुणयुक्त ! ॥ १

निर्जितमोहप्रबलविपक्ष ! जन्मयमोपद्रवदृतिदक्ष ! ।
योगिवराऽऽलीस्तुतगुणलक्ष ! विश्वप ! पद्मप्रभ ! परिरक्ष ॥२

मिथ्यामानमदाचलरूढं मायामानदृढावृतिगूढम् ।
भोगाशागुरुपाशसमूढं मां मिथ्यासवपानविमूढम् ॥ ३

अन्यस्त्रीवसुहारविषक्तं सत्वालम्भवितथ्यसुरक्तम् ।
पादाम्भोजसमीपविभागे सागस्कं धुतमान्मथरागे ॥ ४

(आर्या)

त्वच्छरणचरणशाखि-च्छायामाश्रित्यभवदवश्रान्तः ।
परमानन्दपदं चे-न्न लभेयं ते त्रपा भ्रान्तः ॥ ५

राजीवदलसुनेत्राऽऽनन ! प्रभावजितशारदमृगाङ्क ! ।
भव्याब्जकमलबन्धो ! जिनेश ! कारुण्यरससिन्धो ! ॥ ६

(उपजाति)

मदीयचक्षुर्मधुपौ चलाचलौ निरीक्षणीयानपरान् विमुच्य ।
सदा रमेतां वदनारविन्दे चित्तं च चित्रे तव नाममन्त्रे ॥ ७

श्रुती भवद्वाक्यसुधासमुद्रे मग्ने रसज्ञा तु तव स्तुतौ परा ।
त्वदीयपूजापरिकर्मदक्षौ करौ क्षमासागर मे भवेताम् ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितः

भगवतः केवलज्ञानप्राप्त्यनन्तरं सौधर्मेन्द्रकृतः

## ३१. ॥ श्रीसुपार्श्वनाथ-जिनस्तवः ॥

(अनुष्टुप्)

निःशेषभुवनकोश-पद्मकोशविवस्वते ।
तुभ्यं नमो भगवते, श्रीमते सप्तमाऽर्हते ॥ १

गतं दुःखेन विश्वस्या-विर्भूतं च मुदा प्रभो ! ।
विश्वं तीर्थपरावृत्त्या, परावृत्तमिवाऽधुना ॥ २

धर्मचक्रिस्तववचो-रत्नदण्डेन भास्वता ।
निर्वाणवैताढ्यगिरे-र्द्वारमद्योद्घटिष्यते ॥ ३

उन्नतस्येव मेघस्य, भगवन् ! दर्शनं तव ।
विश्वस्य जीवलोकस्य, सन्तापच्छेदनान्मुदे ॥ ४

अनन्तज्ञान ! भगवन् !, देशनावचनं तव ।
दरिद्रैर्द्रविणमिव, चिरादस्माभिराप्स्यते ॥ ५

कृतार्था दर्शनेनाऽपि, तवाऽद्य वचनेन तु ।
विशेषतो भविष्यामो, मुक्तिद्वारप्रकाशिना ॥ ६

अनन्तदर्शनज्ञान-वीर्यानन्दमयाऽऽत्मने ।
सर्वाऽतिशयपात्राय, तुभ्यं योगाऽऽत्मने नमः ॥ ७

इन्द्रादिपदवीप्राप्तिः,कियदेतज्जगत्पते ! ।
तव शुश्रूषया यस्मात्, त्वादृशैरपि भूयते ॥ ८

पू.उपा.श्री यशोविजयविरचितः

उदयपुरमण्डन–

## ३२. ॥ श्रीसुपार्श्वनाथस्तवः ॥

(वसन्ततिलका)

नित्योदयोदयपुरप्रथितप्रसाद–
प्रासादमेरुतरणिप्रतिरूपरूप ! ।
आनम्रसुन्दरपुरन्दरमौलिरत्न–
रत्नप्रभारुचिरपार्श्व ! सुपार्श्व ! जीयाः ॥ १

जाग्रत्प्रभावसदनं सदनन्तबोधं
सिद्धं शिवं शिवकरं विगलद्विरोधम् ।
एकान्तकान्तशुभयोगसमृद्धिमन्तं
त्वामेव देव ! वयमीश्वरमाश्रयामः ॥ २

लावण्यपुण्यतममाननमिन्दुजैत्रं
नेत्रे सरोजजयिनी करुणैकपात्रे ।
अङ्कः कलङ्करहितो ललनाविलासै–
रेषा तवैव जिननाथ ! सुरेषु मुद्रा ॥ ३

चित्ते चिराय यदि देवमन(व?) स्थितोऽसि
शुद्धस्तदस्य भवतैव विधेर्विधेया ।
अस्मिन् रजः कथमुपैतु कथं तमो वा
को वा परः प्रविशतु स्वनिवासकांक्षी ॥ ४

त्वां क्षीणकिल्बिषमपास्य शिवार्थिनो ये
देव ! श्रयन्ति परमुल्बणमोहमग्नाः ।
त्यक्त्वा द्रुमं दिविषदां निजकामिताप्त्यै
जाल्माः करीरविपिनं खलु ते भजन्ते ॥ ५

यस्मिन् चिरं परिणते शमदर्शनानि
स्वादाय झांकृत इवाविषमोदकानि ।
दुर्वासनाविषविकारविनाशनाय
तस्मै नमस्तव जिनेश्वर ! शासनाय ॥ ६

कण्ठीरव-ज्वलन-सिन्धुर-दन्दशूक-
नीराकर प्रध(घ)न बन्धन रोगजन्मा(न्म) ।
त्वन्नाममन्त्रजपतः प्रलयं प्रयाति
स्वामिन् ! भयं तम इवांऽशुमतः प्रतापात् ॥ ७

अद्याऽङ्गणे सुरतरुः फलितो ममोच्चै-
श्चिन्तामणिः करतले स्थिरतां ततान ।
अद्य स्फुटद्युतिरलभ्यत कामकुम्भो
दृष्टोऽसि देव ! यदवद्यपरिक्षयेण ॥ ८

ऐश्वर्यमिन्दुनिकरैरुपबृंहणीयं
योगश्च योगिभिरतिस्पृहणीयवर्त्मा ।
एतद् द्वयं कथमहो ! घटनामियर्त्ति
स्वामिंस्त्वयीति भृशमद्भुतमेदुराः स्मः ॥ ९

त्रैलोक्यलोचनचकोरकशीतभासे
सज्ज्ञाननाम्बुरुहभासनतिग्मभासे ।
आसेविताय सुरदानवमानवेन्द्रै-
स्तुभ्यं नमः शमरसामृतभाजनाय ॥ १०

इत्थं स्तुतः प्रणतसर्वसुपर्वनाथः
प्रौढप्रसिद्धमहिमेह सुपार्श्वनाथः ।
उद्बुद्धबोधतरुकारणबोधिबीजां
सद्यो यशोविजयसम्पदमातनोतु ॥ ११

मुनिप्रवर श्री विनयहंसगणिविरचितम्

## ३३. ॥ श्रीमण्डपाचलमण्डन-सुपार्श्वेश्वरवर्णनस्तोत्रम्

(भुजङ्गप्रयात)

जयानन्द सम्पत्पदा पूर्वचिन्ता-
मणिं मण्डपाहार्यवर्यप्रतिष्ठम् ।
जगज्जाग्रदुग्रप्रभावावतारं
जिनं श्रीसुपार्श्वं सुपार्श्वं श्रयेऽहम् ॥ १

सदानन्तसम्पत्प्रदं जात्यरत्नं
स्वयं दर्शनं केन भव्या लभन्ते ।
यदङ्गाङ्घ्रिपूजां विभाव्यानुभावैः
स देयान्मुदं मेऽधिपः श्रीसुपार्श्वः ॥ २

प्रभो पादपद्मद्वयीहाक्षयाभा-
भयासङ्ख्यसौख्यैकखानिर्नृणान्ते ।
भवाम्भोधिपारप्रदा स्वर्मणीजा-
कृतिः सारपूर्णावतीर्णा तरीव ॥ ३

जगद्दुर्गतत्वेन देवो द्रुतं य-
त्तदिष्टार्थवत्कर्त्तुमिष्टेंऽह्रियुग्मम् ।
तवैवेव किं कल्पितं कल्पसारै-
र्दलैः सृष्टिकालेऽन्यथेदृग् कथं तत् ॥ ४

व्रतस्वीकृतौ ते करस्पर्शमापन्-
मुदा यः स्वमौलौ स लेभे सुलब्धिम् ।

न किं नाथ ! सद्मेव सिद्धिश्रियां सः
शयः सिद्ध एवान्यथा ज्ञः कथं स्यात् ॥ ५

नखप्रेङ्खदंशूपविद्धः शयस्ते-
न तं यच्छिरःस्पर्शदीश ! प्रशस्यः ।
स एवोत्तमः सुश्रियां सद्मनीवा-
वतीर्णास्तमोहाः प्रकाशाय दीपाः ॥ ६

कियत् स्तौमि ते केवलज्ञानरूपं
हृदिस्थं जगद्भावसौख्यप्रकाशम् ।
यदद्यापि जागर्ति नेतस्त्रिलोक्या-
मिवापूर्वभानूदयः किं सदासीत् ॥ ७

तवास्यं प्रशस्यं प्रभो ! विश्वतापा-
पहं कस्य न स्यात् सुखावश्यसर्गम् ।
सुदृष्टं कृतेष्टं च नित्योदयश्री-
रिवालक्ष्मणः पार्वणेन्दुस्त्रिलोके ॥ ८

सदानन्दसन्दोहदे लोचने ते-
ऽधिप प्राणितां पाप हे सूः प्रशस्ते ।
इवैते सुधापूरपूर्णैककुण्डे
जगन्मृत्युजन्मादितापोपशान्त्यै ॥ ९

प्रभो ! भ्रूयुगं ते नतानिष्टसृष्टि-
प्रणाशप्रतिज्ञं कथं स्यान्न दृष्टम् ।
जितोन्नष्टमारस्य भीविभ्रमाभ्यां
कराभ्यां पपातेव चापद्वयं किम् ॥ १०

कलाकल्पितानल्पलीलं ललाटं
तवालङ्करिष्णूचितं विश्वमीश ! ।
जगत्पिण्डितैश्वर्यभोगस्य भाग्या-
धिपस्येव खेलालया चित्रशाला ॥ ११

फणाटोपरोपस्तवास्तीश ! मौलौ
न कस्य श्रिये भक्तभव्याङ्गभाजः ।
किमुद्वोढुमाढौकते मण्डपोऽसा-
विवाशेषशर्मश्रियामुत्सुकानाम् ॥ १२

वपुस्तेऽभवत् पुद्गलैर्यैः सुपार्श्व !
क्षमावीर्य संवित्सुखानन्त्यबद्धाः ।
सदासुर्ध्रुवं तेऽन्यथैकान्तचित्ता-
स्तदाराधनेऽभीष्टपुष्टाः कथं स्युः ॥ १३

सुपार्श्व ! त्वमेवासि सम्पत्सुपार्श्वं
यतस्तेन सान्वर्थगोत्रं पवित्रम् ।
तवैवाविरासीत्त्रिलोक्यां समस्त-
प्रशस्तेष्टदं किं श्रितानां सुपार्श्वम् ॥ १४

सदा स्वस्तरुस्त्वं श्रितानां सुपार्श्व !
श्रितोऽस्मीत्यहं त्वां ततः पूरयेश ! ।
मदिष्टानि पुष्टानि नाथे समर्थे
न कां कां लभेत स्वभृत्यप्रतिष्ठाम् ॥ १५

महामण्डपग्रावसन्मण्डन ! त्वं
स्वयं वर्त्तसे यद्यनोरस्यवश्यम् ।

सदा तत्र नित्योदयश्रीं कथं न
द्युपत्यंशुयोगे कुतः स्युस्तमांसि ॥ १६

सुपार्श्वप्रभावानुभावेन भव्या
भवेयुर्भवद्भूरिभोगोपभोगाः ।
तवासङ्ख्यसौख्यायुषो यत्सुयुक्तं
यतोऽसि त्रिलोकैककचिन्तामणिस्त्वम् ॥ १७

जगद्देवदेवोऽसि सत्यं यतस्त्वं
जिनाष्टादशादीनवादुष्टशिष्टः ।
सदादेशभेदो दिनैः सप्तभङ्गै-
र्वचस्ते पराबाध्य साध्यं च सिद्धम् ॥ १८

भवद्गोत्रमन्त्रः शिवश्रेणिकोशः
सुधन्वन्तरिः शन्निधिः सद्विधिश्रीः ।
सुपार्श्वं श्रियां स्वस्तरुर्विश्वनेतः
सदानन्दसन्दोहसम्पत्पदाप्तिः ॥ १९

सुपार्श्वस्तुतोऽपीक्षितोऽपि श्रुतोऽप्य-
र्चितोऽपि प्रभूतप्रभावं स्वसंस्थम् ।
यथेच्छं प्रयच्छेर्नृणां साम्प्रतं तत्
प्रदत्ते यतः सुप्रभुः स्वप्रभुत्वम् ॥ २०

एवं भक्तिसुयुक्तितः स्तुतिरतस्वान्तस्य मे स्याद् द्रुता,-
नन्दास्वादरसार्णवं गुणगणाकीर्णं सुपार्श्वप्रभो ! ।
विद्यातत्त्वनिधानहर्षविनयश्रीसूरिपूज्योदयं
बोधिं वर्द्धय धर्महंस ललनाम्भोजं जयश्रीकरम् ॥(शा.वि.)२१

# ३४. ॥ श्रीसुपार्श्वनाथस्तवनम् ॥

(द्रुतविलम्बित)

भुवनमोहनरूपमनोहरं, हसितकाशविकासियशोभरम् ।
स्मरपराभवभङ्गमहेश्वरं, भज सुपार्श्वजिनं जगदीश्वरम् ॥ १

नगर-खानपुराऽवनिमण्डनं, सबलमोहमहाबलखण्डनम् ।
पदतलानतनैकजनेश्वरं, भज सुपार्श्वजिनं जगदीश्वरम् ॥ २

सकलभूतलभावविभासनं, निजकलादलिताऽखिलशासनम् ।
शिवनिवासविलासविकस्वरं, भज सुपार्श्वजिनं जगदीश्वरम् ॥३

गुणमणीगुणरोहणभूधरं, सुगतिगञ्जितवासवसिन्धुरम् ।
सरसशुद्धसुधामधुरस्वरं, भज सुपार्श्वजिनं जगदीश्वरम् ॥ ४

प्रकटपञ्चफणामणिभूषणं, सपदि दूरनिवारितदूषणम् ।
विषमतामसनाशदिनेश्वरं, भज सुपार्श्वजिनं जगदीश्वरम् ॥ ५

इति कविस्तुतिसद्गतिगोचरं, विजयतो भयतोयधितारकम् ।
प्रहित एष विशेषहितावहः, सृजतु सप्तमतीर्थपतिः सुखम् ॥६

पू.आ. श्री जयतिलकसूरिविरचितम्

## ३५. ॥ श्रीचन्द्रप्रभजिनस्तवनम् ॥

यस्याऽमरा न विदधुर्नतिमङ्घ्रिपीठ-
सङ्घट्टलम्पटललालतटीभृतोऽपि ।
रूपे क्षणक्षणवियोगमहाभयेन
चन्द्रप्रभः प्रभुरसौ तनुताच्छिवं वः ॥ (वसन्ततिलका) १

चन्द्राङ्कश्चन्द्रमूर्तिर्वदनजितशरच्चन्द्रमाश्चन्द्रदाता
माया कण्ठेऽर्धचन्द्रः स्मरशबरहतावर्धचन्द्रश्च बाणः ।
जातश्चन्द्राननायां पुरि शिवपुरगाचन्द्रकश्चन्द्रकीर्ति-
र्देवश्चन्द्रप्रभोऽव्यात् कलिमलविलये चन्द्रवच्चन्द्रलक्ष्या ॥ २
(स्रग्धरा)

दृष्टोऽपि हृष्टजनलोचनचन्द्रकान्ति-
मश्रान्तमान्तरजलाविलमादधानः ।
चन्द्रप्रभो जयतु चन्द्र इवेश ! मित्रं
चित्रं पुनः शुभशताय यदष्टमोऽपि ॥ (वसन्ततिलका) ३

नाशिक्यनामनि पुरे च सुरेन्द्रवन्द्यः
कुन्त्याः सुतैः सह तया सतताभिवन्द्यः ।
चन्द्रप्रभः प्रभुरसौ शिवसौख्यहेतुः
सञ्जायतां तनुमतां भववार्धिसेतुः ॥ (वसन्ततिलका) ४

शशाङ्कलक्ष्मा सकलर्द्धिहेतुर्विभूतिमान् सर्वगदापहारी ।
जिनेश्वरो वः श्रियमातनोतु प्रभासनाथोऽधिकमष्टमूर्तिः ॥ ५
(उपेन्द्रवज्रा)

पू.आ. श्री जयतिलकसूरिविरचितम्

## ३६. ॥ श्रीचन्द्रप्रभस्वामिस्तवनम् ॥

(वसन्ततिलका)

नम्राऽमरेन्द्रगणमौलिवतंसहंस-
संसेविताऽह्रिकमलं कमलानिवासम् ।
चन्द्रप्रभं सकलचन्द्रमरीचिगौरं
सम्यग् प्रणम्य तनुधीस्तमहं स्तवीमि ॥ १

भव्याङ्गिलोचनचकोरकचन्द्ररोचिः
क्वाऽयं जिनेश्वर ! तव स्तव एष भव्यः ।
मिथ्याऽभिवादघनदूषणदूषिताश्च
क्वेयं मदीयरसना स्तवनैकलोला ॥ २

यः स्वाङ्गुलीभिरभिवक्ति नभःप्रमाणं
ताराऽध्वतारकततेर्गणितं करोति ।
आख्याति यो जलनिधेर्जलबिन्दुसङ्ख्यां
सोऽपि प्रभुर्न तव संस्तवने जिनेश ! ॥ ३

यन्मन्दधीरहमिदं स्तवने प्रवृत्त-
स्तत्कारणं जिनपते ! तव चारुभक्तिः ।
यत्कोकिला वचति कर्णसुधासमानं
जानामि वल्गितमिदं मधुमाधवस्य ॥ ४

त्वत्कीर्त्तनादुदयते पुरुषस्य भाग्यं
त्वत्कीर्त्तनादुदयति प्रबलः प्रतापः ।
त्वत्कीर्त्तनात् शिवमुखं भविनामुदेत्यु-
दीयन्त एव हि नरास्तव कीर्त्तनाच्च ॥ ५

पाणौ तवेश ! शुभति स्फुटविद्रुमश्री
संशोभते च शशिबिम्बमिवाऽऽननं ते ।
बाहुश्च शुम्भति सदा प्रबलस्त्वदीयः
पापं निशुम्भति जनस्य तवैष कण्ठः ॥ ६

पुण्यं प्रसौति तव पादनतिर्जनानां
सेवा तव प्रसवति प्रभुतां पृथिव्याः ।
स्वर्मोक्षसौख्यमपि ते स्तवनं प्रसूते
किं न प्रसूयत इतो भवतोऽतिरम्यम् ॥ ७

क्रोधं वृणक्ति किल मारबलं विनक्ति
वैरं च वर्जयति वर्जति दुःखराशिम् ।
धर्मे नियोजयति योजति च प्रभुत्वे
पूजा तव क्रमयुगस्य शिवे नियुङ्क्ते ॥ ८

त्वत्पादपङ्कजरजो महति स्वभक्त्या
योऽसौ महीयत इह त्रिषु विष्टपेषु ।
पुष्पोच्चयैर्महयति क्रमपङ्कजं यः
कीर्त्तिश्च तस्य विमला भुवि मंहते च ॥ ९

तावत्कषायकरिणः परिगाजयन्ति
तावद्गजन्ति च कुवादिगजाः प्रकामम् ।
तावच्च गर्जयति मोहमहाकरीन्द्रो
यावच्च गर्जति न ते समयो मृगेन्द्रः ॥ १०

त्वद्वन्दनेन परिबर्हति पुण्यराशिः
पापं निबर्हयति नाथ ! भवत्प्रतापः ।

त्वद्भक्तिरेव घनकर्म निबर्हते च
मोहं प्रबल्हत इहाऽऽशु तव प्रसादः ॥ ११

धूनोति शत्रुनिवहं मदनं धुनोति
पापं धुनाति धुवति प्रबलं कुकर्म ।
मोहं विधूनयति धर्मधनैकचौरं
क्रोधं भवांश्च धवति प्रसभं नतस्य ॥ १२

जीवान् पृणाति पृणति त्रिजगन्मनांसि
प्रीणाति भव्यहृदयं प्रियते च नेत्रम् ।
सम्प्रीणयत्यपि च मां भवदीयमाऽऽस्यं
चेतः पृणोति जगतस्त्वयि विश्वपूज्ये ॥ १३

आज्ञां पिपर्त्ति शिरसा जिन ! तावकीयां
यः पारयत्यभिमतं तव धर्ममेतम् ।
तस्याऽपि पूरयति नाथ ! भवांश्च कामान्
सम्पूर्यते च सकलां खलु तस्य वाञ्छाम् ॥ १४

क्षीणाति पापमशुभं क्षयतीह कर्म
निक्षायति क्षियति नो सुखसंलवोऽपि ।
न क्षीयते क्षितितले शुभकर्मलक्ष्मी-
र्दृष्टे त्वयि त्रिजगतीपतिमौलिरत्ने ॥ १५

पुष्णाति पुण्यमिह पोषति सद्यशांसि
कीर्त्तिं च पुष्यति जने तव नाममन्त्रः ।
यस्त्वां तु पोषयति चेतसि सर्वकालं
तस्यैव पूषति भुविं प्रबलः प्रतापः ॥ १६

नो जूर्यते सुखफलं न जृणाति शक्ति-
र्ज्ञानं च नो जरति जारयतीह नाङ्गम् ।
पुण्यं न जीर्यति जिनाति न तस्य तेजो
यस्य प्रसीदति तवांऽह्रियुगं जिनेश ! ॥ १७

स ग्राथयत्यविरतं खलु धर्मशास्त्रं
श्लोकांश्च ग्रन्थयति च ग्रथति श्रुतौघम् ।
ग्रथ्नाति काव्यमिह ग्रन्थति नाटकं च
न ग्रन्थते क्वचिदपि त्वयि यस्य भक्तिः ॥ १८

प्रीणाति मुक्तिकमलां कमलां (सुकला) वृणीते
लक्ष्मीं वृणाति वरयत्यपि सौख्यलक्षम् ।
पापं निवारयति खं यशसा वृणोति
प्रीतिं वरत्यनिशमेव नरो नमंस्त्वाम् ॥ १९

मोहं कृणाति भवसिन्धुभयं कृणोति
क्षुभ्नाति नो परभयेन भवत्प्रभावः ।
न क्षोभते तव मनोऽमरसुन्दरीभि-
र्न क्षुभ्यते तव जिनेश्वर ! सेवकोऽपि ॥ २०

यो लक्षते तव वचो न मनोऽभिरामं
सत्यं स लक्षयति तत् किमकृत्यकृत्यम् ।
सूक्ष्माऽर्थसाऽर्थमथ लक्षयतीह यः स
आशंसते सपदि मुक्तिपदं स भव्यः ॥ २१

रोषं वितानयति नो वितनोति दोषान्
भक्तिं च नो वितनति त्वयि विश्वपूज्ये ।

नो कर्म मुञ्चति न मोचयति भ्रमोऽपि
नैःस्व्यं न मोक्षयति तस्य कदापि पृष्ठम् ॥ २२

नीरेण मार्ष्टि पयसाऽपि च मार्जतीह
पञ्चामृतेन जिन ! मार्जयति त्वदङ्गम् ।
उत्कण्ठते य इह ते स्तवने स भव्य
उत्कण्ठयत्यविरतं तव पूजने च ॥ २३

दीदांसते रिपुकुलं दुरितं समग्रं
शक्त्याऽवदानयति यच्छति च प्रमोदम् ।
चौरांश्च धर्षयति धर्षति दुष्टमन्त्रान्
धृष्णोति चेतसि नमस्यति यः प्रभो ! त्वाम् ॥ २४

श्रद्धा प्रवर्द्धयति यस्य तवांऽह्रिभक्तौ
शं वर्द्धतेऽस्य किल वर्द्धयति द्विषं सः ।
यः शीकते निजशिरस्तव पादनीरै-
स्तं शीकयन्ति सुचिरं खलु पुण्यमेघाः ॥ २५

खेलायति क्रमयुगं तव यस्य चित्ते
खेलन्ति तेन सरसाः सुरयोषितोऽपि ।
सिंहो न कौति कवते न च दुष्टदन्ती
तं वीक्ष्य यो हि कुवते तव कीर्त्तिकाव्यम् ॥ २६

नेनेक्ति यस्तव पदौ च शिरः पृणक्ति
नित्यं च धूपयति धूपघटीभिरस्य ।
विश्वेऽभिधावति यशोदधिपिण्डपाण्डु
ख्यातिश्च धावति धवन्ति च साधुवादः ॥ २७

त्वां बोधते(य) स इह बोधति विश्वतत्त्वं
यो बुद्ध्यतेऽर्चयति ते पदपङ्कजं सः ।
तं चाऽर्चते सुरगणोऽर्चति मानवोऽपि
त्वय्यद्भुतं स्फुरति नो भुवनेऽत्र किं किम् ? ॥ २८

योऽत्राऽनुमीमति जिनेश ! तव स्वरूपं
मुक्तेः स्वरूपमिह चाऽप्यनुमीयते यः ।
सूक्ष्माऽतिसूक्ष्ममनुमापयति स्फुटं य-
त्तत् स्फूर्जितं हि तव दर्शनतश्च तस्य ॥ २९

त्वन्मन्दिरे व्यययति द्रविणं प्रभूतं
यो व्याययत्यभिनवं कनकं च सोऽपि ।
दोषान् हिनस्ति किल हिंसयति प्रकोपं
हिंसत्यघं भवशतार्जितकर्म हन्ति ॥ ३०

विघ्नान् विलोटयति लोटति दुर्यशोऽपि
पापं लुठत्यतनु (नघ)मर्जति पुण्यराशिम् ।
शक्त्याऽर्जते सुकृतमर्जयति क्षमां स
त्वच्छासने जिनपति ! रमते जनो यः ॥ ३१

नो गाधते मम मतिर्द्रविणे कदाचित्
नो गृद्ध्यति स्त्रियमिमामभिरामरूपाम् ।
त्वच्छासनं भवमहार्णवपोतकल्पं
तद्गर्द्धयन्ति सततं मम चित्तभावाः ॥ ३२

भोगान्न मार्गयति मार्गति नोपभोगान्
राज्यं च नो मृगयते मृगयत्युपायम् ।

मौक्षैकसौख्यनिकराय मनो ममेदं
तत्त्वं प्रसीद करुणारसमेहि देहि ॥ ३३

यः शुन्धते निजमनस्तव संस्तवेन
यः शुन्धयत्यपि दृशौ तव दर्शनेन ।
यः शुन्धति क्रमयुगं प्रणिपत्य भालं
सत्यं स शुद्ध्यति नरो बहिरन्तरोऽपि ॥ ३४

त्रिभुवनजनरत्नं सूरिरत्नाकराह्वा-
दभवदभयसिंहः सूरिराजस्ततोऽपि ।
जयतिलक इह श्रीसूरिरस्याऽपि शिष्यः
स्तवनमिह तनोति व्यक्तभक्तिप्रयुक्तः ॥ (मालिनी) ३५

इतिक्रियाऽऽभासमयस्तवेन स्तुत्वाऽष्टमं तीर्थपतिं मयाऽद्य ।
यदर्जितं पुण्यमगण्यभावात्तदेव भूयाद् भविनां शिवाय ॥ ३६
(उपेन्द्रवज्रा)

पू.आ.श्री हेमचन्द्रसूरिविरचितः
केवलज्ञानप्राप्त्यनन्तरं शक्रेन्द्रसन्दृब्धः

## ३७. ॥ श्रीचन्द्रप्रभ-जिनस्तवः ॥

(अनुष्टुप्)

सुरासुरनरैर्मूर्ध्नि, धार्यमाणमिदं प्रभो ! ।
शासनं ते विजयते, त्रिलोकीचक्रवर्तिनः ॥ १

ज्ञानत्रयधरः पूर्वं, मनःपर्ययभृत्ततः ।
केवली चाऽधुना दिष्ट्या, दृष्टस्त्वमधिकाऽधिकम् ॥ २

तव ज्ञानमिदं नाथ !, केवलाऽभिधमुज्ज्वलम् ।
विश्वोपकारकृज्जीया-च्छाया मार्गतरोरिव ॥ ३

तावदेवाऽन्धकाराणि, न यावद्दिवसेश्वरः ।
मदाऽन्धास्तावदेवेभा, यावत्पञ्चाननो न हि ॥ ४

तावदेव हि दारिद्र्यं, न यावत्कल्पपादपः ।
तावदेव पयोदौस्थ्यं, न यावद्वार्षुकोऽम्बुदः ॥ ५

तावद्दिवससन्तापो, न यावत्पूर्णचन्द्रमाः ।
कुबोधास्तावदेवेह, न यावत्त्वं निरीक्ष्यसे ॥ ६

दृश्यसे नित्यमपि यैः, सेव्यसे च शरीरिभिः ।
ताननुमोदयामीश !, सर्वदाऽपि प्रमद्वरः ॥ ७

इदानीं त्वत्प्रसादेन, त्वद्दर्शनफलं मम ।
सम्यक्त्वमुत्तममिदं, भूयादाऽऽजन्मनिश्चलम् ॥ ८

पू.मु. श्री आनन्दवल्लभविजयविरचितम्

## ३८. ॥ कोटारामपूरमण्डन-श्रीचन्द्रप्रभजिनाष्टकम् ॥

(उपजाति)

सुमेरुसन्मौलिकृताभिषेककं, देवाधिदेवं गतकल्मषं सदा ।
सुभूरिभक्त्या विहितार्यपूजनं,
चन्द्रप्रभं नौमि जिनं सनातनम् ॥ १

अज्ञानसुप्तेषु जनेषु पूषणं, कन्दर्पदावानलशान्तिकारिणम् ।
अनिष्टकर्मारिविनाशकारकं, चन्द्रप्रभं नौमि जिनं सनातनम्॥२

सच्चैत्रमासे सितपञ्चमीतिथौ, सुवैजयन्ताच्च्युतमायुषः क्षये ।
सुलक्ष्मणाऽपत्यमनन्ततेजसं, चन्द्रप्रभं नौमि जिनं सनातनम्॥३

सुपोषमासे सितपक्षके मुदा, सद्द्वादशीकृष्णतिथिप्रसूतिकम् ।
चन्द्रावतीस्वामिमहेशनन्दनं, चन्द्रप्रभं नौमि जिनं सनातनम् ॥४

त्रयोदशीकृष्णदले मनोहरे पौषस्य सञ्जातयमाभिलाषकम् ।
सन्त्यक्तराज्यादिपदार्थमण्डलं,
चन्द्रप्रभं नौमि जिनं सनातनम् ॥ ५

शुक्लेतरायां शुभसप्तमीतिथावनुत्तरे फाल्गुनमासि सत्तमे ।
सञ्जातसर्वोत्तमकेवलं वरं, चन्द्रप्रभं नौमि जिनं सनातनम् ॥६

वरेण्यभाद्रस्य च सप्तमीतिथौ, सितेतरायां वृतमोक्षसत्पदम् ।
ज्ञानत्रयीरूपमनन्तकेवलं, चन्द्रप्रभं नौमि जिनं सनातनम् ॥७

अखण्डकान्तिं गतमोहबन्धनं, निरामयं निर्जितकर्मपेटकम् ।
अनन्तरूपं गतभावबन्धनं, चन्द्रप्रभं नौमि जिनं सनातनम् ॥८

(अनुष्टुप्)

वेदाब्धि-वसु-सिध्यब्दे(१८७४), वैशाखे मासि शोभने ।
शुक्लाष्टम्यां गुरौ वारे, पुष्यनक्षत्रसंयुते ॥ ९

कोटारामपूरे वर्ये, चन्द्रप्रभजिनाधिपः ।
वाचनाचार्यवर्यस्य, रामचन्द्रगणीशितुः ॥ १०

आनन्दवल्लभेनाऽयं, शिष्येणात्महितेच्छया ।
जिनालयप्रतिष्ठायां, संस्तुतो जिननायकः ॥ ११

पू.मु. श्री हरिचन्द्रविरचितम्

## ३९. ॥ श्रीचन्द्रप्रभजिनस्तवनम् ॥

(पादाकुलकम्)

श्रीमहासेननृपाङ्गज ! नाथ !, श्रेयोवनराजीघनपाथ ! ।
जनतालोचनशीतगभस्ते, चन्द्रप्रभजिनचन्द्र ! नमस्ते ॥ १

चन्द्रसमुज्ज्वलनिर्मलकाय !, प्रणतप्राणिहतापदपाय ! ।
संसारोदध्योदगभस्ते चन्द्रप्रभजिनचन्द्र ! नमस्ते ॥ २

शान्तसुधारसपूरितनेत्र ! ध्वस्तोपमलावण्यजनेत्र ! ।
खेचरसुरनरकृतसमुपास्ते !, चन्द्रप्रभजिनचन्द्र ! नमस्ते ॥ ३

दुःखदावानलनीरदनीर ! क्षीरसमुद्रादपि गम्भीर ! ।
हेलाकृतकेवलसमुदास्ते ! चन्द्रप्रभजिनचन्द्र ! नमस्ते ॥ ४

आराधकजनविहितानन्द ! द्रागुन्मूलितभवतरुकन्द ! ।
निर्मितमन्मथमोहनिरस्ते, चन्द्रप्रभजिनचन्द्र ! नमस्ते ॥ ५

कृतपद्मासनसंस्थितदेह ! स्फारसदतिशयकमलागेह ! ।
दत्तसमस्तसुजन्त्वनुशास्ते ! चन्द्रप्रभजिनचन्द्र ! नमस्ते ॥ ६

सद्वैराग्यविनिर्जितराग ! द्वेषमहीरुहभञ्जनलाघ ! ।
मासादितहीनाशगभस्ते ! चन्द्रप्रभजिनचन्द्र ! नमस्ते ॥ ७

अष्टमहासिद्ध्यम्बुजशूर ! प्राणिवितीर्णमनोर्थितपूर ! ।
पुण्यैर्लभ्यलसत्पदुपास्ते !चन्द्रप्रभजिनचन्द्र ! नमस्ते ॥ ८

इत्थं षट् पुरमण्डनस्त्रिजगतां विघ्नावलीखण्डनः
सद्भक्त्या हरिचन्द्रसाधुविनुतः किञ्चिन्मया संस्तुतः ।

पुण्याख्यद्रुमचारुनन्दनवनः श्रीलक्ष्मणानन्दन-,
श्चन्द्राङ्कः प्रभुरेष चन्द्रवदनश्चन्द्रप्रभोस्तु श्रिये ॥ (शा.वि.) ९

## ४०. ॥ श्रीचन्द्रप्रभस्वामिस्तोत्रम् ॥

(अनुष्टुप्)

ॐ चन्द्रप्रभ प्रभाधीश, चन्द्रशेखर चन्द्रभूः ।
चन्द्रलक्ष्माङ्कचन्द्राङ्क, चन्द्रबीज नमोऽस्तु ते ॥ १

ॐ ह्रीँ श्रीँ अर्हं चन्द्रप्रभः श्रीँ ह्रीँ कुरु कुरु स्वाहा ।
इष्टसिद्धि-महासिद्धि-तुष्टिपुष्टिकरो भव ॥ २

द्वादशसहस्रजप्तो, वाञ्छितार्थफलप्रदः ।
महितस्त्रि(त्वा त्रि)सन्ध्यं जपो, सर्वाधिव्याधिनाशनः ॥ ३

सुरासुरेन्द्रमहितः, श्रीपाण्डवनृपस्तुतः ।
श्रीचन्द्रप्रभतीर्थेशः, श्रियं चन्द्रोज्ज्वलां कुरु ॥ ४

श्रीचन्द्रप्रभविद्येयं, स्मृता सद्यः फला मता ।
सर्वाधिव्याधिविध्वंस कारिणी मे वरप्रदा ॥ ५

पू.आ. श्री जिनप्रभसूरिविरचितम्

मौक्तिकदामादिवृत्तबद्ध-(षड्भाषामयम्)

## ४१. ॥ श्रीचन्द्रप्रभस्वामिस्तवनम् ॥

॥ संस्कृतं ॥

नमो महसेननरेन्द्रतनूज ! जगज्जनलोचनभृङ्गसरोज ! ।
शरद्भवसोमसमद्युतिकाय ! दयामय ! तुभ्यमनन्तसुखाय ॥ १
(मौक्तिक दाम)

सुखीकृतसादरसेवकलक्ष ! विनिर्जितदुर्जयभावविपक्ष ! ।
सुरासुरवृन्दनमस्कृत ! नन्द महोदय कल्पमहीरुहकन्द ! ॥ २
(मौक्तिक दाम)

॥ प्राकृतं ॥

जय निरसिय ! तिहुयणजंतुभंति जय ! मोहमहीरुहदलनदंति ।
जय कुंदकलीसमदंतपंति ! जय जय चंदप्पह ! चंदकंति ! ॥३

जय पणयपाणिगणकप्परुक्ख !
जय जगडियपयडकसायपक्ख ! ।
जय निम्मलकेवलनाणगेह ! जय जय जिणिंद ! अप्पडिमदेह !॥४

॥ शौरसेनी ॥

विगददुहहेदु–मोहारिकेदूदयं दलिद–
गुरुदुरिदमद विहदकुमदक्खयं ।
नाध ! तं नमदि जो सददनदवच्छलं–
लहदि निव्वुदि गदिं सो ददं निम्मलं ॥ ५

॥ मागधी ॥

असुलसुलविसलनललाय–सेविदपदे
नमिल–जयजंतुतुदि–दिन्नसिवपुलपदे ।
चलनपुलनिलद–संसालिसलसीलुहे,
देहि मह शामि तुं शालि शासदपदे ॥ ६

॥ पैशाचिकं ॥

तलिताखिलतोसतया सततनं मद(त)नानलनीलममानगुणं ।
नलिनारुणपाततलं नमते जिन ! जो इध तं स शिवं लभते ॥७
(तोटक)

## ॥ चूलिका पैशाचिकं ॥

कलनालिकनातुलतप्पहलं ललनीकल-चालुयसप्पसलं ।
ललनाचनकीतकुनं लुचिलं चिनलावमहं समलामि चिलं ॥८
(तोटक)

## ॥। अपभ्रंश ॥

सासयसुक्खनिहाण ! नाह न दिट्ठो जेण तुह
पुन्नविहूणो जाणु निप्फलजम्मु तिह नरपसुह ॥ ९

निम्मल तुह मुहचंदु जे पहुपिक्खइ पससिरई
ईय निरुवमआणंदु तिह मन सामी विप्फुरइ ॥ १०

## ॥ द्वयं समसंस्कृतं ॥

हारिहारहरहासकुन्दसुन्दरदेहमय !
केवलकमलाकेलिनिलय ! मञ्जुलगुणगणमय ! ।
कमलारुणकरचरण ! भरधरणधवलबल !
सिद्धिरमणिसंगमविलासलालस ! मलवदलं ॥ ११

भवदवनवजलवाह ! विमलमङ्गलकुलमन्दिर !
वामकामकलकेलिहरणहर ! वरगुणबन्धुर ! ।
मन्दरगिरीगुरुसार ! सबलकरभूरुहकुञ्जर !
देहि महोदयमेव देव ! मम केवलिकुञ्जर ! ॥ १२

इति जगदभिनन्दन ! जनहृदि नन्दन ! चन्द्रप्रभजिनचन्द्रवर ! ।
षड्भाषाभिष्टुत मम मङ्गलयुत ! सिद्धिसुखानि विभो ! वितर॥१३

पू.आ.श्री जिनप्रभसूरिविरचितम्

# ४२. ॥ श्रीचन्द्रप्रभजिन-स्तोत्रम् ॥

(आर्या)

चंदप्पह ! चंदप्पह !, पणमिय चरणारविंदजुयलं ते ।
भविय सवणामयपवं भणामि तुह चेव चरियलवं ॥ १

धायइसंडे दीवे अहेसि तं मंगलावईविजए ।
मुणिरयण ! रयणसंचयपुरम्मि सिरिपउमनरनाहो ॥ २

सुगुरुजुगंधरपासे निक्खमिउ चिणिय तित्थयरनामं ।
तुममुप्पन्नो पुन्ननिहि ! वेजयंते विमाणम्मि ॥ ३

तत्तो इह भरहद्धे चविउं चंदाणणाइ नयरीए ।
महसेनराय-पणयिणि-लक्खणदेवीइ कुच्छंसि ॥ ४

चित्ताऽसियपंचमि निसि तं चउदससुमिणसूइओ नाह ! ।
अवयरिओ तिन्नाणी सयलिंदनिवेइयवयारो ॥ ५

पोसाऽसियबारसि निसि विच्छियरासिंमि सामि ! सोमंको ।
कासवगुत्ते जाओ तं सारयससहरच्छाओ ॥ ६

छप्पन्नदिसाकुमारी-चउसट्ठि-सुरिंदविहियसक्कारो ।
उज्जोइय-भुवणयलो तुह जम्ममहो य सक्कउहो ॥ ७

जणणी पइ गब्भगए अकासि जं चंदपाणदोहलयं ।
चंदप्पहु त्ति तं तुह विक्खायं तिहुयणे नामं ॥ ८

सड्ढधणुसयपमाणो अड्ढाइय पुव्वलक्खकुमरत्तं ।
सड्ढे छपुव्वलक्खे चउवीसंगे य रज्जसिरिं ॥ ९

परिवालिय लोयंतिय-विबोहिओ वरिसकयमहादाणो ।
सिविया मणोरमाए सहसंबवणम्मि छट्टेणं ॥ १०

नरवइसहस्ससहिओ चरमवए चरणमेगदूसेण ।
पोसस्स बहुलतेरसि अवरण्हे ते पवज्जेसि ॥ ११

तक्खणमणनाणजुओ अकासि तं पउमसंडनयरम्मि ।
वयबीयदिणे परमन्न-पारणं सोमदत्तघरे ॥ १२

वोसट्ठचत्ततणुणो नानादेसेसु विहरमाणस्स ।
भयवं ते मासतिगं अहेसि छउमत्थपरियाओ ॥ १३

सहसंबवणे पडिमाठियस्स छट्ठेण नागतरुहिट्ठे ।
तुह फग्गुणाइसत्तमि पुव्वण्हे केवलं जायं ॥ १४

अहसट्ठदुल्लक्खमुणी वीससहस्सूण-लक्खचउ समणी ।
तिनवइ गणा गणहरा अड्ढाइयलक्खवरसड्ढा ॥ १५

इगणवइसहस्सअहिया लक्खा चउरो गुणड्ढसड्ढीणं ।
इय गुणरयणमहग्घो जाओ तुह चउव्विहो संघो ॥ १६

दो-दस-चउदससहसा चउदसपुव्वधर-केवलि-विउव्वी ।
अट्ठसहस्सा पत्तेय-मोहि-मणपज्जवंनाणी ॥ १७

वाईणसत्तसहसा छसयग्गा एस तुब्भ परिवारो ।
तह तुच्छे दुच्छयरा विजओ जक्खो सुरा भिउडी ॥ १८

अणुराहरिक्ख चउकयकल्लाण गएसु चउजमं धम्मं ।
चउवीसंगूण मय पज्जाउपुव्वलक्ख ते ॥ १९

दसपुव्वलक्खसव्वाउ पालिउं मुणिसहस्ससहिओ तं ।
करिउं णवोपगमं मासियभत्तेण सम्मेए ॥ २०

उदहीणं नवकोडी सएसु विगएसु जिणसुपासाओ ।
भद्दवयकसिणसत्तमि सिवं गओ सवणरिक्खम्मि ॥ २१

इय तुह सुचरियलेसं थोऊं पत्थेमि तुममिमं चेव ।
कुण गुणनिहि ! चंदप्पह ! जिणप्पभत्ताण परमपयं ॥ २२

पू.आ.श्री धर्मघोषसूरिविरचितम् ।

## ४३. ॥ श्रीचन्द्रप्रभजिन७भवस्तोत्रम् ॥

महसेणलक्खसुअं चंदपहं चंदचिन्हमिंदुनिहं ।
सत्तभवकित्तणेणं थुणामि सड्ढसयधणुम्माणं ॥ १

सामि ! तुमं आसि निवो पढमभवे सिवपुरंमि सिरिवम्मो ।
बीए सोहम्मसुरो तइअभवे कोसलपुरीए ॥ २

सिरिअजियसेणचक्की चउत्थए अच्चुए महिड्ढिसुरो ।
तह रयणसंचयपुरे पंचमए पउमनाहनिवो ॥ ३

छट्ठंमि विजयंते सत्तमए अट्ठमो जिणवरिंदो ।
चंदाणणापुरीए सिरिचंदप्पहजिणवरिंदो ॥ ४

पोसाइ बारसिभवो तेरसि चउ फग्गुसत्तमी नाणं ।
भद्दवसत्तमि सिवु चित्तपंचमीचवणु चंदपहे ॥ ५

इअससिसधम्मकित्ती देविंदनओ पुओ अ चंदपहो ।
वरविज्जाणंदयरं ठाणं विअरेसु पणयाणं ॥ ६

पू.आ.श्री हेमचन्द्रसूरिविरचितः

केवलज्ञानप्राप्त्यनन्तरं शक्रस्तुतः

## ४४. ॥ श्रीसुविधिनाथ-जिनस्तवः ॥

(अनुष्टुप्)

वीतरागोऽसि चेद्रागः, पाणिपादे कथं तव ? ।
कौटिल्यं च त्वया मुक्तं, किं केशाः कुटिलास्तव ॥ १

प्रजानां यदि गोपस्त्वं, दण्डहस्तोऽसि किं न हि ? ।
निःसङ्गो यदि वाऽसि त्वं, तत्किं त्रैलोक्यनाथता ? ॥ २

यदि त्वं निर्ममस्तत्किं, सर्वत्र करुणापरः ? ।
त्यक्ताऽलङ्करणश्चेत्त्वं, तत्किं रत्नत्रयप्रियः ? ॥ ३

विश्वस्याऽप्यनुकूलश्चेत्, तत्किं मिथ्यादृशां द्विषन् ? ।
स्वभावसरलश्चेत्त्वं, छद्मस्थोऽस्थाः कथं पुरा ? ॥ ४

दयावान्यदि वाऽसि त्वं, न्यग्रहीर्मन्मथं कथम् ।
यदि च त्वं गतभयो, भवाद् भीतोऽसि तत्कथम् ? ॥ ५

यद्युपेक्षापरोऽसि त्वं, तत्किं विश्वोपकारकः ? ।
अदीप्तो यदि वाऽसि त्वं, दीप्तभामण्डलः कथम् ? ॥ ६

यदि शान्तस्वभावस्त्वं, तत्कुतस्तप्तवाँश्चिरम् ? ।
अरोषणोऽसि यदि च, रुषितः कर्मणां कथम् ? ॥ ७

अविज्ञेयस्वरूपाय, महद्भ्योऽपि महीयसे ।
सिद्धाऽनन्तचतुष्काय, तुभ्यं भगवते नमः ॥ ८

पू.आ.श्री कल्याणसागरसूरिविरचितम्

प्रत्येकपादसुविधिनाथनामयुक्तम्

# ४५. ॥ श्रीसुविधिजिनस्तवनम् ॥

(द्रुतविलम्बित)

सुविधिनाथजिनं नयनामृतं सुविधिनाथजिनं महिमालयम् ।
सुविधिनाथजिनं नररञ्जनं सुविधिनाथजिनं वरकेवलम् ॥ १

सुविधिनाथजिनं कमलाकरं सुविधिनाथजिनं भवनाशनम् ।
सुविधिनाथजिनं द्युतिकीर्तिदं सुविधिनाथजिनं सुविधिप्रदम्॥२

सुविधिनाथजिनं रजतच्छविं सुविधिनाथजिनं जडतापहम् ।
सुविधिनाथजिनं मकराङ्कितं सुविधिनाथजिनं जगदर्चितम् ॥३

सुविधिनाथजिनं रजतां हितं सुविधिनाथजिनं परमेश्वरम् ।
सुविधिनाथजिनं श्रुतसूरिणं सुविधिनाथजिनं शिवपरागम् ॥४

सुविधिनाथजिनं शुभदर्शनं सुविधिनाथजिनं जनतानतम् ।
सुविधिनाथजिनं वरदं विभुं सुविधिनाथजिनं नमितासुरम् ॥५

सितेतरपुराधीशः सुविधिर्नवमो जिनः ।
सङ्घस्य सुखदो भूयात् कल्याणसूरिणा स्तुतः ॥(अनुष्टुप्)६

पू.मु.श्री गुणविजयगणिविरचितम्

# ४६. ॥ श्रीद्वीपबन्दिरनवमजिनस्तवनम् ॥

नवमश्रमणपवरममरव्रजपरमशमक्षमसकलवदनकज ! ।
गतमलममदमसमजनगतमन !
भज नरभवभयहरणमचलधन ! ॥ १

ध्वस्तक्षय ! मदमदनशमरकर ! कमलदलप्रभनयनयमलधर !॥
चरणकरणकलवरतरसदन ! भव मकरध्वजपरपददन ! ॥२

मकरध्वजतवपदयममघहरमस्तश्रम ! हस्तद्वयमजकर ! ।
अक्षरपदप्रद ! हतमद ! गतभव ! नवलक्षप्रकटप्रवरस्तव ! ॥३

मतमतमकरध्वजसरलच्छल ! गजशरवक्त्रक्षतमनभवदल ! ।
घनकश्मलजलधरशम ! मम
भवमप्रभहर ! जनवत्सल ! घनरव ! ॥ ४

"मप्रभदमय सबलकलघनरव !" ॥ पाठान्तरम् ॥

अमरक्रमणपशमवनजलधर ! रजतप्रद ! बलवत्तरमहधर ! ।
त्यक्तकलत्रतनयधनभवन ! रचय शमव्यय ! मन्मथमथन !॥ ५

गतभवकपट ! मदनजलधरजल !
पवनसमघमपहर मम घनबल ! ।
अकलजनन-मरणस्मय ! मदगद-
पन्नग ! हलधरसहजचटनपद ! ॥ ६

सच्चरणद्वयजलचरमकर ! प्रमददलक्षणसत्वरहतदर ! ।
भव्यशरण ! रक्षक ! रतदमन !
जय जय मनरममदगलगमन ! ॥ ७

इत्थं गुणेनाऽतिमुदा बुधानामेकस्वराच्चित्रकरस्तवोऽयम् ।
श्रीपुष्पदन्ताख्यजिनेश्वरस्य दृब्धो भवत्वङ्गभृतां शिवाय ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितः
समवसरणभुविशक्रेन्द्रसन्दृब्धः

# ४७. ॥ श्रीशीतलनाथ-जिनस्तवः ॥

(अनुष्टुप्)

त्वत्पादपङ्कजनख-द्युतिजालजलाऽऽप्लवैः ।
स्नायं स्नायं पुनन्ति स्वं, धन्यास्त्रिभुवनेश्वर ! ॥ १

भास्करेणेव गगनं, हंसेनेव महासरः ।
पार्थिवेनेव नगरं, शोभते भारतं त्वया ॥ २

आलोकस्तिमिरेणेव, सूर्यास्तेन्दूदयाऽन्तरे ।
मिथ्यात्त्वेन पराभूतो, धर्मस्तीर्थद्वयाऽन्तरे ॥ ३

जगदन्धमिदं जज्ञे, निर्विवेकविलोचनम् ।
अपथेषु प्रववृते, दिङ्मूढमिव सर्वतः ॥ ४

अधर्मो धर्मबुद्ध्या चाऽ-देवता देवताधिया ।
गुरुबुद्ध्या चाऽगुरवो, भ्रान्तैर्जगृहिरे जनैः ॥ ५

नरकाऽवटपाताय, जगत्यस्मिन्नुपस्थिते ।
निसर्गकरुणाऽम्भोधि-स्तत्पुण्यैस्त्वमवातरः ॥ ६

मिथ्यात्वाऽऽशीविषो लोके, प्रभविष्णुरसौ चिरम् ।
तावदेव न यावत्ते, प्रसरेद्वचनाऽमृतम् ॥ ७

तन्मिथ्यात्त्वाऽपसारेण, सम्यक्त्वं जगतोऽधुना ।
भावि प्रभो ! केवलं ते, घातिकर्मक्षयादिव ॥ ८

पू. मुनि मलूकचन्द्रविरचितम्
चतुर्विंशतिजिननामगर्भितम्

# ४८. ॥ श्रीशीतलनाथाष्टकम् ॥

(द्रुतविलम्बित)

वृषभतुल्यगतिं वृषदं सदा, व्यजितदर्प्पकदर्प्पकभेदकम् ।
अमितशंभवभीतिविवर्जितं, जिनमहं प्रणमामि सुशीतलम् ॥१

द्रढरथाख्यकुभागभिनन्दनं, सुमतिधाम विचक्षणपुङ्गवम् ।
छविविनिर्जितपद्मप्रभं वरं, जिनमहं प्रणमामि सुशीतलम् ॥२

यमसुपार्श्वविभूषितविग्रहं, विशदचन्द्रप्रभाननबन्धुरम् ।
सुविधिरञ्जितभव्यजनव्रजं, जिनमहं प्रणमामि सुशीतलम् ॥३

विबुधमोदकशीतलवाग्भरं, सकलश्रेयसिकामकुटोपमम् ।
सुवसुपूज्यपदं शिवदायकं, जिनमहं प्रणमामि सुशीतलम् ॥४

विमलनीरजपत्रविलोचनं, गृहमनन्तगुणस्य कृपापरम् ।
सदयधर्मप्रवृत्तिप्ररूपकं, जिनमहं प्रणमामि सुशीतलम् ॥ ५

जगति शान्तिवितानविपादकं, धृतशमं किल कुस्थमनिन्दितम्।
विगतदोषभरं भविनौनिभं, जिनमहं प्रणमामि सुशीतलम् ॥६

युगकषायजयप्रतिमल्लभं, कनकवर्णधरं मुनिसुव्रतम् ।
नमत दानवमानवराजितं, जिनमहं प्रणमामि सुशीतलम् ॥ ७

विततधर्मरथाङ्गकनेमिकं, निखिलविष्टपपार्श्वमदूषणम् ।
सबलमोहविनाशनवीरकं, जिनमहं प्रणमामि सुशीतलम् ॥ ८

इति स्तुतः श्रीजिनशीतलाख्यः, स्थितः पुरे रायधनाभिधाने ।
श्रीवीरचन्द्रस्य मलूकचन्द्र, नाम्ना विनेयेन विशां श्रिये स्तात्॥ ९
(उपजाति)

# ४९. ॥ श्रीशीतलजिनस्तोत्रम् ॥

सकल-मङ्गल-केलि-निवेशनं,
सहृदयं हृदयङ्गमदेशनम् ।
अभिनतोत्तम-भक्त-सुरेश्वरं,
नमत शीतलनाथजिनेश्वरम् ॥ (द्रुतविलम्बित) १

सहज-सुन्दर-सद्गुण-मन्दिरं,
विमल-केवल-बोध-विकस्वरम् ।
अति-सुवर्ण-सुवर्ण-समद्युतं,
प्रवर-बन्धुर-लक्षण-संयुतम् ॥ (द्रुतविलम्बित) (यु.) २

यदीय-भक्तिर्भजतां भवे भवे,
भवेदभीष्टार्थ-निदानमद्भुतम् ।
स एव नन्दात्मसमुद्भवो जिनः,
समर्च्चनीयः खलु शीतलः प्रभुः ॥ (वंशस्थ) ३

कर्माभितप्तान् भविनः सुशीतलान्,
कुर्वन्मुदा वाक् सुधया दयापरः ।
स देवदेवो भवतात् सदैव मे,
सदिष्टसिद्ध्यै जिनराज-शीतलः ॥ (उपजाति) ४

अधिगतशिवशर्मा, वीतमोहादिकर्मा,
दृढरथतनुजन्मा, सर्वतः साधुधर्मा ।
त्रिदशमहितमूर्त्तिः स्फूर्त्तिमत्पुण्यकीर्त्तिः
जयतु गतभवार्त्तिः शीतलः सौम्यमूर्त्तिः ॥ (मालिनी) ५

पू.आ.श्री हेमचन्द्रसूरिविरचितः
धर्मदेशनपरिषदि इन्द्रादिभिः स्तुतः

# ५०. ॥ श्रीश्रेयांसनाथ-जिनस्तवः ॥

(अनुष्टुप्)

अमन्दाऽनन्दनिःस्यन्द-दायिने परमेश्वर ! ।
मोक्षकारणभूताय, मोक्षायैव नमोऽस्तु ते ॥ १

तव दर्शनमात्रेऽपि, कर्माण्यन्यानि विस्मरन् ।
आत्मारामी भवेद्देही, किं पुनः श्रुतदेशनः ? ॥ २

क्षीरोदः किमुदीर्णोऽसि, कल्पवृक्षः किमुद्गतः ।
वर्षुकाऽब्दोऽवतीर्णो वा, स्वामिन् ! संसारधन्वनि ॥ ३

पीड्यमानस्य विश्वस्याऽ-सद्ग्रहैः क्रूरकर्मभिः ।
एकादशो जिनेन्द्रस्त्वं, त्राता ज्योतिष्मतां पतिः ॥ ४

त्वयेक्ष्वाकुकुलं नाथ !, निसर्गेणाऽपि निर्मलम् ।
निर्मलीक्रियतेऽत्यन्तं, स्फटिकाऽश्मेव वारिणा ॥ ५

जगत्त्रयस्य निःशेष-सन्तापहरणात् प्रभो ! ।
पादमूलं तवाऽशेष-च्छायाभ्योऽप्यतिरिच्यते ॥ ६

त्वत्पादपद्मयोर्भृङ्गी-भूय सम्प्राप्तसम्मदः ।
नाऽहं भुक्त्यै न वा मुक्त्यै, स्पृहयालुर्जिनेश्वर ! ॥ ७

भवे भवे भवदीयौ, चरणौ शरणं मम ।
अभ्यर्थये जगन्नाथ !, त्वत्सेवा किं न साधयेत् ? ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितः
समवसरणभुवि शक्रद्विपृष्टविजयकृतः

## ५१. ॥ श्रीवासुपूज्यस्वामि-जिनस्तवः ॥

(अनुष्टुप्)

नितान्तभीषणमितः, प्रसृतं मोहदुर्दिनम् ।
प्रतिक्षणमितश्चाशा, वेला इव नवा नवाः ॥ १

महायाद इवेतश्च, दुर्वारो मकरध्वजः ।
इतश्च विषयाः पापाः, प्रौढा दुःपवना इव ॥ २

इतः कषायाः क्रोधाद्या-महावर्ता इवोल्बणाः ।
रागद्वेषादयश्चेतो, नगदन्ता इवोत्कटाः ॥ ३

महोर्मय इवेतश्च, नानादुःखपरम्पराः ।
इतश्चाऽऽर्त्तरौद्रध्यान-मौर्वानल इवोच्चकैः ॥ ४

इतश्च ममता वेत्र-वल्लीव स्खलनाऽस्पदम् ।
इतश्च व्याधयोऽनल्पा, नक्रस्तोमा इवोद्धताः ॥ ५

अस्मिन्नपारे संसारे, पारावारेऽतिदारुणे ।
पतितानुद्धर चिरात्, प्राणिनः परमेश्वर ! ॥ ६

परेषामुपकाराय, केवलज्ञानदर्शने ।
तवेमे त्रिजगन्नाथ !, तरोः पुष्पफले इव ॥ ७

कृतार्थमद्य मे जन्म, कृतार्थो विभवोऽद्य मे ।
कर्तुं लेभे मयाऽयं यत्, त्वत्सपर्यामहोत्सवः ॥ ८

पू.आ.श्री पार्श्वचन्द्रसूरिविरचिता

## ५२. श्रीवासुपूज्यजिनस्तुतिः ॥

श्रीमन्तं वासुपूज्यं प्रबलबलजराभीरुकुम्भीन सिंहं
शश्वल्लीलाविलासं त्रिभुवनपतिभि र्वन्द्य पादारविन्दम् ।
विन्दन्तं विश्वलोकं तदनु विगणनातीतमेवाप्य लोकं
शुद्धात्मानं निरेनोमलममलमतिं वीतरागं पणाय ॥(स्रग्धरा) १

जनको नामवरिष्ठो वसुपूज्यः पूज्यगुणनिधिः श्रीमान् ।
जननीजयेति विदिता तयोः सुतो जयति जिनराजः ॥(आर्या)२

राजोपमवक्रं ख्यात चरित्रं सुगुणपवित्रं सन्मित्र-
तेजोजितमित्रं त्रस्यदमित्रं त्यक्तकलत्रं जीवत्रम् ।

सुखतरुजीमूतं भगवन्तं रिपुजयवन्तं धीमन्तं
विद्रुम समदेहं गरिमागेहं विगतस्नेहं वन्देहम् ॥ ३

श्रीमन् वासुपूज्य जिननायक नितिविनीति भृतां सुखदायक ।
संसाराम्बुनिधौ मां तारय मज्जन्तं किल दुरितं वारय ॥ ४

तारय जनतारक दुःखनिवारक दर्शनलालसमेनमलं
तव नाम जपन्तं मनसि धरन्तं मधुकरमाश्रितपदकमलम् ।
ये ये तव सेवा हेवाभाजो राजंस्ते ते परम पदं
लघुलीना दीनानाथ निलीना कृत्वा हीनं मदनमदम् ॥ ५

श्रीजिनजन्मावसरे द्रव्येषु मितासु दिक्कुमारीषु ।
आयातासुचभवनं विमानतिस्मेति सुरियुक्तम् ॥ ६

भक्तामरनाथ कृतस्मरमाथ दुरितदवपाथ इहोन्नतधारी
जिताहितपक्ष दमोत्तमदक्ष नताखिलयक्ष सदाभयहारी ।

जिनागमसार सुदर्शितपार विहितसुविचारजगत्सुखकारी
ममार्कमदेव सुदर्शनदेव सुलभपदसेव भवारि निवारी ॥ ७

श्रीजिनशासन गुरवे चित्तेष्टदान सुरतरवे ।
श्रीवासुपूज्यनाम्ने नमोऽर्हतेऽहर्निशं कुर्वे ॥ ८

वज्रर्षभनाराचनाम संहनन विभायुत
समचतुस्त्रविशालदेहसंस्थानविराजित ।
अष्टादशशतसुमानलक्षणगुणधारक
सप्ततिचापाङ्गमजिनेश बहु दोषनिवारक ।
सद्रामश्रृङ्गलाञ्छनवचनरचनारञ्जितसर्वजन
श्रीवासुपूज्य पूज्याङ्घ्रियुगजयजीनाखिलवृजिन ॥ ९

इच्छं श्री द्वादशोऽर्हन् विगतमललसत्केवलज्ञानभानु-
र्भव्याम्भोजप्रकाशप्रवण करभरोद्योतिताशेषविश्वः ।
वंशेक्ष्वाकूदयाद्रिस्फुटमुकुटसमो दुस्तमस्तोमहारी
भक्त्यासौ पार्श्वचन्द्रस्तुत इह भवताद् भूरिभूत्यै जिनेन्द्रः ॥१०

(स्रग्धरा)

पू.आ.श्री हेमचन्द्रसूरिविरचित:
धर्मदेशनभुवि शक्रेन्दकृत:

## ५३. ॥ श्रीविमलनाथ-जिनस्तव: ॥

(अनुष्टुप्)

देव ! त्वद्दर्शनेनाऽद्य, दुःखं सांसारिकं ययौ ।
शरीरिणां भुवः पङ्क-इव वार्षिकवारिणा ॥ १

पुण्योऽयं दिवसः स्वामिँ-स्त्वद्दर्शननिबन्धनम् ।
यात्राऽमलीभविष्यामो, दुःकर्ममलिना वयम् ॥ २

अङ्गाऽवयवराजत्वं, प्रत्यपद्यन्त नो दृशः ।
यास्त्वद्दर्शनमासाद्य, सद्योऽधुः शुद्धिमात्मनः ॥ ३

पूतास्त्वत्पादसम्पर्काद्-भरतक्षेत्रभूमयः ।
अपि ताः पापनाशाय, किं पुनस्तव दर्शनम् ॥ ४

मिथ्यादृशामुलूकाना-मिव त्वद्दर्शनं विभो ! ।
केवलाऽऽलोकमार्तण्ड-तिरोभावनिबन्धनम् ॥ ५

त्वद्दर्शनसुधापान-समुच्छ्वसितवर्ष्मणाम् ।
अद्य देव ! त्रुटिष्यन्ति, कर्मबन्धाः शरीरिणाम् ॥ ६

विवेकदर्पणोन्मार्ष्टि-समुत्पादनकर्मठाः ।
कल्याणतरुबीजाऽऽभाः, पान्तु त्वत्पादपांसवः ॥ ७

स्वामिन् ! पीयूषगण्डूष-इव ते देशनावचः ।
संसारमरुमग्नाना-मस्तु नः स्वास्थ्यहेतवे ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितः
समवसरणभुवि सौधमेन्द्रकृतः

## ५४. ॥ श्रीअनन्तनाथ-जिनस्तवः ॥

(अनुष्टुप्)

देहभाजां मनोवित्तं, विषयैस्तस्करैरिव ।
तावदुल्लङ्घ्यते यावन्-न त्वमेषामऽधीश्वरः ॥ १

प्रसर्पत्कोपतिमिरं, दृशोऽन्धकरणं नृणाम् ।
दूरादपसरत्येव, त्वद्दर्शनसुधाऽञ्जनात् ॥ २

मानेन भूतेनेवाऽऽत्ता-स्तावदज्ञाः शरीरिणः ।
यावद्भवद्वचो मन्त्र-इव तैर्न हि शुश्रुवे ॥ ३

त्वत्प्रसादात् त्रुटन्माया-निगडानां शरीरिणाम् ।
सम्प्राप्ताऽऽर्जवयानानां, मुक्तिर्न हि दवीयसी ॥ ४

यथा यथा देहभाजो, निरीहास्त्वामुपासते ।
चित्रं तथा तथा तेषा-मस्युत्कृष्टफलप्रदः ॥ ५

संसारसरितो राग-द्वेषौ द्वे श्रोतसी इव ।
तद्द्वीप इव माध्यस्थे, स्थीयते तव शासनात् ॥ ६

देहिनां निर्वृतिद्वार-प्रवेशोत्सुकचेतसाम् ।
मोहाऽन्धकारदीपत्वं, त्वं धारयसि नाऽपरः ॥ ७

विषयैः कषायराग-द्वेषमोहैरनिर्जिताः ।
भूयास्म त्वत्प्रसादेन, प्रसीद परमेश्वर ! ॥ ८

पू.आचार्यश्री देवभद्रसूरिविरचितम्

## ५५. ॥ श्रीअनन्तनाथस्तोत्रम् ॥

(आर्या)

सम्मत्तनाण-दंसण-वीरियसोक्खाइं जस्सऽणंताइं ।
तमणंतमणंतसुहाण कारणं संथुणामि जिणं ॥ १

तुह गुणगहणे वाणी वाणि च्चिय सइमिच्छतासंघो (?) ।
एक्कं पुणो मम मणो सया वि पगुणं न संदेहो ॥ २

देहो वि हु सियरुहिरो अरहो सुरहो सुयंधनीसासो ।
लोउत्तरा गुणा पुण लोउत्तरिया किमच्छरियं ? ॥ ३

गरुओ गुणाणुराओ तत्तो गरुया गुणा तओ गरुओ ।
थोयव्वो इह एक्को थोयारमई परं लहुया ॥ ४

न य सामिणो वि हु गुणे मुणेमि किं नाह ! मिय पगब्भामि ।
तेसि सरूवविमरिसे बहिम्मुहो तयणु झिज्जामि ॥ ५

जे केवलिणो जाणंति तुह गुणे ते थुइं न कुव्वंति ।
अम्हे उ अयाणंता थुइमीहामो महच्छरियं ! ॥ ६

अव्वो ! साहसमेयं जं सामिगुणे अयाणुया अम्हे ।
लग्गा थोउं अहवा हेवाओ होइ दुच्छड्डो ॥ ७

सिद्धावत्थाए वि हु अत्थित्तं नत्थि तारिसं मज्झ ।
जत्थऽत्थमिंति तुह तित्थनाह ! गुणसंथुइपबन्धा ॥ ८

चिन्तामणि व्व विज्ज (व्व) कप्पपायवलय व्व पणइयणं ।
कुणइ पयत्थं तुह पयसेवा अमुणियगुणवग्गा वि ॥ ९

देव ! तुममेव सामी सरणं तुममेव (देव !) न हु अन्नो ।
एवं पहू वियाणइ अहव ससंवेयणं मज्झ ॥ १०

सावणमासासियसत्तमीए सिरिसीहरायदइयाए ।
सुजसाए कुच्छिकमलम्मि रायहंसो तुमं जयसु ॥ ११

वइसाहकिन्हतेरसितिहीए जम्मूसवो कओ जेहिं ।
तुह ते सुराऽ–सुर–नरा कयत्थमत्थयमणी जाया ॥ १२

वइसाहे किन्हचउद्दसीए तुह वयसिरीए सहियस्स ।
आसि कयचमक्कारो अन्नो च्चिय कोइ सिंगारो ॥ १३

सा वइसाहे कसिणा चउद्दसी भन्नए कहं ? जीए ।
केवलपया(व)कवलि(चि)यतेओ तुमं उग्गओ चंदो ॥ १४

चित्तं चित्ते सियपंचमीए तुह तिहुयणप्पईवस्स ।
निव्वाणगयस्स वि जलइ जोइकलिया पयासमई ॥ १५

जय सिद्ध ! बुद्ध ! नीरय ! जय सासयमोक्खसोक्खसंपत्त ! ।
जय जय अणंतसामिय ! जय कामियदाणदुल्ललिय ! ॥ १६

गयराओ पणयाणं(गुणे) पणामेसि रोसरहिओ य ।
दोसे हणेसि सामिय ! तुज्झ अउव्वा इमा महिमा ॥ १७

वलियग्गीवं लच्छी कडक्खए ते सया सउम्माहा ।
जेसिं चित्ते निवससि तुमं सयाऽणंतजिणनाह ! ॥ १८

सो पायालो जक्खो सासय(ण)देवी वियंभिणी सा य ।
तुह सासणे रयाणं कुणंतु कल्लाणकोडीओ ॥ १९

सिरिदेवभद्दसूरी पुणो पुणो विण्णवेइ इणमेव ।
तुह चेव गुणा हियए वसंतु मे आभवमणंत ! ॥ २०

पू.आ.श्री हेमचन्द्रसूरिविरचितः
समवसरणभूम्यां सौधर्मेन्द्रैः सन्दृब्धः

## ५६. ॥ श्रीधर्मनाथ-जिनस्तवः ॥

(अनुष्टुप्)

विजयस्व जगच्चक्षु-श्चकोराऽनन्दचन्द्रमाः ।
मिथ्यात्वध्वान्तमार्तण्ड !, धर्मनाथ ! जगत्पते ! ॥ १

चिरं व्यहार्षीश्छद्मस्थो, गतछद्मा तथाऽप्यसि ।
अनन्तदर्शनोऽपि त्वं, दर्शनाऽन्तरबाधकः ॥ २

त्वद्देशनापयः पूरैः, परितः प्लाविताऽऽत्मनाम् ।
अह्नाय कर्ममालिन्य-मपयाति शरीरिणाम् ॥ ३

तथा न मेघच्छायासु, तरुच्छायासु नाऽपि वा ।
यथा शाम्यति सन्तापः, पादमूले तव प्रभो ! ॥ ४

इह त्वद्दर्शनाऽऽलोक-निस्यन्दवपुषः प्रभो ! ।
पाञ्चालिकावदुत्कीर्णा, इव भान्ति शरीरिणः ॥ ५

पृथग्विरुद्धमप्येत-देकत्र मिलितं चिरात् ।
त्वत्प्रभावाज्जगद्बन्धो !, बन्धूभूतं जगत्त्रयम् ॥ ६

त्रिखण्डभरतक्षेत्र-मूलायतनदैवत ! ।
अनन्यशरणान-ऽस्मांस्त्रायस्व परमेश्वर ! ॥ ७

भूयो भूयो जगन्नाथ !, त्वामदः प्रार्थयामहे ।
त्वत्पादपङ्कजद्वन्द्वे-ऽस्मन्मनो भ्रमरायताम् ॥ ८

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितम्

## ५७. ॥ श्रीशान्तिजिनस्तवनम् ॥

(वंशस्थ)

जयश्रियं यस्तनुते स्मृतेरपि,
प्रणेमुषां कर्मभटारिसङ्कटे ।
स्तवीमि तं शान्तिजिनं जगद्गुरुं,
शिवाप्तये टिम्बकनामके पुरे ॥ १

विवेकवैधुर्यपरिप्लुताशयै-
र्न यैः स्तवस्ते भगवन् ! विधीयते ।
विधीयते शर्मसु तैः स्पृहापि किं ?,
विना हि बीजं नहि शस्यसम्भवः ॥ २

तव स्तुतिं येऽपि जिनाऽऽदृता बुधा,
न तैः प्रयत्नः क्रियतां सुखाप्तये ।
अपेक्षते कल्पलतां किमुद्यमं,
समीहया या ददतेऽर्थिनां फलम् ॥ ३

समग्रशर्माभ्युदयैकहेतवे,
भवार्णवोल्लङ्घनसारसेतवे ।
जिनाय तुभ्यं सकृदानताः पुन-
र्नमन्ति न त्वामपरं च कञ्चन ॥ ४

फलं विभाव्येत्यलसः परानतौ,
नतौ प्रवृत्तस्तव दुर्विधोऽप्यहम् ।
प्रसीद तन्नाथ ! भवाम्यभीष्टभाक्,
समो हि सर्वेष्वपि ते कृपारसः ॥ ५

स्तुतिमिति तनुते जिनेन्द्र ! यस्ते,
मघवमहामुनिसुन्दरस्तुतांह्रेः ।
स भवति गुणसम्पदा समस्ते,
फलमिति तद्वितराऽचिरान्ममापि ॥ (पुष्पिताग्रा) ६

पू.आ. श्री जिनप्रभसूरिविरचितम्

## ५८. ॥ श्रीशान्तिजिनस्तवनम् ॥

(अनुष्टुप्)

श्रीशान्तिनाथो भगवानष्टापदसमानरुक् ।
बिभ्रद्गुणान्मया स्तोतानष्टापदसमानरुक् ॥ १

कल्याणकमलोल्लासश्रीषेणभवतोर्जितम् ।
बोधिरत्नं जगन्नाथश्रीषेणभवतोऽर्जितम् ॥ २

सुतानयोत्थाजगतीमहसारविरागतः ।
त्वं युग्मधर्मिमर्त्येषुमहसारविरागतः ॥ ३

सौधर्मेऽथभवान् सौख्याद्वैताढ्येसुरतामितः ।
ततोऽभूत् खेचरोर्वीभृत् वैताढ्येसुरतामितः ॥ ४

स्थित्वाऽथ प्राणते जज्ञे बलदेवोपराजितः ।
यस्मादरिगणः स्थाम्ना बलदेवोपराजितः ॥ ५

भूत्वाऽमन्दमुदाम्पात्रमच्युताखण्डलोभवान् ।
वज्रायुधोऽभूद्दयायामच्युताखण्डलोभवान् ॥ ६

प्राप्य ग्रैवेयकं पुण्यैरथोनवममुत्तमैः ।
सेव्यो नृपैरभूर्मेघरथोऽनवममुत्तमैः ॥ ७

सर्वार्थसिद्धिमित्वा च विश्वसेनाङ्गभूरभूः ।
चक्रीगजपुरेऽघानां विश्वसेनाङ्गभूरभूः ॥ ८

जीयात्तेजननीशास्तरचिरादेवसंस्तुता ।
यां स्तोतुर्जायते मुक्तिरचिरादेवसंस्तुता ॥ ९

जन्मस्नात्रे भवानूहे हरिणाङ्केन भाविना ।
तन्नाद्रौ यन्न सोद्योतं हरिणाङ्केनभाविना ॥ १०

राज्यं प्रजाविपत्त्राणहयानेकपरार्जितम् ।
अशाश्चिरम्पत्तिरथहयानेकपराजितम् ॥ ११

त्रातुं दुर्गतिभूभेदमहासीरसतःक्षमाम् ।
शान्तिं स्वीकृत्य षट्खण्डामहासीरसतःक्षमाम् ॥ १२

भुक्त्वार्हन्त्यं क्रमात्तीर्थं निर्मायजगतीहितम् ।
पदं प्राप प्रभो ! ख्यातं निर्मायजगतीहितम् ॥ १३

कल्याणपञ्चकं स्तोतुं भरणीभूतमीशते ।
केनामविश्वविश्वाभभरणी भूतमीशते ॥ १४

त्वदन्योऽलं सतामुच्चैरंहः प्रमथनायकः ।
परन्धत्तेऽन्धकध्वंसरंहःप्रमथनायकः ॥ १५

यत्त्वयायुधिजैत्रापिकन्दर्पोऽपासितापदः ।
तत्सतां हंसिगरुडकन्दर्पोपासिताऽपदः ॥ १६

चत्वारिंशद्धनूच्चस्त्वं पातान्मानतमोदिनः ।
निधिर्ज्ञानस्य दुःखान्धुपातान्मानतमोदिनः ॥ १७

इमं स्पृशकृपां कृत्वा हृद्यकल्याणभाजनम् ।
दृशालक्षसमायुस्त्वं हृद्यकल्याणभाजनम् ॥ १८

कस्य दुःखं न नाथ ! त्वं शान्तेधामनिधेहिनः ।
तद्दुःखितान् मृगाङ्कद्राक् शान्तेधामनिधेहिनः ॥ १९

स्तुत्वा त्वामिति मार्गये मुहुरिदं श्रीनर्तकीनर्तने
नाट्याचार्यजिनप्रभं जनमहा विघ्नाम्बुदाच्छादने ।
धत्तां संततमेव तावकगुणग्रामाभिरामस्तव-
प्रज्ञापारमितामपारमहिमप्राग्भार मद्भारती ॥ (शा.वि.) २०

पू.आ.श्री इन्द्रनन्दिसूरिविरचितम्

## ५९. ॥ श्रीशान्तिजिनमहिम्नः स्तोत्रम् ॥

(शिखरिणी)

महिम्नस्ते भावी सुरवरनराऽधीशविहित-
स्तुतीनां चेतस्सु प्रथितकुतुकानामपि सताम् ।
समारम्भः शान्ते ! जिनवर ! मनोभूक्षयविधौ
ममाऽप्येष स्तोत्रे हर ! निरपवादः परिकरः ॥ १

मुनीनामन्येषां स्वगृहगमने गीस्तनुमनः -
प्रसत्तिः स्याद्वा नो जिनवर ! तपःपारणकृते ।
प्रसन्नं स्वं गेहं प्रति सतनु लोकस्य भवतः
पदे त्वर्चाचीने पतति न मनः कस्य न वचः ? ॥ २

अबुद्धे त्रैलोक्याऽधिप ! तव मते पञ्चविषय-
प्रसक्त्या स्वात्माऽसौ व्यरचि भवदुःखौघवशगः ।
अथ ज्ञाते तस्मिन् स्वमसमतपोमुख्यकगुणैः
पुनामीत्यर्थेऽस्मिन् पुरमथनबुद्धिर्व्यवसिता ॥ ३

सृजन्तः श्रेयोऽपि प्रतनु परनिन्दां कुमतिनः
प्रकुर्वन्ति ज्ञात्वा जिन ! तव वचः पुण्यनिरताः ।
अतिस्तोकस्याऽपि स्वकृतदुरितस्यैव तदहो ?
विहन्तुं व्याक्रोशीं विदधत इहैकेऽजडधियः ॥ ४

यथा नित्याऽनित्याद्यपरिमितधर्मात्मकमिदं
त्वया प्रोक्तं विश्वं जिनवर ! तथैवाऽस्ति निखिलम् ।
स्थितेऽप्येवं नित्यं क्षणिकमथवेतिप्रभृतिकः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥ ५

जनो धन्यः स स्याद् भुवि तव मतं प्राप्य जिन ! यः
प्रमादत्यागेनोद्यममिह सृजेत्पुण्यविषये ।
विभो ! लब्ध्वा मोहप्रसरशयनेनैव नितरां
यतो मन्दास्त्वां प्रत्यमरवरसं शेरत इमे ॥ ६

गुणानामन्यत्राऽनवरतमनासादिततमा-
ऽवकाशानां शान्ते ! जगति जिनमुख्याश्रयतया ।
सदेवाऽधीशस्वःसदनदनुजानां नुतिपदं
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७

जिनेश ! त्वन्मूर्त्तौ नयनविषये भाग्यवशतः
समेतायां चेतस्त्रिभुवनवनभ्रान्तिरहितम् ।
समागत्याऽतृष्णं मम खलु समाधिस्थितमिदं
नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८

न तादृक् चातुर्यं न च वचनसौभाग्यमपि मे
परं भक्तिस्तीव्रा भवति जिन ! शक्नोमि न ततः ।

क्षणं स्थातुं मध्येकविसभमतः किञ्चन नहि
स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥ ९

वचः श्रुत्वाऽन्येषां श्रमणगृहिधर्मौ स्थिरतरौ
न यौ येषां जातौ तव वचसि कर्णाऽध्वनि गते ।
तथोपास्तौ सत्यां मनसि जिन ! येषां दृढतरं
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ? ॥ १०

सुखं भुक्त्वा स्वर्गे पुनरपि मनुष्येषु निखिलं
गृहीत्वा श्रामण्यं चरमभविनो मुक्तिपदवीम् ।
यदेता यान्ति श्रीजिन ! दुरितकालाऽसुरहतौ
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर ! विस्फूर्जितमिदम् ॥ ११

तदेतद् युक्तं यत्कृतवति गृहे वासमधिकं
प्रवृद्धाऽपि प्राञ्चद्गजतुरगपत्त्यादिभिरसौ ।
समृद्धिर्वैराग्योपचयजनयित्री जिन ! भवत्-
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥ १२

दरिद्राः सद्राज्यप्रभृतिमहऋद्ध्यादिसजुषो
विवर्णाः सद्वर्णाः स्वपरसमयानामवगमात् ।
भवन्ति श्रीनेतस्तव पदपयोजन्मविनते-
र्न कस्याऽप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥ १३

नृणां तेषां भूयादजननिरिहाऽनन्तमहिमाऽऽ-
स्पदं शोभाधामप्रकटितमहानन्दविसरः ।
अभूद् येषां कायस्तव न जिन ! दृग्गोचरगतोऽ-
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥ १४

गृहीत्वाऽनेनाऽहं चिरमसमसम्मानविषयी-
कृतः श्रामण्येऽसौ किमथ नहि सम्मानयति माम् ।
त्वया स्पर्द्धां कुर्वन्निति जिन ! जितो यत्सुरनरैः
स्मरःस्मर्त्तव्यात्मा नहि वशिषु पथ्यः परिभवः ॥ १५

त्वदग्रे देवेन्द्रा अपि सुरसुरीभिः परिवृताः
सदा नाट्यं चक्रुर्जिन ! विहितयत्नो भवभयात् ।
न कस्याऽप्यग्रे सद्गुणगणनिधे ! पञ्चमुखव-
ज्जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥ १६

प्रसन्नत्वौदार्यप्रभृतिकगुणश्रेणिकलितं
शरीरं यादृक्षं भवति किल रूपत्रिकधरम् ।
विभो ! तादृक्षेणाऽसुरनरनुत ! श्रीजिन ! भव-
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥ १७

अभूः श्रीशान्ते ! यद् युवतिसचिवैश्चक्रिपदवीं
विमुच्य त्वं गृह्णंश्चरितमनिवार्यो जिनपते !
न तच्चित्रं स्वेच्छं यदनुचरिताः स्युः किल जनै-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥ १८

अनर्घ्यं श्रीरत्नत्रयमिह जनानामुपदिशन्
महामोहस्वापोपचयरहितत्वेन धरणे ।
दयास्वर्वाहिन्या जिनवर ! भवानेव सततं
त्रयाणां रक्षायै त्रिपुरहर ! जागर्ति जगताम् ॥ १९

त्वदुक्तं सन्मार्गं त्रिभुवनपतेऽसावनुसरन्
स्थितो गार्हस्थ्येऽपि क्षपयति पुरोपात्तमशुभम् ।

प्रसन्नत्वौचित्यप्रभृतिगुणवत्त्वात्तव गिरः
श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्म सुजनः ॥ २०

त्वया भावः पुण्ये जिन ! निगदितो यन्नु फलदो
न मान्यं कैस्तद्यत्परमतिभिरप्युच्यत इति ।
तपस्तप्तं तप्त्यै भवति वपुषः स्युः प्रविहिता
ध्रुवं कर्त्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥ २१

गृहीते चारित्रे न भयमिति मा चिन्तय विना
जिनोक्तं यद्धर्मं नरकपतितं संसृतिवने ।
रतस्तप्त्यै जन्तोऽकरुणपरमाऽधार्मिकगण-
स्त्रसन्तं तेऽद्यापि त्यजति न मृग ! व्याधरभसः ॥ २२

जगन्नेतर्दीक्षाग्रहणसमये काञ्चनगिरि-
स्थिरस्वान्तं शान्ते ! यदिह भवदन्तःपुरजनः ।
विधातुं चारित्रे शिथिलमनसं पातकतरौ
दवैति त्वामद्धा बत वरद ! मुग्धा युवतयः ॥ २३

न रूपं ते चक्षुर्विषय इह नो नाथ ! किमपि
स्वरूपं ते लक्ष्यं न च तव रवः श्रोत्रविषयः ।
निदानत्वाच्छान्ते ! सकलकुशलानां क्षितितले
तथापि स्मर्तृणां वरद ! परमं मङ्गलमसि ॥ २४

सुखं त्यक्त्वा पञ्चप्रमितविषयोत्थं सुरसमं
गृहीत्वा श्रामण्यं स्वतनुवचसी स्वान्तसहिते ।
स्थिरे निर्माय श्रीजिन ! गुणमणीसञ्चयनिधे !
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥ २५

जिनो भूतस्वामी गुरुरपि च शान्तोऽसि भगवन् !
जगच्चक्षुः सोमो जगति परमेष्ठीति विदितः ।
महातेजाः काव्यस्त्वमसि परमर्षिः कमनजि-
न्न विद्मस्तत्तत्त्वं वयमिह हि यत्त्वं न भवसि ॥ २६

मनोऽभीष्टार्थानां वितरणविधौ दैवततरो-
र्विभो ! सिद्ध्यै मन्त्रस्मरणसमये कामिततते: ।
जपन्नादौ नामाऽक्षरसमुदयेनाऽङ्गिनिवहः
समस्तं व्यस्तं त्वां शरणद ! गृणात्योमिति पदम् ॥ २७

भवाऽरण्यभ्रान्तिप्रभवघनतापोपशमने
जिनेश ! श्रीखण्डद्रवसदृश ! फुल्लोत्पलदृशे ।
गभीरत्वस्थैर्यप्रभृतिगुणराजेस्त्रिजगतः
प्रियायाऽस्मै धाम्ने प्रविहितनमस्योऽस्मि भवते ॥ २८

यतः स्याद् यत्कर्मद्रुमसमुदयोन्मूलनविधौ
समं मत्तेभेन त्रिदशनुत ! शान्ते ! जिनपते ।
हित ! त्रैलोक्याय स्मरजयकृतौ वारितजग-
न्नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः ॥ २९

दुरितदनुजस्तोमध्वंसे चतुर्भुज ! तीर्थप !
त्रिभुवनमिदं धर्माऽधर्मस्वरूपनिरूपणात् ।
प्रथमविषये रक्तस्वान्तं विधाय गताय ते
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ (हरिणी) ३०

जिन ! तव समये तु क्वापि नोक्ता मुनीना-
मभयद ! पदपूजा द्रव्यतोऽस्तीत्यकार्षम् ।

अतिबहुतमभक्त्योत्कण्ठितः किञ्चनाऽहं
वरद ! चरणयोस्ते वाक्यपुष्पोपहारम् ॥ (मालिनी) ३१

स्युरिह वदनदेशे वेदसङ्ख्या रसज्ञा
यदि च भवति सङ्ख्यातीतवर्षाण्यथाऽऽयुः ।
त्रिदशनुत ! मनुष्यो निर्मितावाप्त ! नुत्या-
स्तदपि तव गुणानामीश ! पारं न याति ॥ (मालिनी) ३२

यदर्हंस्त्वयि देवत्वं सर्वदोषविवर्जितम् ।
तस्याऽन्ये नीलकण्ठाद्याः कलां नाऽर्हन्ति षोडशीम् ॥ ३३
(अनुष्टुप्)

केचिदूचुः परं ब्रह्म केचिद्ब्रह्मेश्वरादिकम् ।
परं शान्ते ! त्रिलोक्यास्त्वन्नास्ति तत्त्वं गुरोः परम् ॥ ३४
(अनुष्टुप्)

इत्थं किञ्चिदपि स्तुतः प्रमदतस्तीर्थेश ! सल्लोचना-
ऽऽनन्दे सोम ! जयश्रियं वितर मे भावद्विषां संहतेः ।
सद्बोधिद्रुमवर्धने जलधरः श्रीइन्द्रनन्दिप्रदः
पादाम्भोजनिषेवणे रतिजुषां सर्वाङ्गभाजां भुवि ॥(शा.वि.)३५

पू.आ.श्री कल्याणसागरसूरिविरचितम्

द्वितीयाविभक्त्यन्तपदयुक्तम्

## ६०. ॥ श्रीशान्तिनाथजिनस्तवनम् ॥

(द्रुतविलम्बित)

सकलदेवनरेश्वरवन्दितं विबुधमानवसंस्तुतपूजितम् ।
कमललोचनरञ्जितनागरं भविकपातकतामसभास्करम् ॥ १

निखिलवाञ्छितदानसुरागमं विदितशास्त्रविचारनयागमम् ।
कठिनकर्मदवानलनीरदं परमशान्तिरदामृतशान्तिदम् ॥ २

विविधलक्षणरञ्जितसञ्चरं सुविधिमार्गप्रकाशनतत्परम् ।
चपलमत्तमतङ्गजगामिनं कमलकोमलमांसलपाणिनम् ॥ ३

दलितदम्भमहाधृतिविग्रहं विहितमोहमहाबलिनिग्रहम् ।
दृढपरीषहवायुभुजङ्गमं किल शुभंयुमभीष्टसमागमम् ॥ ४

भविचकोरसुखाय कलानिधिं विनयधैर्यगुणोत्करशेवधिम् ।
मुनिषडङ्घ्रिवासकुशेशयं विधुसुधामधुसारतराशयम् ॥ ५

कुसुमसन्निभदन्तविराजितं सुभगभाग्यसुखाकरशोभितम् ।
निजभुजाबलसाधितराष्ट्रकं जितविपक्षगणं नतराजकम् ॥ ६

कुशलकेलिविलासभुवं परं विशदकीर्त्तिविकाशिदिगन्तरम् ।
कुमतसिन्धुरसिन्धुरवैरिणं सुमतिकामितसद्गतिकारणम् ॥ ७

वरसुवर्णसवर्णसुवर्णकं जितहृषीकमधर्मनिवारकम् ।
हरिणसेवितपादकजं जिनं हितकरं स्तुतनिर्ज्जरसज्जनम् ॥ ८

प्रवरवार्षिकदानगुणैर्वरं हतदरिद्रपरं परमेश्वरम् ।
समधरीकृतमेरुसुरद्रुमैः प्रचुरसर्वगुणादधिकोत्तमैः ॥ ९

विकटदुर्जयमन्मथशंकरं जनकलापिघनं विगतान्तरम् ।
वदननिर्जितचन्द्रमसं भृशं विगतदोषकलिं च महौजसम् ॥१०

अशिवविघ्नघनाघनमारुतं विषयतापवशं जनतामतम् ।
शिववधूपरिरम्भणलोलुपं विमलकेवलिसाधुकुलाधिपम् ॥११

भजत शान्तिजिनं तु शिवंकरं कुशलसागरवृद्धिकलाधरम् ।
अतुलरूपवशीकृतमानवं प्रणतसादरकिन्नरदानवम् ॥ १२

(द्वादशभिः कुलकम्)

भुवननलिनभानोः शान्तिदेवस्य भर्तु-
र्भवजलनिधिसेतोर्दुःखदारिद्र्यहर्तुः ।
निजहृदयविशुद्ध्या स्तोत्रमेतत्पठन्ति
प्रतिदिनमपि ये ते सम्पदः प्राप्नुवन्ति ॥ (मालिनी) १३

पू.आ.श्री कल्याणसागरसूरिकृतम्

## ६१. ॥ श्रीशान्तिजिनस्तवनम् ॥

दद्याच्छ्रीशान्तिदेवो वरकनकतनुः सारसौख्यानि शश्वद्
भक्तानां भक्तिभाजां त्रिभुवननगरे स्फारकोटीरहीरः ।
चार्वाकारः प्रणेता प्रणतहितकरः कामदो मारिवारः
सर्वज्ञाख्यातनामा प्रकटितमहिमा प्राप्तकर्मारिपारः ॥(स्रग्धरा)१

सुरमानवपूजितपाणिकजः कमलोदयकारकधर्म्मधनः ।
विगतामयदूषणजन्मततिः शुभसागरसोमनिभो विमलः ॥ २

(तोटक) इति प्रथमान्तविभक्तिकाव्ययुग्मम् ।

अजय्यं विभुं विश्वपूज्यं प्रसन्नं, जिनं सत्प्रभं शङ्करं देवदेवम् ।
सदा ज्ञानवल्लीततौ मेघमेकं
स्तुवे शान्तिनाथं कलौ कामकुम्भम् ॥ (भुजङ्गप्रयात) ३

कमलवदनं प्राप्तानन्दं नतामरनायकं
गजपतिगतिं विश्वाधारं सुरेश्वरवन्दितम् ।

सदयहृदयं त्यक्तातङ्कं विनिर्जितशोचनं
परमपददं ज्ञातार्थौघं त्रिकालविदञ्चितम् ॥ (हरिणी) ४

अर्चन्ति देवा भवपारगं जिनं कल्याणकारं मुनिवृन्दसेवितम् ।
छत्रादिसल्लक्षणलक्षितं क्षितावानन्दसन्दोहरकरं सुधामयम् ॥५
(इन्द्रवंशा) इति द्वितीयान्तविभक्तिकाव्यत्रिकम् ।

प्राज्यं राज्यं चक्रवर्त्तित्वसङ्गं त्यक्त्वा दत्वा स्वर्णरूप्यादिदानम् ।
श्रुत्वा वाक्यं ब्रह्मलोकान्तिकानां
येनावाप्तं संयमं मुक्तियोग्यं ॥ (शालिनी) ६

अमितपुण्यवता जनतावता कुगतिवारणतत्परसद्गिरा ।
नतनरामरकिन्नरशालिना भगवता भुवि शर्म विधायिना ॥ ७
(द्रुतविलम्बित) इति तृतीयान्तविभक्तिकाव्यद्वयम् ।

श्रीशान्तिदेवाय नमोऽस्तु नेत्रे विघ्नौघहर्त्रे शिवमार्गदात्रे ।
चक्राङ्कहस्ताय समस्तभर्त्रे शङ्खेन्दुहारोज्ज्वलशुक्लकर्त्रे ॥ ८
(इन्द्रव्रजा)

दर्शनामृतनिलीनजन्तवे विश्वशास्त्रनयनीतिहेतवे ।
लोभसागरसुवेलसेतवे द्वापरावलितमिस्रभानवे ॥ ९
(रथोद्धता) इति चतुर्थीविभक्तिकाव्ययुग्मम् ।

अघानि नश्यन्ति पुराकृतानि प्रशस्तनाम्नातिशयप्रसक्तेः ।
अनेकसंसारनिबन्धितानि प्रगाढबन्धस्थितिसञ्चितानि ॥ १०
(उपेन्द्रवज्रा)

भवति सुखमनन्तं शान्तिनाथप्रसादाद्
धरिणशरणदातुर्विश्वसेनाङ्गजातात् ।

नतभविकजनानां प्रीतिराजात्प्रकामं
निरवधिजिनरागे लग्नसन्मानसानां ॥ (मालिनी) ११

इति पञ्चम्यन्तविभक्तिकाव्यद्वयम् ।

सदा ध्यानं शान्तेरखिलगुणधाम्नः शुभवतो
धरन्ति श्रीकारं सुमतिमतिकारं भयहरम् ।
नरा भव्याः शक्त्या विगतमदतन्द्राः श्रुतपरा-
स्त्रिसन्ध्यं सद्ध्यानं प्रबलतरभाग्योदयमतः ॥(शिखरिणी) १२

शान्तेः शान्तेः पादद्वन्द्वं नत्वा नत्वा सश्रीकाः स्युः ।
भो भोः श्राद्धा आयुष्मन्तस्तुष्ट्यानन्दं कृत्वा कृत्वा ॥ १३

(विद्युन्माला) इति षष्ठीविभक्तिकाव्यद्विकम् ।

चेतोस्ति चेद्भवपयोनिधिपारमाप्ते
तीर्थङ्करे जिनपतौ किल शान्तिदेवे ।
भक्तिं कुरुष्व सततं विपुलामुदारां
हृत्वा प्रमादमपि कर्मविशेषजन्यम् ॥ (वसन्ततिलका) १४

दुर्गतिसागरपीतसमुद्रे निश्चलसंयमपालनमेरौ ।
शारदशुद्धसुधाकरवक्त्रे शङ्खसमाननिरञ्जनचित्ते ॥(दोधक) १५

कारुण्यरङ्गरञ्जिते कार्पण्यदोषवर्जिते ।
देवाधिपेऽचिरासुते लोकोपकारकर्मठे ॥ (नाराच) १६

इति सप्तमीविभक्तिकाव्यत्रिकम् ।

स्वकीयवंशाम्बरभास्करप्रभो ! विशालगङ्गाजलशुभ्रकीर्तिक ! ।
अपारसंसारभयाच्च सत्वरं कृपापरस्त्वं परिरक्ष सेवकान् ॥१७

(वंशस्थ) इति सम्बोधनविभक्तिकाव्यमेकम् ।

कल्याणोक्तं कुशलजननं सर्वसङ्घस्य नित्यं
नानावृत्तैः प्रकलितमिदं स्तोत्रमेतत्त्रिकालम् ।
मुक्त्वाऽऽलस्यं भणति मनुजो भाविना भावितात्मा
गेहे लक्ष्मीर्भवति दृढता तस्य दीर्घायुषश्च ॥(मन्दाक्रान्ता) १८

कल्याणोदधिवर्द्धनं कलिहरं कौशल्यमालास्पदं
सौभाग्यौघकरं विभक्तिकलितं कायैर्विभिन्नैः परम् ।
श्रीशान्तेः स्तवनं पठन्ति भविनः सत्पुण्यपण्यालया-
स्तेषां धाम्नि शुभे निवासमतुलाः कुर्व्वन्ति सम्पत्तयः ॥ १९
(शार्दूलविक्रीडित)

पू.आ.श्री हेमचन्द्रसूरिविरचितः
समवसरणभुवि चक्रायुधेन्द्राभ्यां कृतः

## ६२. ॥ श्रीशान्तिनाथजिनस्तवः ॥

(अनुष्टुप्)

श्रेयोदशाप्रवेशोऽद्य, जगतोऽपि जगत्पते ! ।
ज्ञानाऽऽदित्येन भवता, सुदिनोत्सवकारिणा ॥ १

पुण्यैरस्मादृशामेते, तव कल्याणकोत्सवाः ।
कल्याणचिन्तामणयः, प्रभवन्ति जगद्गुरो ॥ २

कषायादिमलालीढं, मनः सर्वशरीरिणाम् ।
क्षालयन्ति जगन्नाथ !, त्वद्दर्शनजलोर्मयः ॥ ३

कर्मच्छिदे बद्धयत्न-स्तीर्थकृत्कर्म यत् पुरा ।
आर्जयस्तत्तव स्वार्थाऽ-नपेक्षाऽन्योपकारिता ॥ ४

घोरसंसारभीतानां, महादुर्गमिव प्रभो ! ।
जगत्यऽदस्ते समव-सरणं शरणं नृणाम् ॥ ५

जानासि सर्वं सर्वेषां, भावं सर्वहितोऽसि च ।
प्रार्थनीयं न तत् किञ्चि-त्तथापि प्राथ्यर्से मया ॥ ६

यथा हि विहरन्नुर्व्यां, ग्रामाकरपुरादिकम् ।
क्षणे क्षणे त्वं त्यजसि, मा त्याक्षीर्मन्मनस्तथा ॥ ७

त्वत्पादपङ्कजध्यान-षट्पदीभूतचेतसः ।
व्यतिक्रमतु मे कालो, भगवँस्त्वत्प्रसादतः ॥ ८

पू.आ.श्री हेमचन्द्रसूरिविरचितः

दशमुखेन स्वगृहचैत्ये कृतः

## ६३. ॥ श्रीशान्तिनाथ-जिनस्तवः ॥

(अनुष्टुप्)

देवाधिदेवाय जगत्-तायिने परमात्मने ।
श्रीमते शान्तिनाथाय, षोडशायाऽर्हते नमः ॥ १

श्रीशान्तिनाथ ! भगवन् !, भवाऽम्भोनिधितारण ! ।
सर्वार्थसिद्धमंत्राय, त्वन्नाम्नेऽपि नमो नमः ॥ २

ये तवाऽष्टविधां पूजां, कुर्वन्ति परमेश्वर ! ।
अष्टाऽपि सिद्धयस्तेषां, करस्था अणिमादयः ॥ ३

धन्यान्यक्षीणि यानि त्वां, पश्यन्ति प्रतिवासरम् ।
तेभ्योऽपि धन्यं हृदयं, तद्दृष्टो येन धार्यसे ॥ ४

देव ! त्वत्पादसंस्पर्शा-दपि स्यान्निर्मलो जनः ।
अयोऽपि हेमीभवति, स्पर्शवेधिरसान्न किम् ? ॥ ५

त्वत्पादाऽब्जप्रणामेन, नित्यं भूलुण्ठनैः प्रभो ! ।
शृङ्गारतिलकीभूयान्, मम भाले किणावलिः ॥ ६

पदार्थैः पुष्पगन्धाद्यै–रुपहारीकृतैस्तव ।
प्रभो ! भवतु मद्राज्य–सम्पद्वल्लेः सदा फलम् ॥ ७

भूयो भूयः प्रार्थये त्वा–मिदमेव जगद्विभो ! ।
भगवन् ! भूयसी भूयात्–त्वयि भक्ति र्भवे भवे ॥ ८

पू.आ.श्री जयवन्तसूरिविरचितः

## ६४. ॥ श्रीशान्तिजिनस्तवः ॥

कल्याणकायमोजःश्रीकल्याणकमलाकरम् ।
कल्याणममलं शान्तिं, कल्याणदं नवीम्यहम् ॥ (अनुष्टुप्) १

नवमङ्गलदायकमभिरामं, केवलललनालीलारामं,
नतनिहतोरुदरामं ।
पातकपटलं व्यरिचद् रामं, यस्तं परिहृतसङ्गमरामं,
शिवसङ्गतमविरामम् ॥ (यु.) २

श(रा)मं यशस्ते प्रसरीसरीति, मां वावदूकं च चरीकरीति ।
शंश्लाघतेऽस्मै स वरीवरीति, गुणैर्जगद् यश्च परीपरीति ॥ ३
(उपजाति)

रीतिरतास्तव के महिमानं, न पनायन्ते ज्ञायसमानं,
विदलितसुरभरमानम् ।
हरिहरिहरिहरिराजसमानं, स्वैरं जगति सदा लसमानं
कृतप्रतिघादिवमानम् ॥ ४

मानसे निवस मे जिनहंस !, भव्यकोकनदबोधनहंस ! ।
जन्तुजातपरिपालनहंस !, वामकाममदभञ्जनहंस ! ॥(भद्रिका)५

हंसवनीपरिवर्धनकमलं, सुमतिर्यो मतिजिनपदकमलं,
लभतेऽसौ शिवकमलम् ।
सेवकजनसम्पादितकमलं, वित्रासितदुर्गतिततिकमलं,
सज्जनचातककमलम् ॥ ६

स्वान्ते स्म नाकं तव देवदाराः, कुर्वन्ति सौभाग्यगुणैर्मदाराः ।
प्रागल्भ्यदक्षाः कृतदेवदारा, ये(या)जयामासुरिमानुदाराः ॥७
(इन्द्रवज्रा)

गत्या मन्थरया सारङ्गं, कट(टि)तटगुरुभारेण सारङ्गं,
तनुमध्येन सारङ्गम् ।
उरसिरुहो युगलेन सारङ्गं, विमलाननकलया सारङ्गं,
अपि च नसा सारङ्गम् ॥ ८

सारङ्गमायतविचाचलिदृग्विलासैः,
सारङ्गमेव कुटिलेन भ्रुवोर्युगेन ।
सारङ्गमङ्गविलुलत्कबरीभरेण,
सारङ्गधामपरिकर्मरुचा सलीलाः ॥ (त्रि.)(वसन्ततिलका) ९

पुरतस्ते प्रगुणितसारङ्गं, तेऽक्षिक्षेपेरितसारङ्गं,
परुषायितसारङ्गम् ।
ननृतुर्गायन्तः सारङ्गं, प्राप्याऽवसरेतरसारङ्गं,
कामुकशलभसारङ्गम् ॥ १०

भवांस्तथा नाऽपि विकारमार !, जातो हताशस्त्वयि धीरमार !॥
भवाम्बुधेर्मामव वैरमार ! देवेन्द्रवन्द्याऽऽन्तरवैरमार ! ॥ ११
(उपजाति)

औषीद् यः किल भवकान्तारं, यस्तं मनुते स तु कान्तारं,
भिन्ते शिवकान्तारम् ।
मां मेन्द्रीं यच्छतु कान्तारं, वरिवस्येशितुरतिकान्तारं,
तनुते भविकान्तारम् ॥ १२

आबाल्याद् विमलं वपुस्तव विभो ! श्वासोऽजयत्पुष्करं,
धीरं वारिधरायसे प्रविकिरंस्त्वं देशनापुष्करम् ।
अस्त्रालीढमथो रथाङ्गमनघं विद्योतयत्पुष्करं,
भाति त्वत्पुरतो मनो हरति ते छत्रत्रयं पुष्करम् ॥(शा.वि.)१३

शिवरमणीहृदयस्थलहारं, कुनयवनीदहने नीहारं,
जिनमीडे वीहारम् ।
दुर्गतिजगतीदारणहारं, निस्तारितदूरितमोहारं,
यशसा निर्जितहारम् ॥ १४

येषां करुणेशरणे, संसारत्रस्तनिपुणजनशरणे ।
द्वेषस्त्वयि विगतरणे, निहि(ह?) तास्ते कुमतनिशितरणे ! ॥१५
(आर्या)

मूलादुन्मूलयता वालं, प्रोन्मूलितमिह मनसिजवालं,
भवता दधता वालम् ।
तत् तेरे दुस्तरभववालं यत्राऽऽस्ते भ्रान्तीजंवालं,
नौमि भवन्तमवालम् ॥ १६

नाऽलं गुरू रौद्ररसागरस्य, वक्तुं गुणांस्ते गुणसागरस्य ।
विभूषितब्रह्मरसागरस्य, वयं कथं नु(न्व?)द्भुतसागरस्य ॥१७
(उपजाति)

सुरसरितः श्रोतःसिकतारा, धाराः सारा सुमतिमताराात्,
मीयेरन् दिवि ताराः ।
गुणमाला तेनाऽप्यतितारा:, मातुं शक्या किल वितातारा,
चन्द्रकलेव गतारा ॥ १८

धन्याऽचिरा सर्ववशासु नाम, यां वासवाली रसतो ननाम ।
यस्याः सुतस्त्वं जगतीजनाम-
हरोऽसि शान्ते ! जिन ! सत्यनाम ॥ (उपजाति) १९

धन्यास्ते सततं तव वदनं, येऽलं पश्यन्त्येनश्छदनं,
सौम्यं शोभासदनम् ।
स्याद्वाद्वोदाराममगदनं, चिन्तातीतफलावलिददनं,
जयकमलासंवदनम् ॥ २०

दुःखद्रोर्लवनं प्रभावभवनं भव्यैः कृतासेवनं,
श्रेयःश्रीसवनं कषायतवनं सम्पल्लतानीवनम् ।
श्रीशान्तेः स्तवनं भवारियवनं सौभाग्यसञ्जीवनं
वाच्यापित्तवनं महःसुमवनं स्वान्तस्य सत्तेवनम् ॥(शा.वि.)२१

जयवन्तमीशमेवं, यः सुमतिर्नौति शान्तिमतिमहितम् ।
गुणसौभाग्यवरोऽसौ, त्वरितं सुखसन्ततिं लभते ॥ २२
(आर्या)

पू. उपाध्यायश्री मेरुनन्दनगणिरचितम्

# ६५. ॥ श्रीशान्तिजिनस्तवनम् ॥

(भुजङ्गप्रयात)

शिवश्रीवरं चङ्गसारङ्गवासं, मुखश्रीपराभूतसारङ्गवासम् ।
जिनाधीशचक्रीशसारङ्गवासं,
स्तुवे शान्तिनाथं सुसारङ्गवासम् ॥ १

विशाली गुणाली विभो ! तावकीना,
तनिष्ठा वराकी मतिर्मामकीना ।
तयोः सङ्गतं सङ्गतं किं विधिज्ञो-
पमानेन भूजानि भिक्षाटकन्ये ॥ २

तथापीह या सङ्गतिस्तत्र देव !, श्रये कारणं प्राग्भवाभ्यास एव ।
यतः श्रूयते प्रेमदानादि सर्वं,
सदभ्यस्तमभ्येति जन्मान्तरेऽपि ॥ ३

अतस्तात ! विख्यातकारुण्यसिन्धो !,
महाकेवलज्ञानविश्वैकबन्धो ! ।
गुणानां ततौ संस्तवं ते विपङ्कं,
विधत्तां मदीया मतिर्मुक्तशङ्कम् ॥ ४

महाकीर्तिकल्लोलमालातिध्वा(धा)न्ते,
दुरालोकमध्ये प्रभावाम्बुधौ ते ।
अपि स्फारसारस्वतोरुप्रवाह(हे)
न लक्षा विशन्तः प्रभो ! वेगगाहाः ॥ ५

स मे आचिरयः श्रियः प्रातु पृथ्वीर्यदङ्गप्रभामिश्रिता भाति पृथ्वी।
प्रभोर्दृष्टिपीयूषधाराभिरेव, ध्रुवं स्वर्णपुष्पोच्चयैः पुष्पितेव ॥६

त्वयीशाम्बिकागर्भगे कान्तिपुण्ये, दिनाधीश्वरे वोदयस्थिते जने।
प्रलीना शिवे भूतले शान्तिलासः,
पयोजे यथा नष्टनिद्रे विकाशः (सः) ॥ ७

महीमण्डले तावकीनावतारे, जनातङ्कदाशान्तिवल्लीतु(कु)ठारे ।
पुरोगामिनी वावतीर्णाऽत्र शान्ति-
स्ततो नामतो गीयसे देव ! शान्तिः ॥ ८

इदं सत्यमस्या मनुष्याक्षिलक्षा,
अभूवन्न(न्नाथ!) सिद्धिश्रियो रूपलक्षा ।
चतुःषष्टिरामासहस्राणि सद्यस्त्वया मेनिरे यत्कृतेनैव हृद्य ! ॥९

स्फुटं तात्त्विकी वीरमाताचिरासौ, वरीवृत्यते कामिनीलोकराशौ।
यदीयाङ्गजः साधुयित्वा द्धि(द्वि?)धारम्,
ललौ द्विप्रकारं क्षमायाः सुसारम् ॥ १०

महाशीलसन्नाहसञ्जातरक्षः क्षिपन्वैरिवारं धराचारुदक्षः ।
प्रदृष्टोऽसि यैः कर्मनिर्माथ ज(य?)ज्ञे,
पवित्राणि नेत्राणि तान्येव मन्ये ॥ ११

अशोकादिपूजाविधिभ्राजमानं, चतुर्द्वारशालत्रयीशालमानम् ।
दिशन्तं चतुर्द्धा वृषं ये भवन्तं,
स्मरन्ति द्रुतं भिन्दते ते भवं तम् ॥ १२

यदालोकनं लोचने सौधवर्षं, निपीय स्थिते निर्मिमेषे सहर्षम्।
कलाकेलिदावावलीशान्तिपाथः,
स मां पातु संसारतः शान्तिनाथः ॥ १३

कुदेवार्कपादार्तसन्तापथोरौ, चिराल्लब्धकामौ दृशौ मे चकोरौ ।
रमेतामिहाहर्निशं नाथ ! शान्ते !,
त्वदीयानने यामिनीजातिकान्ते ! ॥ १४

विभो ! सापि सद्धर्मचक्रेण रम्या,
विभो ! सापि गोपालचक्रानुगम्या ।
विभो ! सापि निस्सीमबुद्धिप्रधाना,
विभो ! सापि वर्ण्या सदा सन्निधाना ॥ १५

विभो ! सापि लोकत्रयैकातपत्रा,
विभो ! सापि लीलावलाशोकपत्रा ।
विभो ! सापि सौभाग्यभूपण्यकान्ता,
विभो ! सापि नानाविहारप्रशान्ता ॥ १६

घनं किं विभो ! पश्य धृत्वा ममत्वं,
तया मे गुणैरस्ति सर्वैः समत्वम् ।
कुतो मां विहाय स्फुटस्नेहसारां,
त्वमासेवसे तां गलन्मोहधाराम् ॥ १७

मनोहारिरामावली वा दुदम्भा, हृदन्तीति चक्रीन्दिराभाग्यरम्भा ।
जिनश्रीकृते येन मुक्ता सहेलं,
स मे रातु शं शान्तिनाथोऽनुवेलम् ॥ १८

मयैवं नुतः षोडशस्तीर्थनेता, शुभाचारिभावारिभावारिजेता ।
महामेरुनन्दन्नवीनप्रभो ! मे,
वरीकर्तृ शीघ्रं स्वतुल्ये प्रभो ! मे ॥ १९

पू.उपा.श्री सूरचन्द्रविजयविरचितः
(श्री अजितजिनस्तव-अन्तर्गतः)

# ६६. ॥ श्रीशान्तिजिनस्तवः ॥

(अनुष्टुप्)

विश्वेसेनमहीनाथ-वंशपङ्कजभास्करम् ।
आचिरेयं जनाधीशं, वन्दे शान्तिमहं सदा ॥ १

सुरासुरनराधीश-सेवितं सुमनःप्रभुम् ।
स्वर्णवर्णसमक्षेत्रं, साम्यसद्रससागरम् ॥ २

कर्मारिवारसंहार-कारिणं करुणास्पदम् ।
मिथ्यात्वद्रुमभङ्गेभ-सन्निभं भविका ! नुत ॥ (यु.) ३

मोहाद्रिशिखरच्छेदं, वज्रभोगविबन्धुरम् ।
वैश्वसेनिर्जिनो नन्द्या-च्छ्रीशान्तिः समतालयः ॥ ४

पापायासहरः सर्व-ज्ञानभानुदिवाकरः ।
अचिराख्योदरोदार-दरीदरहरीश्वरः ॥ ५

मन्दारमल्लिकाजाति-पयोजैः पूजितक्रमः ।
देवाधिपैः सदा सोऽव्या - द्विश्वसेननृपाङ्गजः ॥ (यु.) ६

यस्य ध्यानात्समे यान्ति, रोगास्ताक्ष्र्यादिवोरगाः ।
सोऽचिरानन्दनः पातु, युष्मान् भवभयौघतः ॥ ७

श्रेयः केलिनिवासाभो !, गुणी कमललोचनः ।
सच्चन्द्रचन्द्रिकाचन्द्र-समकीर्तिः करोतु शम् ॥ ८

विशालनयनो मार-मारको मुनिपुङ्गवः ।
शान्तिनाथो जिनो जीया-च्चिरं जगज्जनाधिपः ॥ ९

शीघ्रं शमय हे देव !, पापं भुवि तनूमताम् ।
निस्तारय भवाम्भोधेः, स्फूर्जत्सम्पत्तिकारक ! ॥ १०

पाहि पाहि जिनाधीश ! संसारवार्द्धिमध्यतः ।
भवत्स्मरणसंसक्तं, युष्मदंह्रिप्रपातिनम् ॥ ११

सौभाग्यभाग्यसम्पन्न-कल्याणच्छविविग्रहः ।
वाचंयमजनाधार !, नित्यं जय प्रभो ! ध्रुवम् ॥ १२

एवं शान्तिजिनेशोऽयं प्रातु वो वाञ्छितं सदा ।
'सूरचन्द्रो'नुनावात्र, यं सौवश्रेयसे वशी ॥ १३

पू.मु.श्री मणिविजयविरचिता

## ६७. ॥ श्रीशान्तिनाथस्तुतिः ॥

(अनुष्टुप्)

नमः श्रीशान्तिनाथाय, विनाशितमहारये ।
नमः श्री शान्तचित्ताय, कनकसदृशद्युते ॥ १

दुर्वारवैरिवारिदि-भावशत्रुविनाशिने ।
वरविमलज्ञानेन, लोकालोकप्रकाशिने ॥ २

भवाटवीभूस(त)भूरि-भयविह्वलमानसः ।
मम त्वं शरणं भूया निखिलार्त्तिनिवारक ! ॥ ३

पू.उपा.श्री समयसुन्दरविजयविरचितम्

# ६८. ॥ श्रीशान्तिनाथस्तोत्रम् ॥

(राग–केदारउ)

शान्तिनाथं भजे शान्तिसुखदायकं,
नायकं केवलज्ञानगेहम् ।
कर्ममलपङ्ककादम्बिनीसन्निभं,
गगनसागरधनुर्मानदेहम् ॥ शा... १

कनकपङ्कजकदम्बेषु सञ्चारिणं,
कारिणं सम्पदां भागधेयम् ।
अत्रिसुत वाहनेनाङ्कितं जिनवरं,
पापकुम्भीनसे वैनतेयम् ॥ शा... २

विकटसङ्कटपयोराशिघटसम्भवं,
विश्वसेनाङ्गजं विश्वभूपम् ।
सौख्यसन्तानवल्लीविताने घनं,
समयसुन्दरसदानन्दरूपम् ॥ शा... ३

पू.मु.श्री मलूकचन्द्रकृता

## ६९. ॥ श्रीशान्तिनाथस्तुतिः ॥

(पुष्पिताग्रा)

हिमगिरितनयेशशत्रुजेता,
धृतचरणोत्पलचन्द्रमाकलङ्कः ।
गिरिशतिलकवीध्रकीर्तिपूरः
प्रभवतु मे हि शिवाय शान्तिनाथः ॥ १

स्वगतभविकधिष्णदस्युभेदाऽ,-
मरतरुकल्पलसद्विचार्वभिख्यः ।
ऋषिनगच्छददैत्यभिद्विवन्द्यः
प्रभवतु मे हि शिवाय शान्तिनाथः ॥ २

सुविहितवसुधाप्रदेशशान्तिः
स्थितवति मातृसुकुक्षिसद्मनीव ।
निमिषनरकृतोत्सवः प्रजाते,
प्रभवतु मे हि शिवाय शान्तिनाथः ॥ ३

विजितभरतराष्ट्रभूमिशक्रः,
सममितदाननिरस्तभव्यदौस्थ्यः ।
नियमसमुपयुक्तपुण्यचेताः,
प्रभवतु मे हि शिवाय शान्तिनाथः ॥ ४

असुकरतपनीतकेवलश्री,
रतिशयशोभितशोभनाङ्गकान्तिः ।
भवजलधिनिमग्नजन्तुपोतः
प्रभवतु मे हि शिवाय शान्तिनाथः ॥ ५

अविकचभविवीर्यबोधमित्रः,
शिवपुटभेदनपन्थसार्थवाहः ।
त्रिभुवनविमलप्रदीपतुल्यः
प्रभवतु मे हि शिवाय शान्तिनाथः ॥ ६

अनुपमशमरूपतागरीया,-
नभिगतभव्यभवद्विभासमानः ।
उपहितपरमप्रभूतशर्मा
प्रभवतु मे हि शिवाय शान्तिनाथः ॥ ७

हरिगुरुसमभव्यजीववृन्दै,-
र्विरचितमञ्जुनुतिश्च भक्तिनम्रैः ।
त्रिदशनिकरमह्यपादपद्मः
प्रभवतु मे हि शिवाय शान्तिनाथः ॥ ८

इति समभिहितेडं यो जिनं शान्तिनाथं,
स्मरति मनसि नित्यं व्युष्टकाले लभेत ।
विबुधजिनवरश्रीवीरचन्द्राभिधस्या,-
परिमिततरलक्ष्मीं सोमलूकाह्वयेन ॥ (मालिनी) ९

## ७०. ॥ श्रीशान्तिजिनाष्टकम् ॥

(शार्दूलविक्रीडित)

न स्नेहाच्छरणं प्रयान्ति भगवन्पादद्वयं ते प्रजाः
हेतुस्तत्र विचित्रदुःखनिचयः संसारघोरार्णवः ।
अत्यन्तस्फुरदुग्ररश्मिनिकरव्याकीर्णभूमण्डलो
ग्रैष्मः कारयतीन्दुपादसलिलच्छायानुरागं रविः ॥ १

क्रुद्धाशीविषदष्टदुर्जयविषज्वालावलीविक्रमो
विद्याभेषजमन्त्रतोयहवनैर्याति प्रशान्तिं यथा ।
तद्वत्ते चरणारुणाम्बुजयुगस्तोत्रोन्मुखानां नृणाम्
विघ्ना: कायविनायकाश्च सहसा शाम्यन्त्यहो विस्मय: ॥ २

सन्तप्तोत्तमकाञ्चनक्षितिधरश्रीस्पर्द्धिगौरद्युते:
पुंसां त्वच्चरणप्रणामकरणात्पीडा: प्रयान्ति क्षयं ।
उद्यद्भास्करविस्फुरत्करशतव्याघातनिष्कासिता
नानादेहिविलोचनद्युतिहरा शीघ्रं यथा शर्वरी ॥ ३

त्रैलोक्येश्वरभङ्गलब्धविजयादत्यन्तरौद्रात्मकान्
नानाजन्मशतान्तरेषु पुरतो जीवस्य संसारिण: ।
को वा प्रस्खलतीह केन विधिना कालोग्रदावानलान् -
न स्याच्चेत्तव पादपद्मयुगलस्तुत्यापगावारणम् ॥ ४

लोकालोकनिरन्तरप्रविततज्ञानैकमूर्ते विभो
नानारत्नपिनद्धदण्डरुचिरश्वेतातपत्रत्रय: ।
त्वत्पादद्वयपूतगीतरवत: शीघ्रं दवत्यामया:
दर्पाध्मातमृगेन्द्रभीमनिनदाद्वन्या यथा कुञ्जरा ॥ ५

दिव्यस्त्रीनयनाभिरामविपुलश्रीमेरुचूडामणे
भास्वद्बालदिवाकरद्युतिहर प्राणीष्टभामण्डल ।
अव्याबाधमचिन्त्यसारमतुलं त्यक्तोपमं शाश्वतं
सौख्यं त्वच्चरणारविन्दयुगलस्तुत्यैव सम्प्राप्यते ॥ ६

यावन्नोदयते प्रभापरिकर: श्रीभास्करो भासयं-
स्तावद्धारयतीह पङ्कजवनं निद्रातिभारश्रमम् ।

यावत्त्वच्चरणद्वयस्य भगवन्न स्यात्प्रसादोदय-
स्तावज्जीवनिकाय एष वहति प्रायेण पापं महत् ॥ ७

शान्तिं शान्तिजिनेन्द्र शान्तमनसस्त्वत्पादपद्माश्रयात्
सम्प्राप्ताः पृथिवीतलेषु बहवः शान्त्यर्थिनः प्राणिनः ।
कारुण्यान्मम भक्तिकस्य च विभो ! दृष्टिं प्रसन्नां कुरु
त्वत्पादद्वयदैवतस्य गदतः शान्त्यष्टकं भक्तितः ॥ ८

जाउरमण्डन-

## ७१. ॥ श्रीशान्तिनाथजिनस्तवनम् ॥

(वसन्ततिलका)

कल्याणकारणमकारणशान्तिहेतुं
सेतुं विपत्तिजलधौ कलधौतकेतुम् ।
सन्तापपापपवनाशनवैनतेयं
श्रीयोगिनीपुरपुरन्दरमाचिरेयम् ॥ १

व्याकोशचम्पकमणीचकगौरगात्रं
पात्रं प्रभूतमहसां महसाममात्रम् ।
श्रीसिद्धिसिद्धिपुरपद्धतिसौरभेयं
श्रीयोगिनीपुरपुरन्दरमाचिरेयम् ॥ २

मिथ्यात्वमन्मथतमोहरणोष्णभासं
निस्सामसाम्यसलिलेशसुसीमभासम् ।
माहात्म्यमण्डितमखण्डितपौरुषेयं
श्रीयोगिनीपुरपुरन्दरमाचिरेयम् ॥ ३

मायामयस्मयभयप्रमयप्रवीणं
धीरध्वनेर्मधुरताधरितेन्द्रवीणम् ।
ध्यायामि विश्वजनवल्लभनामधेयं
श्रीयोगिनीपुरपुरन्दरमाचिरेयम् ॥ ४

श्रीजाउरपुरस्थायी सुधापायीश्वरप्रियः ।
शान्तिर्दूरीकृताशान्तिः स्तुतोऽस्तु प्रगुणश्रिये ॥ (अनुष्टुप्) ५

## ७२. ॥ श्रीशान्तिनाथस्तोत्रम् ॥

(अनुष्टुप्)

विश्वातिशायिमहिमा, ज्वलत्तेजो विराजितम् ।
शान्तिं शान्तिकरं स्तौमि, दुरितव्रातशान्तये ॥ १

षोडशविद्यादेव्योऽपि, चतुषष्ठिः सुरेश्वराः ।
ब्रह्मादयश्च सर्वेऽपि यं सेवन्ति कृतादराः ॥ २

ॐ ह्रीँ श्रीँ जये विजये, ॐ अजये परैरपि ।
ॐ तुष्टिं कुरु कुरु पुष्टिं, कुरु कुरु शान्तिं महाजये ॥ ३

न क्वापि व्याधयो देहे, न ज्वरा न भगन्धरा ।
कासश्वासादयो नैव, बाधन्ते शान्तिसेवनात् ॥ ४

यक्षभूतपिशाचाद्या, व्यन्तरा दुष्टमुद्गलाः ।
सर्वे शाम्यन्तु मे नाथ !, शान्तिनाथ-सुसेवया ॥ ५

# ७३. ॥ श्रीशान्तिनाथस्तोत्रम् ॥

(तोटक)

सुरराजसमाजनतांह्रियुगं, युगपज्जनजातविबोधकरम् ।
करणद्विपकुम्भकठोरहरिं, हरिणाङ्कितमर्जुनतुल्यरुचिम् ॥ १

रुचिरागमसर्जनशम्भुसमं, सममानविलोकितजन्तुगणम् ।
गणनायकमुख्यमुनीन्द्रनतं, नतवाञ्छितपूरणकल्पनगम् ॥ २

नगराजविनिर्म्मितजन्ममहं, महनीयचरित्रपवित्रतनुम् ।
तनुकीकृतवैरिनरेशमदं, मदमत्तगजेन्द्रसदृग्‌गमनम् ॥ ३

मनईहितसौख्यविधानपटुं, पटुवाणिजनौघकृतस्तवनम् ।
वनजोदरसोदरपाणिपदं, पदपद्मविलीनजगत्कमलम् ॥ ४

मलमान्द्यविमुक्तपदप्रभवं, भवदुःखसुदारुणदानघनम् ।
घनसारसुगन्धिमुखश्वसितं, सितसंयमशीलधुरैकवृषम् ॥ ५

वृषकाननसेचननीरधरं, धरणीधरवन्द्यमनिन्द्यगुणम् ।
गुणवज्जनताऽऽश्रितसच्चरणं, रणरङ्गविनिर्जितदेवनरम् ॥ ६

नरकादिकदुःखसमूहहरं, हरहारतुसारसुकीर्तिभरम् ।
भरतक्षितिपामितबाहुबलं, बलशासनशंसितसाधुजनम् ॥ ७

जनकाद्यनुरागविधौ विमुखं, मुखकान्तिवितर्जितचन्द्रकलम् ।
कलनातिगसिद्धिसमृद्धिपरं, परभक्तिजनातुलशान्तिजिनम् ॥८

जिनपुङ्गवनायक शिवसुखदायक कामानलदेवेन्द्रवर ! ।
त्रिभुवनजनबन्धुर भवतरुसिन्धुर भव भविनां भवभीतिहर ॥९

पू.आ.श्री रामचन्द्रसूरिविरचिता

# ७४. ॥ श्रीशान्तिजिन-द्वात्रिंशिका ॥

(अपूर्णा) (वंशस्थ)

सदोदितानन्दमनन्तदर्शनं निरन्तरालोकमशोकविस्मयम् ।
अवैरसौहार्द्दमपुण्यकल्मषं स्मरामि शान्तिं दुरितोपशान्तये ॥१

शुभाशुभान्तःकरणैकसाक्षिणे जगद्विपत्तिप्रतिघातकाङ्क्षिणे ।
यथार्थबोध (प्रविधान) वेधसे
नमोऽस्तु ते तीर्णभवार्णवाम्भसे ॥ २

क्लमानुविद्धेषु भिदेलिमेषु च स्पृहा कुतो वैषयिकेषु कर्मसु ।
भवद्वचः प्रीतिविलीत (न)चेतसः
पदे परेऽपि क्रमशो विराशिषः ॥ ३

यदि प्रभावो व्यसनोपशान्तये विचेतनानामुपलास्थिवीरुधाम् ।
अनश्वरज्ञानमयस्य किं ततो न ते
प्रभावः प्रभविष्णुरापदः ? ॥ ४

कुतीर्थिनां क्वापि कृतार्चि(र्थि)ता गिरः
क्वचित्तु जीवानुविधातपिच्छिलाः ।
त्रिलोकलोकाभयदानदीक्षिता
जिनेन्द्र ! सर्वत्र तु सूक्तयस्तव ॥ ५

प्रतीपमेतां भवकृत्यनिम्नगां विगाढुमाजीवितवृत्ति यः क्षमः ।
प्रवेशतीव्रामवसानशीतलां स एव वीथीं तव यातुमर्हति ॥ ६

गिरं परेषां भवतन्त्रसूत्रणीं कृताञ्जलिः को न शृणोति सोत्सवः।
वचः पुनस्ते भवतन्त्रसूदनं सकामधीरुद्विजते ततस्ततः ॥ ७

न विस्मयोऽसौ यदमी सुधाभुजो
भुजिष्यतां यान्ति नदीष्णचेतसः ।
स विस्मयो यद्विनमन्ति ते स्वयं
विवेकदुःस्था अपि मेदिनीरुहः ॥ ८

विसम्पदो ये सरुजश्च ये परैस्तिरस्कृता ये न च ये सुमेधसः ।
स्मृता न हास्यादपि नाथ ! तैर्भवत्-
पदद्वयी जातु युगान्तरेष्वपि ॥ ९

न कौतुकं यद् भवतोऽपि शासनाद्
गानाः पराञ्चो जगदीश ! कोटिशः ।
गरीयसी सा ननु भाग्यभूमिका
यया त्वमीशो भगवानवाप्यसे ॥ १०

महौजसश्चेत् प्रलयप्रसादयोस्तथा सतां काममधीश्वराः परे ।
अरोषतोषः परमार्थदृश्वनां
त्वमेव देवः शिवकाङ्क्षिणां पुनः ॥ ११

प्रियाप्रणामश्रमखिन्नमौलयः परे क्व च त्वं क्व च वीतविप्लवः।
भवन्निरासेन भवेच्छिवार्थिनस्-
तथापि तान् केचिदुपासते जडाः ॥ १२

महद्र्धयो यस्य विषेण घूर्णिताः स्मरन्त्यकृत्यानि न ते हरादयः।
अमुष्य कन्दर्प्पसदर्पभोगिनस्-
त्वमेव नाथ ! ध्रुवमाहितुण्डिकः ॥ १३

कुटुम्बभाजां विषयार्त्तचेतसां कुतीर्थिनां वृत्तिमवेक्ष्य पेशलाम् ।
जनो जडः स्निह्यति कामकर्मसु
क्रियां हि सर्वोऽप्यनुयाति शासितुः ॥ १४

ररक्ष पारापतमात्तसाध्वसं यदात्ममांसैर्नृपतिर्भवन् (?) भवान् ।
कृपालुतां ते भुवनेषु घोषय-
न्नयं न विश्राम्यति कीर्त्तिडिण्डिमः ॥ १५

त्रिधानिरुद्धाखिलभूतविप्रियाक्रियासु वृत्तिर्यदि नाम दुष्करा ।
हितैषिणो नाथ ! मनीषिणः पथा
तथापि ते मुक्तिपुरीं यियासवः ॥ १६

जिघांसितारं महितारमेकतो दृशाऽभिषिञ्चन्, करुणार्द्रपक्ष्मणा ।
विशेषदृष्टिं स्वपरेषु हेलया
प्रशातितारं जितवान् न किं भवान् ॥ १७

यमर्थयन्ते मखकल्मषैः परे शतक्रतुश्रीपरिम्भणोत्सवम् ।
स एव ते वाक्यसुधासुमेधसां
विभाति हालाहलतोऽपि दुस्सहः ॥ १८

अवाप्तनिर्वाणमतापनोदयं निरञ्जनं स्नेहनिरासभास्वरम् ।
प्रदीपमेकं जगतां विपश्चितः
श्रयन्ति के त्वां न तमोजिघांसवः ॥ १९

तपश्च तीव्रं विषमश्च संयमो द्वयं त्वया देव ! शिवाय पश्यता ।
कुशावलम्बेन शिवाधिरोहिणः
परे कृताः कस्य न हास्यभूमयः ॥ २०

रहस्यधाम्नां विपदामथोर्म्मिभिर्न ये विषीदन्ति विगीतकर्मसु ।
अवाप्य ते त्वामपि देवदेवतं
चिरं सहिष्यन्ति चतुर्गतिक्लमान् ॥ २१

तव प्रणीतेरनुकूलमाचरन्निहैव लोकः शुभमश्नुते फलम् ।
तदप्यगाधैः स्थगिताः कुकर्मभि-
र्भवत्प्रतीपं विचरन्त्यमेधसः ॥ २२

निषिद्धलोलाविहितार्थविद्विषोऽसमञ्जसज्ञानकरालचक्षुषः ।
उपेक्षिताश्चेद् भवताऽपि मादृशा-
स्ततो भवेयुर्विपदां कुटुम्बिनः ॥ २३

प्रसाध्य ते शर्म हठेन देहिनो
निकृत्य जिवातु जिनेन्द्र ! को नयः ।
पलादमुख्यैः स्वपरौ मुखाध्वना
तदप्यगाधं प्रतिलम्भितौ तमः ॥ २४

इदं कृपापात्रमतल्लिका जगद् भवान् पुनर्विश्वकृपालुकुञ्जरः ।
तदौचितीं स्वस्य परस्य चिन्तयन्
प्रतिक्रियां कामपि कर्तुमर्हसि ॥ २५

तथा त्वया तत्त्वमधीश ! सूत्रितं
यथा सुरश्रीरपि भाविविप्लवः ।
ततः श्रुतैर्वर्त्मनि भोगसाधने
कियत् प्रवृत्तं ग्रहिलेन्द्रियं जगत् ॥ २६

पराशयेभ्यः परभागवासिनः स्थितिक्रमाः सन्तु परेऽपि लक्षशः।
अखण्डवृत्त्या बत तत्त्वपद्धते-
र्जिनेन्द्र ! सन्तः कृपयैव विस्मिताः ॥ २७

नवं नवं धाम नवा नवा रुचिर्नवो नवो वैभवगौरवोदयः ।
तव प्रसादः प्रणयाञ्चितात्मनां
नवं नवं शर्म नवा नवा रतिः ॥ २८

कियद् यशो धाम कियत् कियन्मही रसात ....(अपूर्णा)

पू.आ.श्री धर्मघोषसूरिविरचितम्

# ७५. ॥ श्रीशान्तिनाथ१२भवस्तोत्रम् ॥

(आर्या)

सिरिविस्ससेणअइरासुअं मयंकं थुणामि संतिजिणं ।
बारसभवकित्तणाओ सगणहरं चत्तधणुमाणं ॥ १

रयणपुरे आसि तुमं सिरिसेणनिवोऽभिनंदिआदइओ ।
पढमभवे बीए पुण उत्तरकुरुजुअलिआ दोवि ॥ २

सोहम्मसुरा तइए चउत्थए अमिअतेज-सिरिविजया ।
निवई मिह भयणिवई पंचमए पाणए अमरा ॥ ३

छट्ठे सुमापुरीए अपराइ अणंतविरअ बलविण्हू ।
सत्तमए तं अच्चुअ इंदो इअरो पढमनरए ॥ ४

तो उव्वट्टिअ होउं विज्जाहरराय मेहनाउत्ति ।
जाओ अच्चुयकप्पे सो तुह सामाणिओ देवो ॥ ५

तं विज्जाहरचक्की अट्ठमए रयणसंचयाइ इमो ।
सहसाउ होउ तुह सुओ नवमे दो तइअगेविज्जे ॥ ६

पुंडरिगिणीइ चक्की भायरा मेहरह दढरहत्ति ।
दसमे इक्कारसमे दुण्णि वि देवा उ सव्वट्ठे ॥ ७

चरमे पंचमचक्की संती सोलसजिणो गयउरे तं ।
चक्काउहुत्ति इअरो सुओ गणहरो अ तुह पढमो ॥ ८

पोससिअनवमि नाणं तुह भद्दवबहुलसत्तमी चवणं ।
जिट्ठस्स बहुलतेरसि जम्मसिवा चउदसीइ वयं ॥ ९

एवं देविंदमुणिंदवंदिओ संतिनाहतित्थयरो ।
ससहरसधम्मकित्ती भवेउ भविआण संतिकरो ॥ १०

पू.आ.श्री जिनवल्लभसूरिविरचितम्

# ७६. ॥ श्रीशान्तिनाथचरितम् ॥

(आर्या)

अप्पडिहयधम्मचक्केण फारफुडफुरियनाणरयणेण ।
जेण सयलंपि भरहं, पसाहियं साहियं च इमं ॥ १

तं पणमिय सोलसमं, तित्थयरं पंचमं च चक्कहरं ।
तस्सेव किंचि सुचरियकण-थुणणं किल करिस्सामि ॥ २

इह भरहे रयणपुरे, राया तुममासि देव सिरिसेणो ।
तो इह कुरूसु मणुओ, सुयवसणविरागओ जाओ ॥ ३

होउं सोहम्मसुरो, वेयड्ढे तं अहेसि खयरिंदो ।
अमियगुण-अमियतेऊ, रहनेउरचक्कवालपुरे ॥ ४

छव्वीस दिणे आउं, जाणिय पव्वइय पाणयसुरड्ढिं ।
बीसयरे भुंजिय जंबूदीवरमणिज्जविजयम्मि ॥ ५

पुरीएँ सुभाए अपराजिओत्ति तं हलहरो जिण ! अहेसि ।
पडिवज्जिय पव्वज्जा, तो पत्तो अच्चुइंदत्तं ॥ ६

चविउमिह मंगलावइविजए तं रयणसंचयपुरम्मि ।
खेमंकरनिवइसुओ, अहेसि वज्जाउहो राया ॥ ७

इंदथुय ! चरिय चरणं, चिरमुप्पन्नोसि नवमगेविज्जे ।
अह जंबुद्दीवअट्ठम विजए पुंडरिगिणिपुरीए ॥ ८

घणरहतित्थयरसुओ, मेहरहनिवो भवित्तु पिउपासे ।
पाविय चरणं संचिणिय तित्थयरचक्कहरलच्छिं ॥ ९

उप्पन्नो परमाऊ, सव्वट्ठे तदणु हत्थिनागपुरे ।
सिरिवीससेणपणइणि-अइरादेवीएँ कुच्छिंसि ॥ १०

चउदससुमिणपिसुणिओ, मेसे भरणिकयपंचकल्लाण ।
भद्दवयकसिणसत्तमिनिसाए तं नाह ! अवइन्नो ॥ ११

अवयरिए तइं पियरो, समिच्च इंदेण सलहिया महिया ।
मायाऽसि गूढगब्भा, गिहं च फुडबहुविहनिहाणं ॥ १२

तो जेट्ठकसिणतेरसिरत्तीए कणयवण्ण हरिणंको ।
कासवगुत्ते जाओ, चालीसधणूसियसरीर ! ॥ १३

अह झत्ति जगुज्जोए, जाए चलियासणा करे महिमं ।
छप्पन्नदिसिकुमारी तदणु चउसट्ठिसुरवइणो ॥ १४

गब्भगए चेव तए, असिवोवसमो जओ जए जाओ ।
सुमरणमित्तेणऽवि कुणसि संतिमिय नाम ते संती ॥ १५

पणवीसवाससहसा, कुमरत्ते मंडलित्त चक्कित्ते ।
समणत्ते य तुह गया, पत्ते पुण चक्क(व)ट्टिपए ॥ १६

जाया ते नवनिहिणो, चक्कट्ठपइट्ठजोयणाट्ठुच्चा ।
बारसनवजोयणदीहवित्थडा निहिसनामसुरा ॥ १७

जक्खसहस्सा सोलस, तद्दुगुणा मउडबद्धनरवइणो ।
तद्दुगुणा रमणीओ, आणाणुगया तुह अहेसि ॥ १८

छन्नउई कोडीओ पाइक्काण तह पवरगामाण ।
हयगयरहाण लक्खा, पत्तेयं तुज्झ चुलसीई ॥ १९

बत्तीसबद्धनाडय, बत्तीससहस्स अभिणइज्जंतो ।
तावइयजणवयपहू, अकासि नासियभयं भरहं ॥ २०

कमसो चउदस सोलस, वीसा बावत्तरी य नवनवई ।
संबाह-खेड-गागर-पुरवर-दोणमुह-सहसा ते ॥ २१

आसी तुह पत्तेयं, मडंब–कब्बड–सहस्स चउवीसा ।
दुगुणाणि पट्टणाणि य, चउदसरयणेसर ! जिणेस ! ॥ २२

छप्पन्नमंतरोदग–कुग्गाम–मेगूणवनमन्नं च ।
बहुवित्थडं छड्डिय, चक्किसिरिं निवसहस्सजुओ ॥ २३

चरमवए जिट्ठासिय, चउदसि अवरण्हि तंसि निक्खंतो ।
सहसंबवणे छट्ठेण लट्ठ–सव्वट्ठसिबियाए ॥ २४

सज्जो संजायचउत्थनाण तुह मंदिरे पुरे भमओ ।
बीयदिणे परमन्नं, पारणमासी सुमित्तघरे ॥ २५

वरिसे गयम्मि छट्ठेण तुज्झ पोससियनवमिपुव्वण्हे ।
सहसंबवणे केवलमुप्पन्नं नंदिरुक्खतले ॥ २६

तक्खणखुभियाखिलसुरनिकायकयपढमसमवसरणठिओ ।
छत्तीसगुणधरे गणहरे य गणेऽकासि छत्तीसं ॥ २७

साहुसहस्सा बिसट्ठी चउसयहीणा य साहुणीणं ते ।
समणोवासग लक्खा, दुच्चिय नवई सहस्सजुया ॥ २८

तिनवइ–सहस्स सहिया, लक्खा तिन्नेव देव ! सड्ढीणं ।
चउदसपुव्वीण सयाणि अट्ठ वाईण तिगुणाणि ॥ २९

मणनाणिसहस चउरो, ते तिसयजुया य केवलिजिणाणं ।
ओहिन्नाणि सहस्सा, तिन्नि विउव्वीण ते दुगुणा ॥ ३०

तुह तित्थे विग्घहरा, गरुडो जक्खो सुरो य कंदप्पो ।
चउजामधम्मदेसग !, अमरिंदनरिंदविंदनय ! ॥ ३१

सव्वाउ वासलक्खं, पालिय खालिय समत्थकम्ममलं ।
मासियभत्तेण सएहिं, नवहिं साहूण परियरिओ ॥ ३२

बहुलाए तेरसीए, जिट्ठे सम्मेयपव्वए सामि ! ।
सासयसुक्खं मुक्खं गय ! जिणवल्लह ! पयं देसु ॥ ३३

पू. उपाध्यायश्री विनयप्रभगणिकृतम्

## ७७. ॥ श्रीशान्तिनाथस्तवनम् ॥

अति आणंदि नमेवि, संतिकरणु सिरिसंति जिणु ।
तसु गुणअमियरसेण, बोधिबीजु सीचओ हियए ॥ १

सिरिविससेणनरेसवंसमउडचूडारयण ।
जय जय अचिरादेविकुक्खिसरोवरि हंसवर ॥ २

तुम्ह गुणगहण करेवि, सामीय सुरगुरु नहु सकए ।
सहसनयण सुरराय, रूप न सीमा तुह लहए ॥ ३

हथिणाउरिपुरे देसि, तुह जम्मणि जिण संति हूय ।
इणि करेणि जिणनाह, संति नामु तिहुयणि जयओ ॥ ४

कंचणकोमलकाया, धणुचालीसपमाण तणु ।
मृगलंछण मृगनेत्र, मृगलंछण सुखजगसमुख ॥ ५

अति अलजय आणंदि, दीठउ नयणेऽणंतभवे ।
करि करुणा सिरिसंतिसामीय सम्मुहु जोइ मह ॥ ६

आजु सुदिणु सुविहाणु, आजु जम्मु जगि जागीयओ ।
हिव सिवसुह पामेसु, जउ तणु भेटिओ संतिजिण ॥ ७

नयणिकि अमिय पयट्ठु सयच्छदे हुं रोमंचियउं ।
मणि आणंदु न माइ तुम्ह दंसणि सिरिसंतिजिण ॥ ८

जउ पणमिउ सिरिसंति, चउगइ तुहं गइ दुक्खहरो ।
तउ मनि मानिउ, सामि निच्छइ पामिसु सिद्धिसुहो ॥ ९

कूड कवड पाखंड कीधा, सामि असंख मइ ।
ते सवि खामउ पायपीठि लुठंतओ तुहतणए ॥ १०

कह हउं भारीउ कम्मु, केह संसारु अपारु इहु ।
केह तुह दंसणु देव, अचिरानंदणु संतिजिण ॥ ११

हिव संसारसमुद्द, तारुनी परि हउं तरीउ ।
जीतओ मोहमहल्ल, भुवणभाणु तुह भेटणए ॥ १२

खीरसुधाकरहारकासकुसुमसम तुम्ह जसो ।
गयणि धरणि पायालि, सचराचरि जगि गहगह ॥ १३

जिणवर तुम्ह सरीरि, कंति सरोवरि उल्हसए ।
भूरि भवंतरपापताप सहू जिम उपसमए ॥ १४

षट्खंडपुहवीराजु, त्रिणु परि परिहरि वेगु करे ।
वरि करि संजमनारि, जिणवर जगगुरु तउं हूयउ ॥ १५

चउविह पुग्गलरासि, पूरा सामि अणंत मइं ।
कम्मवसहि संसारि, सार न सामीय तउं नमिउं ॥ १६

सत्तरि कोडाकोडि, सागर संख असंख इम ।
मोहइं मोहिय सामि, तुह दंसणि विणु संतिजिण ॥ १७

अविरइ विरइ कसाय, मोह मह गेह संगहीउ ।
चउरासी लख जीवठाणिहि जिणवर हुं फिरिओ ॥ १८

भगवन् भवह मज्झारि, सारु एहु मइं पामीयओ ।
जओ जिणवर तूय बारि (?) सोथ करउं नितु तू नमउं ॥१९

रोग-सोग-सोहग्ग-दारिद्द-भूय-पिसायभय ।
तुह दंसणि सिरिसंतिदिणयर तमु जिम उवसमए ॥ २०

भद्दव वदि सत्तमि, सवट्ठविमाणह तुह चवीउ ।
अयरादेवीय कुक्खि, मुत्ताहल जिम अवयरीओ ॥ २१

जेठह वदि तेरसि, जम्मणि जगु आणंदियउं ।
चउदसि जेठह मासि, सामीओ संजमु तइं लियओ ॥ २२

पोसमासि सियपक्खि, नवमिहिं केवलनाणु जिणु ।
तेरसि जेठह मासि, सामी सिवसुह संचरीउ ॥ २३

सुरवरनरवरराजिकाजु नही पुण वीनवउं ।
बोधिबीजनओ राजु, भवि भवि मूं दइं संतिजिण ॥ २४

पू. मु. श्री कीर्तिराजकृता

## ७८. ॥ श्रीशान्तिजिनविज्ञप्तिः ॥

सिरिमरुदेसमज्झारि तलवाडयपुरवरि विमल,
विहिचेई सिंगार संतिजिणेसर पयकमल ।
वंदवि विरचिसु भावि भत्थिजुत्त तसु पुणि थवण,
रिद्धिवृद्धिकल्याणमणवंछियसिवसुहकरण ॥ १

पुरि हथिणाउर जेण चवणजम्मवयनाण पुण(णु),
गिरिसम्मेयसिरंमि पामिय पंचमगइ गमणु ।
सोलम जिणवरराय तह पंचम सिरिचक्कहर,
सो महियलि जयवंतु संतिनाह सिरिसंतिकर ॥ २

जिम जिम संतिमयंकु नियनयणिहिं अवलोईए,
तिम तिम चित्ति समुद्दि हरसलहरिभर उच्छलए ।
दुक्खदुरियदोहग्गचक्कवाय विहडय सयल,
पसरइ परमाणंद पुण्यकिरण कुवलयसयल ॥ ३

भास–

हिव पूजिजय संतिजिणु सावधान नियचित्ति,
धावति पहिरवि निरमलि य मनि धरि गरुई भत्ति ।
गंधोदकि न्हा(ण्हा)वेवि तह वरकेसर घनसार,
चंदनि चर्चउं सामितणु जिम हुइ भवनिस्तार ॥ ४

केतकिपाडलबउलसिरिसेवंतीमचकुंद,
वेउलवालओमालतीय चंपककरुणीकुंद ।
बहु परिमल मेलव कुसुम पंचवन्न नवसरी
य रचवि पूजं तह भोग करि भावण भावउं रंगि ॥ ५

(थाठ)

संख भुंगल संख भुंगल, पडह सुविसाल,
कंसालमद्दलगुहिरवेणुवीण वाजंति भेरिय,
जय जय रव उच्छलिय मिलिय सरल सुकुमाल नारिय ।
रास भास नवनवपरिं गाइं नच्चइ च्चं(रं)गि,
संतिजिणेसरवरभवणि उच्छवु हुइ बहुरंगि ॥ ६

भास–(प्रभाती)

न्हवण करि पूज करि संति परमेसरं,
वीनवइ नारि नर विनयपर सादरं ।
अज्जु मह धम्मतरु सफल किर फलियउ,
नाह जय तुम्ह पयकमलि हउं लुलियउ ॥ ७

निव(बि)ड संसारचाराओ नित्थारए,
देव तुह सेव सिवरिद्धि वित्थारए ।
कोहमयमोहलोहेहि संताविओ,
रक्खि जगनाह तुह सरणि हुउं आविओ ॥ ८

जो य मुहपउम तुह हरिस संपिक्खए,
तस्स संगं सयं सिववहू कंक्खए ।
सामि जगभाणु तुह आण जो नर करइ,
तस्स आणा प्रभो तिहुयणे विप्फुरइ ॥ ९

मेह सम सामि तउं अज्ज जइ दिट्ठओ,
दुक्खदवदाहसंताव तओ नट्ठओ ।
उल्लसिउ पुन्नवल्लीवणं सव्वउ,
नच्चए मज्झ मणमोर संतोसउ ॥ १०

थाठ–

विमल केवल विमल केवल, नाण संपन्न,
पणतीस वयणातिसयसहिय तियसवंदेहि वंदिय,
मणिकंचणरुप्पमय समवसरणमज्झारि संठिय ।
वाणी जोईणिगामिणी उवदेसंतउ धम्म,
नयणिहिं दिट्ठओ जेह तउं तिह नर सहलउं जम्म ॥ ११

भास–

गइ ताण सरण आधार दीव, सिरिसंतिजिणेसर जगपईव ।
अविकार निरंजण पुरिससीह,
मह हिययकमलि वसि रातिदीह ॥ १२

एण परि बीयभवणंमि वीरं जिणं,
थुणउं भावेण सिरिं सिद्धिपहसंद(दंस?)णं ।
जस्स झाणेण पावंति कि वि केवलं,
के वि सुररिद्धि कि वि परमपयनिम्मलं ॥ १३

(हरिगीत)

इय भावि भोलइ मनउ लोलइ थुणउं पुरि तलवाडए,
जिणभवणसंठिय सम्मदिट्ठिय सयलसुह संपाडए ।
विससेणनंदण दुगइभंजण सोलमउ तित्थंकरो,
कुणउ मंगलु जसहि निम्मलु तह य वीरजिणेसरो ॥ १४

एवं संति जिणंदो तलवाडागयणमंडले चंदो ।
सिरिकित्तिरायथुणिओ जयउ तह य वीरजिणचंदो ॥ १५

## ७९. ॥ श्रीशान्तिनाथजन्माभिषेकस्तवः ॥

(चउपई)

जय सयलसुरासुरनमियपाय, जय कंचणकोमलकमलकाय ।
जय सुंदरसोहगसिरिसुहाय, जय संतिजिणेसर भुवणराय ॥१

सव्वट्ठविमाणह चविव सामि, नयरिहिं हत्थिणाउरपवरठामि ।
विससेणनरेसरगिहिमझारि, पट्टराणिय अइरादेवि नारि ॥ २

तसु उयरसरोवरि रायहंस, अवयरिउ जिणवर कुलवयंस ।
आइम सत्तमि भद्दवयमासि, रयणिहिं रयणोवम मेषरासि ॥३

चऊदह सुमिणंतर जणणि ताम, निरखइ गयवर मुह महिमठाम।
जेठह तेरसि निसि पढमपक्खि,
जायउ जिणनायग भरणिरक्खि ॥ ४

दिसिकुमरीय छप्पन्न गुणविसाल,
चलियासण आवइ घणरसाल ।
विरचइं सवि निय निय सूइकम्म,
कुल निम्मल तीह सुकयत्थु जम्म ॥ ५

सुरगिरिसिरि लेविण जिणवरिंद,
हिव न्हवण करइं चउसट्ठि इंद ।
जलभरिय रुप्पसोवन्नमयेहिं, मणिमयकलसिहिं जोयणमुहेहिं॥६

तउ बावनचंदन नवकपूर, कसतूरि य केसर अगरु पूर ।
रस मेलवि लेपन नाह अंगि, बहुभंगिहिं लायइं गुरुय रंगि ॥७

इम न्हवण विलेवण भावि धरेविणु, पहिलउं परमानंदभरे ।
चउसट्ठिसुरेसर संतिजिणेसर, रचइं पूज नवनवीय परे ॥ ८

सोवन केवडउ चंपउ गुरुयउ, पल्लवा दमणउ गुरुयउ मरुयउ ।
वालउ परिमलगुणिहिं विसालउ,
बउलसिरि वेउला विमलदलमालउ ॥ ९

महमहइ कुंदमचकुंदकुसुमावली,
बहकए जाइकरुणीय नवनवकली ।
पाडलपरिमल सयलजण मोहए,
सेतसेवंत्रिय सोरभि सोहए ॥ १०

इणि परिहिं अवरवफूलमाला घणी,
लेय सुरअसुरवर देवलोयह धणी ।

विवहपरि पूजि करि संतितित्थंकरं,
तयणु मंडंति पिक्खण मुहं सुंदरं ॥ ११

के वि तहि तूर वायंति बारसविहं,
किन्नरी गीय गायंति सुक्खावहं ।
रुणरुणिइं नेउरा नच्चए सुर वहू,
पिक्खए एगदिट्ठीइ तिहुयण सहू ॥ १२

करि उच्छव भत्तिहिं निम्मल चित्तिहिं
थुणिय हरखि मिल्लेवि जिण ।
सिरिजणणिहिं पासिहिं जिय आवासहिं,
वच्चइं सवि सुरअसुरगण ॥ १३

अवयरियइं कूखिहिं हुईय संति,
इणि करेणि नामिहिं सामि संति ।
जो धणुचालीसपमाणदेहु, मृगलंछण लावनकेलिगेहु ॥ १४

अंतेउर चउसट्ठि सहस भोग, त्यजि षट्खंडमहीयलरज्जजोग ।
जेठह वदि चउदसि दिवसि देव,
संजमसिरि वरियओ पणयदेव ॥ १५

केवलसिरि कलियओ पोसमासि, सिय नवमिहिं पूइयुं इंदरासि।
पयडइ तिहुयणपहु धम्म निच्च,
भवजलनिहिं तारइ भवियसत्थ ॥ १६

सिरिमंडलियचक्कीसरमुणीस, पद वरस सहस्स पंचवीस ।
जेठह वदि तेरसि वरसलक्ख,
संपूरिय सामियु लहइ मुक्ख ॥ १७

ईय थुणिय सुज्झाणिहिं पंचकल्लाणिहि,
अणहिलपुरसिरितिलयवरु ।
सिरिसंतिजिणेसर भुवणदिणेसरु,
हवउ विजय सिवसंतिकरु ॥ १८

महाकवि-स्वयम्भुप्रणीत-
श्रीपउमचरिय-अन्तर्गता
नन्दीश्वरद्वीपे रावणोक्ता

## ८०. ॥ श्रीशान्तिनाथस्तुतिः ॥

लग्गु थुणेहुँ पयत्थ-विचित्तं । णाय-णराण सुराण विचित्तं ॥१

मोक्खपुरी-परिपालिय-गत्तं ।
सन्ति-जिणं ससि-णिम्मल-वत्तं ॥ २

सोम-सुहं परिपुण्ण-पवित्तं । जस्स चिरं चरियं सु-पवित्तं ॥३

सिद्धि वहू-मुह-दंसण-पत्तं । सील-गुणव्वय-सञ्जम-पत्तं ॥४

भावलयामर-चामर-छत्तं । दुन्दुहि-दिव्व-झुणी-पह-वत्तं ॥५

जस्स भवाहि-उलेसु खगत्तं । अट्ठ-सयं चिय लक्खण-गत्तं ॥६

चन्द-दिवायर-सण्णिह-छत्तं । चारु-असोय-महद्दुम-छत्तं ॥७

दण्डिय जेण मणिन्दिय-छत्तं । णोमि जिणोत्तममम्बुज-णेत्तं ॥८

(दोधकं)

परं परमपारं । सिवं सयल-सारं ॥ ९

जरा-मरण-णासं । जय स्सिरि-णिवासं ॥ १०

णिराहरण-सोहं । सुरासुर-विवोहं ॥ ११
अयाणिय-पमाणं । गुरुं णिरुवमाणं ॥ १२
महा-कलुण-भावं । दिसायड-सहावं ॥ १३
णिराउह-करग्गं । विणासिय-कुमग्गं ॥ १४
हरं हुयवहं वा । हरिं चउमुहं वा ॥ १५
सर्सिं दिणयरं वा । पुरन्दर-वरं वा ॥ १६

महापाव-भीरुं पि एक्कल्ल-वीरं ।
कला-भाय-हीणं पि मेरूहि धीरं ॥ १७

विमुत्तं पि मुत्तावली-सण्णिकासं ।
विणिग्गन्थ-मग्गं पि गन्थावयासं ॥ १८

महा-वीयरायं पि सीहासणत्थं ।
अ-भूभङ्गुरत्थं पि णट्ठारि-सत्थं ॥ १९

समाणङ्गधम्मं पि देवाहिदेवं ।
जिईसा-विहीणं पि सव्वूढ-सेवं ॥ २०

अणायप्पमाणं पि सव्व-प्पसिद्धं ।
अणन्तं पि सन्तं अणेयत्त-विद्धं ॥ २१

मलुल्लित्त-गत्तं पि णिच्चाहिसेयं ।
अजड्डुं पि लोए णिराणेय-णेयं ॥ २२

सुरा-णाम-णासं पि णाणा-सुरेसं ।
जडा-जूड-धारं पि दूरत्थ-केसं ॥ २३

अमाया-विरूवं पि विक्खिण्ण-
सीसं सया-आगमिल्लं पि णिच्चं अदीसं ॥(भुजङ्गप्रयातं) २४

महा-गुरुं पि णिब्भरं । अणिट्ठियं पि दुम्मरं ॥ २५

परं पि सव्व-वच्छलं । वरं पि णिच्च-केवलं ॥ २६

पहुं पि णिप्परिग्गहं । हरं पि दुट्ठ-णिग्गहं ॥ २७

सुहिं पि सुट्ठु-दूरयं । अ-विग्गहं पि सूरयं ॥ २८

णिरक्खरं पि वुद्धयं । अमच्छरं पि कुद्धयं ॥ २९

महेसरं पि णिद्धणं । गयं पि मुक्क-बन्धणं ॥ ३०

अरूवियं पि सुन्दरं । अ-वड्ढियं पि दीहरं ॥ ३१

अ-सारियं पि वित्थयं । थिरं पि णिच्च-पत्थयं ॥ ३२

(णाराचं)

धत्ता

अग्गए थुणेवि जिणिन्दहो भुवणा-
णन्दहो महियले जण्णु-जोत्तु करेवि ।
णासग्गाणिय-लोअणु अणिमिस-
जोअणु थिउ मणे अचलु झाणु धरेवि ॥ ३३

महाकवि-स्वयम्भुप्रणीत-
श्रीपउमचरिय-अन्तर्गता
रामोद्बोधिता-

## ८१. ॥ श्रीशान्तिनाथ जिनस्तुतिः ॥

थुओ सन्ति-णाहो । कयक्खावराहो ॥ १

हयाणङ्ग-सङ्गो । पभा-भूसियङ्गो ॥ २

दया-मूल-धम्मो । पणट्टट्ठ-कम्मो ॥ ३
तिलोयग्ग-गामी । सुणासीर-सामी ॥ ४
महा-देव-देवो । पहाणूढ-सेवो ॥ ५
जरा-रोग-णासो । असामण्ण-भासो ॥ ६
समुप्पण्ण-णाणो । कयङ्गि-प्पमाणो ॥ ७
ति-सेयायवत्तो । महा-रिद्धि-पत्तो ॥ ८
अणन्तो महन्तो । अ-कन्तो अ-चिन्तो ॥ ९
अ-डाहो अवाहो । अ-लोहो अ-मोहो ॥ १०
अ-कोहो अरोहो । अ-जोहो अ-मोहो ॥ ११
अ-दुक्खो अ-भुक्खो । अ-माणो समाणो ॥ १२
अ-जाणो सजाणो । अ-णाहो वि णाहो ॥ १३

पू.आ.श्री जिनप्रभसूरि विरचितम्

॥ पारसी भाषा चित्रकेण ॥

## ८२. ॥ श्रीशान्तिनाथाष्टकम् ॥

[१]

अजि कुद काफु जुनूवि शहरि हथिणापुरगोवनि
वजिपातसाहि विससेणु खिम्मिति ओ राया जेवनि
कौम्यो ऐरादेवि तविहि सीतारा मानइ
जुजि यकि सूहरि षास दिगरि हिम पियरा दानइ
आं दिगरि रोजि षुफ्लसि षुसे दर निगार रवानै निषो
छारिदह वाविअह संदिवइ आषरि सौ विनइ हमो ॥

[२]

नेकिस्पे नरगाउ पीलि दरियाउ निशाना
वा नर्गिसि पुरु हौदु कुम्कु उजुलू सदियाना
शमस कमर पुरु सुवो दिगरि मोंहरिसा तूदा
कसरि अजनित्फिमारिष्टिगा सेरि आतसि रुषसिंदा
गह सुबुहु सुदा वेदार सुदु, रल्फु गुल्फु वरिसूइ षो
माविनी ष्वाव दीदौमि सौ चि सवइ षोदिह काम गो ॥

[३]

पातसाहि विससेणु पेसि अहिरादिवि गोयइ
पिसरि तु हमची सवइ मुलुकि दुनिए उर जेवइ
विस्नी दो चो चिनी कवी षुसि सुदु दिलि षासा
दमलु नेकि परवरइ निको सीरति मे वासइ
चू हल्फु रोजि नूहु माहु सुदु, शव दुपास दरि षुल्फि गह
विहतरी वल्फि तालिहि निको, पिसरि जादु उ हम चु मह ॥

[४]

दरं सहरि मक्कूर राख्सि शादी इवि कउदनि
कुव्वा जाइ पि जाइ तवल नुहु गाना विजनि
मीर मुकद्दम साहि दरां शादीहरिक्यामा
पातसाहि विससेणि दादु हमगा रा जामा
द्वाज्द हमि रोजि सुदु नामि उर, संतिनाथु ष्वामदि महं,
बुजुरुकु सुदे सिस्तो तष्ति, मुलुकु विरानइ दरिजहा ॥

[५]

गौहरी पाक दुहल्फु गंजि नुहु जरि पेरा वा
फंदलि कुननि फेरिष्टिगा शांजूदह जारि हमा वा
सस्तुध्यरि हज्जारि कौमि दरि हर्मि निकोतरि
लख हष्टादु छ्हारि पीलि व अस्पि व अस्तरि
शशिनवदु क्रोडि दिहहा मिही कियासि पयादा हम चुनी
अउलाति सी उदु हजारि ओ राया पि हम व हम दुनी ॥

[६]

रोजि दिगरि दानिस्तु नेसि हिचि दरी जमाना
हरि चि ईसाति नुमाइ अवियक साति न माना
सदका दादा गिरिल्फुजरीं दीनार न नुकरा
यक कुरोडि लख हष्टि-दिहइ हररीजि कदरे
से सदु व हष्टि हष्टा कुरोडि हष्टा लख यकि सालि दादु
ई चुनी मुलुकि दौलति चिनी, तरकि गिरिल्फा सेष सुदु ॥

[७]

हल्फु तवक आसमा जमी हर हल्फु मुदौवारी
वीनइ हमचु चरागु हचि दरि दुनी मुनौवरि
मे दानै दरि गैवि हमा मुस्किल हल विकुनै
रहनुमाई गुमरहा तवह वजगारी विजनइ
ई चुनी सक्लित आषरि उमरि दरि सवावि सालहा सुदु
अल उमरि चूकि पि तमामि सुदु, भिष्टि रल्फु एमिना सुदु ।

[८]

नामि तुष्वामदि संतिनाह हरि कि से कि गोयदु
हमा चीजि उर सवइ फुल्लुइव्वुनो वुगोयदु
अजि सेवस्तां गहिल कुंउ पंज्या उ सलामति
खाना विरसादारि पि हम इज्जति जरि दौलति
मिंजुम्लै गुनहा वकसिमे बुकुं रहमलुरुफु इं कदरि
अजि अदावि दुनीए निगहदारि, मरा भिष्टि वरियो बुवरि ।

[९]

अजि तेरीष मुहम्मद सन खमस व तिसईन सित्त मिय ।
फितिरीदी शशिमिसरा कउदांमु दौलती वामी

पू.आ.श्री हेमचन्द्रसूरिविरचितः
समवसरणभुवि शक्रेन्द्रकृतः

## ८३. ॥ श्रीकुन्थुनाथ-जिनस्तवः ॥

(अनुष्टुप्)

चतुर्धा धर्मदेष्टारं, चतुर्गात्रं चतुर्मुखम् ।
चतुर्थपुरुषार्थेशं, त्वां स्तुमः परमेश्वरम् ॥ १

चतुर्दशमहारत्नीं, निःसङ्गत्वात्त्वमत्यजः ।
रत्नत्रयीं त्वनवद्यां, दधासि जगदीश्वर ! ॥ २

मनो हरसि विश्वस्य, निर्मनस्कस्तथाऽप्यसि ।
उत्तप्तस्वर्णवर्णस्त्वं, ध्यायसे चेन्दुसन्निभः ॥ ३

निःसङ्गोऽपि महर्द्धिस्त्वं, ध्येयोऽपि ध्यातृताऽऽस्पदम् ।
कोटिशोऽप्यावृतो देवादिभिः कैवल्यभागऽसि ॥ ४

विश्वस्य रागं तनुषे, वीतरागोऽसि च स्वयम् ।
अकिञ्चनोऽपि भवसि, जगतः परमर्द्धये ॥ ५

अविज्ञेयप्रभावायाऽ-ज्ञेयरूपाय तायिने ।
नमो भगवते सप्त-दशाय भवतेऽर्हते ॥ ६

प्रणामोऽपि त्वयि विभो !, ऽचिन्त्यचिन्तामणिर्नृणाम् ।
किं पुनर्मनसा ध्यानं, स्तवनं वचसाऽपि वा ॥ ७

प्रणामे स्तवने ध्याने, प्रभो ! त्वद्विषये मम ।
प्रवृत्तिः सर्वदाऽप्यस्तु, कृतमऽन्यैर्मनोरथैः ॥ ८

पू.आ.श्री जिनप्रभसूरिविरचितम्

(केवलाक्षयमयम्)

# ८४. ॥ श्रीअरनाथस्तवनम् ॥

(गुणमणिनिकर)

जय शरदशकलदशहयवदन जय हतजगदसहनमदमदन ।
जय नतशमगतश मनजकदन जयभगवदरपरमपदसदन ॥ १

गतमलकमलसकलकरचरण जननमरणभवभयभरहरण ।
रचय चरणरसनशबलस्वन मनवमसनवमरसरमवचन ॥ २

नवरचनरतदशशतनयन नयवनजलदजलजदलनयन ।
फलद कलकलयजयकरयजन नमदशमपहरशममन्भजन ॥३

अमरफलदपदहर पदमकल गजकरसरलसबलकरयमल ।
जनयसनयमतनतजनसकल मतफलमपमलकलमलमकल ॥ ४

नयमयवचनपवनसमवमत परमतजलदपटलमनसमत ।
शमदमयमसमरसरमसमय भवपतनजभयमज मम शमय ॥५

घनखकनकशकलघनवरभ मदकलकरणकलभजयशरभ ।
शरणदचरणनरकदर शमन सदयमदघमफलयगजमगमन ॥६

नतशतमखतमखलजनमदर गमयपरमपदमभयदसदर ।
नवनवभववनभवदशमगम शकलनगजकलगलदन-वगम ॥७

तमचयमपनयतपमहतपन परसमयजरजहरपदजपन ।
समज नदमनकमनगजकरट दलनसबलतमहतमदचरट ॥ ८

मदनयनगमशरणनरशरण गतरणसदवतरणवरकरण ।
परसहचरसमरसजगदवन समवसरण रमदहमहभवन ॥ ९

सततमचरचरजगदवगमक मननजनकथनतरतमशमक ।
परपदनगरगमनरणरणक मफलदशमसफलयपथभणक ॥१०

रसभर लसदनलसनमदमन भवनपवनचरनरयतसमर ।
दलयबहलमलमरवरवशत मतरतनरशतगतपरवशत ॥ ११

कपटशकटजलशयसमनवक जनमवगमय समयरसमवक ।
गदगजरणफणधरदकदहन धनहरमरकजदरहरमहन ॥ १२

समतसतमहपरमतकलस गणधरगणधरशमरसकलस ।
भवदभवदपदलयलस दवम वनमवनमयसहनमहनवम ॥१३

एवं श्रीअरतीर्थराज तव यो दुःकर्मरोगच्छिदा कामः
केवलवर्णसंस्तवसुधास्वादं विधत्ते सुधीः ।
श्रेयो वा न जरामर त्वपदवीसौख्यानि बाह्यन्तरा
मित्राली जय सुंदरः स नियतं शिश्रीयते मानवः ॥(शा.वि.)१४

पू.आ.श्री हेमचन्द्रसूरिविरचितः
समवसरणभुवि शक्रेन्द्रकृतः

## ८५. ॥ श्रीअरनाथ-जिनस्तवः ॥

(अनुष्टुप्)

जय त्रिभुवनाऽधीश !, जय विश्वैकवत्सल ! ।
जय कारुण्यजलधे !, जयाऽतिशयशोभित ! ॥ १

विश्वप्रकाशनं भानो-रमोघैर्भानुभिः सदा ।
विश्वसन्तापहरणं, ज्योत्स्नया च हिमद्युतेः ॥ २

जगज्जीवनमऽम्भोभिः, प्रावृडऽम्भोधरस्य च ।
जगदाऽऽश्वासनं वायो-र्गत्या सन्ततयापि च ॥ ३

यथा निष्कारणमिह, तथा ते परमेश्वर ! ।
जगत्त्रयोपकाराय, प्रवृत्तिर्जयति प्रभो ! ॥ ४

अन्धकारमयं चाऽसी-दन्धं वा जगदऽप्यदः ।
सप्रकाशं सेक्षणं वा, त्वया जज्ञेऽधुना पुनः ॥ ५

नारकाणां खिलः पन्था, भविताऽतः परं प्रभो ! ।
तिर्यग्योनावपि गतिः, स्तोकस्तोका भविष्यति ॥ ६

सीमग्रामाऽन्तराणीव, स्वर्गाश्च प्राणिनाममी ।
प्रत्यसन्ना भविष्यन्ति, मुक्तिरप्यदवीयसी ॥ ७

त्वयि विश्वोपकाराय, विहरत्यवनीमिमाम् ।
भावि किं किं न कल्याण-मसम्भाव्यमपि प्रभो ! ॥ ८

उपा. श्री वल्लभविजयविरचितः

## ८६. ॥ श्रीअरनाथजिनस्तवः ॥

(सहस्रदलकमलमयः)

असुरनिर्जरबन्धुरशेखर-प्रचुरभव्यरजोभिर पञ्जिरम् ।
क्रमरजं शिरसा सरसं वरं, जिन ! रमेश्वर ! मेदुरशङ्कर ! ॥ १
(द्रुतविलम्बित)

प्रवरवर्णरसागरचन्दिर ! जठररागरसाविरसङ्गर ! ।
मुचिरकृन्नरभीतदभद्रर !, कुरु रमं भरमामरहत्यर ! (यु.) ॥२
(द्रुतविलम्बित)

प्रदरपार्परदन्तुरभूधरभिदुरतुल्य ! रसासर ! कं कर ।
कुनरकाकरदादरकस्वर ! विदुरजेसरभक्तरमुत्कर ॥ ३
(द्रुतविलम्बित)

मुहिरगर्वरदुर्द्धरसिन्धुर-विशरणाकरसिंहरहोऽगरम् ।
चतुरनं जरसाऽधरमं स्मर, शिवरमं वरसंवरबुद्धिरम् ॥ ४
(द्रुतविलम्बित)

सुहीरसच्चीरविहारसीवर-प्रतारसाधारणकारवार्दर ! ।
जनौर ! निर्मेरणधोरणीस्फिरं, मनोरमास्वारवतो रतक्षर ! ॥५
(वंशस्थ)

डमरदुर्ज्वरतस्करभीभर-प्रहरणाविरह किरताद् दरम् ।
सुकुरतीर्णरदस्वरधीघरः प्रसरकीर्त्तिरजाहरनिर्दरः ॥ ६
(द्रुतविलम्बित)

चकार हिंसीरविशारणं गिरः, उदारसम्भारसुधोरकेकरः ।
अमारमन्दारसमीरकन्धर-प्रकार आचारविदीरनीवरः ॥ ७
(वंशस्थ)

विभोरमोमोरमगोरगोचर-विकारसंहारकरोरडिङ्गरः ।
जहार कण्ठीरववारसत्तर !, स वीरकः स्मेरमुखो रसातिरम् ॥८
(वंशस्थ)

भमरवृत्तिरनन्तरमक्षरं, वितर मे ह्यरणः सुरकन्नर ! ।
इषिरवागरभन्दरचत्यरः, कमरतामरसाक्षिरमाधरः ॥ ९
(द्रुतविलम्बित)

चटरविघ्नरवैरिरसाहरः, स्वतरसा स्परणं करताद् गरः ।
सुनर आदरतः स्मरतीदरः, स विरसः सरलस्वरणस्तरः ॥१०
(द्रुतविलम्बित)

सुचरणं चरतः किरतः करं, प्रहरतः करणं धरतः सुरम् ।
व्रतरतश्चिरमाशरणाङ्करः, सुनुरकं क्षुरतादुरगादरः ॥ ११
(द्रुतविलम्बित)

धीरैरमारिरमृतं रडामरं, सभ्यैरभाणि रसनं रतान्तरम् ।
उच्चैरभीतिरनगारशिशिरः,
पातूरनूतिरनपूरघृष्टिरम् ॥ (इन्द्रवंशा) १२

अररतात् परणं जरणं भर–मररहच्च र आभरपा खरः ।
नघरणं शरणं वरताद् घुरः, सुखरयोऽमरदो मरतस्मरः ॥ १३
(द्रुतविलम्बित)

चुकोर भट्टारकपौरयोः पुरः, शमारवाहारमदौरघर्घरः ।
कठेरकान्तारसुवारणस्थिरः, कठोरकालूरविदारसायुरः ॥ १४
(वंशस्थ)

विज्ञैरमानैरसितैरकारि रमच्र्यैरनाकैरहतेररुड्भिर ।
देवैरसानैरसनेरसंहर ! लक्ष्मीं ररौ धीरकुटेर ! सोऽध्वरः ॥१५
(इन्द्रवंशा)

ववार लक्ष्मीररतीरधीश्वरः, समौरकण्डूरसुधीरकट्वरः ।
सुधारभृत्पूरतुषारदीप्तिरः, सुनारशौण्डीरकुटीरतुष्टिरः ॥ १६
(वंशस्थ)

भव्यैरगोभिरहितैरयुतैरकह्वरं, हनैरधीभिरमितैरकरैरदुर्मुरः ।
सुस्वैरमाररमणैरजितैरकार्यरं,
पुष्टैर नूतिरगदैरनरीरतेः पुरः ॥ (मृदङ्गक) १७

कठरकदरभङ्गे रम्यसारङ्गसारं,
मठरविसरनाशं रण्डभारण्डचारम् ।

अमरनिकरपूज्यं रङ्गकारङ्गपारं,
वमरकृदरसङ्गारत्तमारं सुतारम् ॥ (मालिनी) १८

विभुरनकरसङ्गारञ्जितारक्ष्णशूर-
प्रषुरजदरहोभी रक्षकै रज्यसेऽर ! ।
यतिरदितिरहङ्कारक्षितेरक्षधार-
मकरमुदिरसुश्रीरट्टसंरम्भवारः ॥ (मालिनी) १९

नाथैरनुत्तरनरैरभिहारसत्वर-भद्रैरदैररहरैरमलैरघाशरः ।
देवैरवस्कररहैरवहारकूत्कर-
नष्टैरपाठि रसिकैरदैरवल्लरः ॥ (मृदङ्गक) २०

खरुरभिमरनाशं रञ्जनारन्तिभूर-
हमुर दधर बाढं रङ्कनादङ्गमौर ! ।
प्रखरमिहिरकान्तेरन्धकारक्षयोर-
समररिपुरनिष्टारक्षसोऽरम्भधूर ! ॥ (मालिनी) २१

विदारहर्त्तारमकारशाङ्करं, विहारकर्तारमशारभास्वरम् ।
बभार चित्ते रमणीरसानरः ककारकं तारकधारके उरः ! ॥२२
(वंशस्थ)

तनुरवसरत्तेरर्कसेरस्तदार !, प्रसुरति मुरविष्टेरंहतेरश्चतेर ।
प्रवरभृदररे ! भारत्यमेरस्यवेर !
नवरजतरणेरेरङ्कारण्डजेर ॥ (मालिनी) २३

पूज्येरघोरैरमदैर ! जेतरं, नेतारमायोरनयरपासुरम् ।
धर्त्तारमहेरगसो रषं त्वरं, पातारमस्तेरकलेरमुष्करम् ॥ २४
(इन्द्रवंशा)

अवरहसरथाङ्गारव्यवारण्डरोर-
वृषरवणरसालौरम्यलेरङ्कदूरम् ।
गुरुरवलिरधृत्योरङ्गनो रश्मिदोर-
गिरिरशिथिरबुद्धिं रक्षतात् रच्यगूरः ॥ (मालिनी) २५

कारोरनीतेरधृतेरदोषर ! दारोरवाचो रजनीरभीरुरम् ।
सद्घोरनर्त्तेरमृतेरनभ्बरः, सन्नोररिष्टेरभृतेरकर्करः ॥ २६
(इन्द्रवंशा)

सृमरमुदिरसेरोरर्थधेरत्खिरखीरं,
ननर निगरणाश्चेरच्छपेरुम्बगारम् ।
सुमरठिकरटीतेरस्तजारण्डमार-
मधुरनविरलक्षे रथ्यदेरस्त्रपेर ॥ (मालिनी) २७

लोकैरशोभि रपनैरपनैरखिङ्खिरः, पूतेरमातिरतरेरकदैरघस्मरः।
सुश्रीरनेमिरनतैरसुधेरतोमर-
प्रष्ठैरदुःखरजकैरवनैरमत्सरः ॥ (मृदङ्गक) २८

अकरणिरररस्यौरस्तु कारण्डकौः ! रो,
बधिरविखुरणाध्रोरश्च वारङ्गतोर ।
रुचिरखदिरदीप्तेरर्घ्यखोरत्तिहार !,
स्वदरवृदरपल्लूरस्य वैरङ्ग ! पूर ! ॥ (मालिनी) २९

यक्ष्यैरचोकू रपठै रमठ्यरः, सत्कारभूनीरनयेरगत्वरः ।
सभ्यैरधीशैरधनैरपक्मरः, कष्टैरनन्तैरदशैरकच्छुरः ॥ ३०

गुरुरनपरथा कं रङ्कदीरट्यपारः,
खलु रचय रतीसारक्षकारण्यवीरः ।

विमरणपरमात्माऽऽरब्धनीरन्ध्रकोर-
घनरससुरभिर्नेरब्जदृग्रत्ननूरः ॥ (मालिनी) ३१

संसारदुस्तरसुनीरधितारकानुर-
दूढ्यैरपातिरसितैरहसैरखर्परः ।
सिद्धैरगायि रमतीरसितेरहोऽध्वरः,
ख्यातैरदातिर शतेरगतीरकूबरः ॥ (मृदङ्गक) ३२

अविरतमर ! तुष्टोरस्कतौरर्हदीरः,
प्रचुरय विरजं कारम्भभूरर्जसोरः ।
यतिरकुचररासेरस्यवैरप्रजौर-
स्तिमिरखिदिरतम्यारत्विडा रक्षितारः ॥ (मालिनी) ३३

वृन्दारकागरजिनोरसमौरकर्बुरः, प्राज्ञैरसारि रदमौरशरैरनिर्वरः।
भव्यैरमालिरभसैरनिभैरजर्जर-
दुर्वारकङ्करविदैरजितैरसंस्तरः ॥ (मृदङ्गक) ३४

प्रभुरचतुरवित्तारक्षवैरङ्गिकारः, शुभरथविरहक्षोऽरम्रशारण्यसौरः।
अनरणिरिररिष्टेरङ्गरेऽङ्ग्जूरः,
पटुरकृतिरराकाऽऽरक्षपूरम्यखोर ! ॥ (मालिनी) ३५

पपर प्रकरणावेरद्र्धपूरण्यभेर-
जितरवपरपुष्टाः ! रद्धधीरङ्ग्यधेर ! ।
सुनुरशिखरदप्येरर्घ्यधोरप्रभोर !
कनिरतवरधर्त्तारः कपारय्यदोर ॥ (मालिनी) ३६

सोऽकारयद् वरक ! हारकदारजीवरः
सर्म रमण्यरणतेरपचारकर्षिरः ।

नेतार आशिरपमारय आरवन्त्यर-
मर्होर प्रत्युरसनौरलभूरशावरः ॥ (मृदङ्गक) ३७

सज्जूरनश्र ! सुसोर किशोरभास्वरः,
कर्पूरहृत्करगुणोऽथकारमेधिरः ।
मच्छारदीनरधनैरविशारदागर-
प्राग्भारविड्वरवियुक् रदनौरमन्थरः ॥ (मृदङ्गक) ३८

बुद्धैरबोधि रतिभूरशनैरनघ्नर-नम्रैरसूतिरयमेरदरैरदुर्द्धरः ।
सेव्यैरकच्चरवरैरमभैरसेश्वरः, साक्षेरनूतिरदहंरपरैरमुर्मुरः ॥३९
(मृदङ्गक)

कविरमसुरसंस्कारः पदारप्रभारः,
प्रसुर उदरभूसीरः कुटारः कुबेरः ।
चतुरकदरकेदारप्रनग् रद्विचारः,
शबरविधुरशृङ्गारक्षरोरङ्ग्यहोरः ॥ (मालिनी) ४०

पस्फार संसरणनीरधितीरमित्वर-
नोद्धारपुष्करसुसूरविदारजित्वरः ।
सुश्रीरकन्तुरसकौरपकौ रशान्त्यरः,
शान्तोरयोनिररतेरहतेरधूसरः ॥ (मृदङ्गक) ४१

विजर ! विकर शुभ्रेरं नसारण्डझार-
गमिरटगरगान्धारप्रहेरस्वपोरः ।
छिदिरविधरदण्डास्वभूरर्ज्यदीर,
प्रवरपदरविन्दो रम्वसूरथ्यधूरः ॥ (मालिनी) ४२

हृष्टैरकान्तिरमहैरजदैरपामरः,
कान्तैर ! सौषि रचयै रमथेरमुद्गरः ।

काश्मीरजार्चिरकुठेरकथेरपीवर-
निश्चौरकः करचनोरलधूरभङ्गरः ॥ (मृदङ्गक) ४३

बन्धूरनागरकभैरवचोरडस्फरः,
कर्जूरवाशुरविमीरखटूरकर्परः ।
पिण्डारशार्वरमसूरनिकारशाक्वरः,
साधून् ररक्ष रजतीरवनोरदर्वरः ॥ (मृदङ्गक) ४४

मृदरनिकरहारी रन्ध्रहोऽरक्षदाऽरः,
शिबिरभिदिरकृद् गौरप्रजीरः पवीरः ।
बठरवरवित्ती रम्भतीरम्मदा रः,
सदुरसिलररुक्रूरक्षपारक्कुरीरः ॥ (मालिनी) ४५

अर्मारर नुररणेरमतेरभर्भर !,
खेतेरमर्मरनुतेरगतेरपत्सर ! ।
धीस्थूरकर्बरभजेरजजेरनातुर !,
न्यक्कारहानिररपूरप्रतारणाघर ! ॥ (मृदङ्गक) ४६

लक्ष्मीरबीभरदभीरतवेरटेतरः, साधूरकर्तृरगुरोरहरेरदुष्करः ।
सह्योरसूकरमनोरथपारभुर्भुरः, सह्लीरऽझर्झरसवीरतरेरगह्वरः ॥४७
(मृदङ्गक)

वन्दारवो ! निरयदारव ! आं ररास रः,
कञ्जारवो ! धरणधारण एरपञ्जरः ।
श्रीसारसासरणिपूरणसारणासिर-
विस्तारकोऽगिरचूरणजारतत्परः ॥ (मृदङ्गक) ४८

पुस्फोर कीर्त्तिरदनारतमेरमन्दिर-
रन्तेरतूबरचकोरनिशारमण्यर ! ।
रैहारयो हरय औरसवारकातर-
कंसेरवो मरकशूरणनीरवित्युर ! ॥ (मृदङ्गक) ४९

किर्मीरचङ्कुरनुगौरवकेरडस्पर,
काण्डीरयोद्धृरवतार ! ततार भास्करः ।
कल्हारदृष्टिरनवीरनुदारथित्वरः,
कासारसच्छर्रगतीरजनीदमन्दरः ॥ (मृदङ्गक) ५०

सनिरपुनरगर्हो रम्फसूरं ननार,
जयिरकररलोकरर्कितोऽरत्निधीरः ।
पदिरबिदिरतप्रारम्भदौरम्ब्यगीर,
विहरणिमरणीमीरर्कसूरः प्रटारः ॥ (मालिनी) ५१

स्थविरमुनिरधीवा रण्टगत् रंहखोरः,
सरिरजकरदीप्रो रङ्कुचोरप्रघोरः ।
चमरजितिरखर्जूरः सुसौरभ्यकारः,
सुपरमपरमेष्ठी रम्बतीरः पपार ॥ (मालिनी) ५२

सत्पूरशर्करविभूरकडार ! वासरं,
भण्डीरकिङ्करकटीरगभीरकः किर ।
वापीरचारुरणतीरपटीरसुन्दर-
कोटीरपुष्यगथहेरसहोरकुञ्जरः ॥ (मृदङ्गक) ५३

प्रसरसुपरवाणेरं ददार प्रखौरः
सुगिरयत्र्करभर्त्तारः परीरः स्वनेरः ।

कनिरसनरवृद्धेरर्ज्यधीरंभ्यगोरः,
पतिरचिकुरसाधोरर्बसंरग्यलीरः ॥ (मालिनी) ५४

इत्थं देवेन्द्रसङ्घप्रणतनरपतिह्लाददस्तीर्थनाथो,
भद्रं दद्यादरः सोऽभिमतधृतिततिप्राप्तिदः प्राप्तमुक्तिः ।
ख्यातश्रीवाचकज्ञानविमलसुगुरूणां प्रसादाद्धि यस्य,
चक्रे श्रीवल्लभेन प्रदलदशशताम्भोजगर्भस्तवोऽयम् ॥ ५५
(शार्दूलविक्रीडित)

## ८७. ॥ श्री अरनाथजिनस्तोत्रम् ॥

॥ एकाक्षरं विचित्रकाव्यम् ॥

रोरारेरां ररीरीर, रैरीरा रैरुरीररं ।
रुरोररुरु रे रोर-रुरोऽरा रिरुरारिर ॥ १

रोरारेरार रीरीर, रैरीरा रैरुरीररं ।
रुरोररुरुरेरोर-रुरो रारिरु रारिर ॥ २

रोरारेरा ररीरीर-रैरीरारैरुरीररम् ।
रुरोररुरे रोरु-रुरो रारिरुरा रिर ॥ ३

रोरारेऽरा ररीरी र-रैरीरारैरुरीररम् ।
रुरोऽररुरु रे रोरु-रुरो रारिरुरारिर ॥ ४

पू.आ.श्री हेमचन्द्रसूरिविरचितः

समवसरणभुवि इन्द्रादिकृतः

## ८८. ॥ श्रीमल्लिनाथ-जिनस्तवः ॥

(अनुष्टुप्)

दिष्ट्या प्रणमतां भाले, त्वत्पादनखरश्मयः ।
भवन्ति भवभीतानां, रक्षातिलकसन्निभाः ॥ १

आजन्मब्रह्मचारित्वा-द्दीक्षा ते जन्मतोऽपि हि ।
व्रतपर्यायदेशीयं, मन्ये जन्माऽपि तत्तव ॥ २

किं देवसद्मना तेन, न यत्र तव दर्शनम् ।
इदं तु भूतलं श्रेय-स्त्वदाऽऽलोकपवित्रितम् ॥ ३

नृदेवतिर्यग्जन्तूनां, भीतानां भववैरितः ।
दुर्गं त्वदीयं समव-सरणं शरणं प्रभो ! ॥ ४

कुकर्माण्यन्यकर्माणि, त्वत्पादप्रणतिं विना ।
यैः कर्माण्येव सूयन्ते, संसारस्थितिकारणम् ॥ ५

दुर्ध्यानान्यन्यध्यानानि, भवद्ध्यानं विना खलु ।
यैरात्मा बध्यते बाढं, निजैर्लूतेव तन्तुभिः ॥ ६

कथाश्च दुःकथा एव, भवद्गुणकथां विना ।
यकाभिस्तित्तिरिरिव, वाग्भिर्विपदमश्नुते ॥ ७

त्वत्पादपद्मसेवायाः, प्रभावेण जगद्गुरो ! ।
भवच्छेदोऽस्तु यद्वाऽस्तु, त्वयि भक्तिर्भवेभवे ॥ ८

## ८९. ॥ श्रीमल्लिनाथस्तोत्रम् ॥

(भुजङ्गप्रयात)

जिनेन्द्रस्य यस्यास्ति जङ्घायुगं च,
वरेण्येन्द्रहस्तीन्द्रहस्तोपमं तत् ।
समं यस्य सङ्गुप्तजानुद्वयं वै,
स सन्मल्लिनाथो जिनो मां पुनातु ॥ १

सुरम्भोपमं यस्य सारोरुयुग्मं,
सुवर्णस्य काञ्च्या युतं श्रोणिचक्रम् ।
लुलद्भृङ्गवद् भाति रोम्णःसुराजिः,
स सन्मल्लिनाथो जिनो मां पुनातु ॥ २

प्रभामण्डलैर्मण्डितं नाभिपद्मं,
त्रिभिः पङ्क्तिभी राजमानं पिचण्डम् ।
विशालं विभाति प्रभोर्यस्य वक्षः,
स सन्मल्लिनाथो जिनो मां पुनातु ॥ ३

सुराजीववद्राजते पाणिपात्रं,
जिनाधीश्वरस्य प्रभायुक्तगात्रम् ।
ध्रुवं कम्बुसत् कण्ठपीठोपमानं,
स सन्मल्लिनाथो जिनो मां पुनातु ॥ ४

स्फुरत्कौमुदीकान्तसद्वक्त्रपद्मं,
गजेन्द्रेण तुल्यं च कम्रं प्रयाणम् ।
पक्वाम्रताम्रं विभात्योष्ठयुग्मं,
सन्मल्लिनाथो जिनो मां पुनातु ॥ ५

शुभादभ्रलक्षार्जुनश्वेतदन्त,
ततिर्भाति यस्य प्रभोर्नित्यमेव ।
विशालारुणश्रीयुतं दृष्टियुग्मं,
स सन्मल्लिनाथो जिनो मां पुनातु ॥ ६

## १०. ॥ श्रीमल्लिनाथस्तोत्रम् ॥

(उपजाति)

श्रीकुम्भभूपालविशालवंशनभोऽगणोद्भासनशुभ्रभानुम् ।
प्रभावतीकुक्षिसरोमरालं, वनाम्यहं मल्लिजिनेन्द्रचन्द्रम् ॥ १

जन्माऽभिषेके किल यस्य शक्रैः, प्रलोठितैः क्षीरसमुद्रनीरैः ।
विराजितो राजितवान् सुमेरुर्मल्लिर्मुदे सोऽस्तु ममावलम्बम् ॥२

अचिन्त्यमाहात्म्यनिरस्तसर्वप्रत्यर्थिजालंवनवैभवं तत् ।
स्वदर्शनं मल्लिजिन ! प्रयच्छ, प्रसीद मेऽहम्मतिभेदि देव !॥३

अनन्यसामान्यवरेण्यपुण्यप्रागल्भ्यलभ्यं भुवनाभिरामम् ।
त्वद्दर्शनं नाथ ! कदा समस्तं, श्रिया विशालं वनजं श्रयिष्ये ॥४

नीलेन्द्रकालं वनवाहमुच्चैस्तत्त्वावबोधक्रमसेवनेऽहम् ।
श्रीमल्लिनाथं जगतीशरण्यं, भावारिभीतः शरणं श्रयामि ॥ ५

(इन्द्रवज्रा)

सदा चिदानन्दमयास्तमोहमल्लेन मल्ले ! भवितासि देव ! ।
कदा निरालम्ब निरञ्जन त्वं, कुम्भाङ्कितः केवलसंविदे मे ॥६

अध्यासिता हे जिन ! मुक्तिकान्ता, हृदन्तरालम्बनजोपमानम् ।
श्रीमल्लिनाथांह्रियुगं कदा तेऽवतंसयित्वा प्रणतोत्तमाङ्गः ॥ ७

मल्ले नमल्लेखभवान्धकूपे, पतन्तमालम्बनवर्जितं माम् ।
स्वभारतीवर्यवर ! त्वया त्वमालम्बयालम्बनविष्टपस्य ॥ ८

मल्लीशमल्लीसमधर्म्मकीर्त्ते, महोर्ध्वकश्मीरजलिप्तविश्वः ।
अलेरिवालं निजपादपद्ममालम्बनं मे मनसः प्रयच्छ ॥ ९

पञ्चकल्याणककलितैकविंशतिस्थानगर्भितम्

## ११. ॥ श्रीमल्लिजिनस्तवनम् ॥

पणयजणकप्पवल्लिं नियठाणविराजमाणसिवपल्लिं ।
कित्तियजियधवलमल्लिं थुणामि भावेण जिणमल्लिं ॥ १

घात-

सायरतित्तीसयठिइपमाण जिणु चविउ जयंतविमाणठाण।
दीवाइमजंबुयदीवनामि भरहे मिथिलापुरि पवरगामि ॥ २

अवयरिय कुम्भनरिंदलच्छि गुणतुल्लपभावइदेविकुच्छि ।
फागुणसियचउत्थि जिणाहिराज पयपंकयविलुलियदेवराज ॥३

जिणमाया पिक्खइ दह चियारि गयपमुह सुमिण वरगिहमझारि।
अवयरियउ जाणिय जिणवरिंदु
विहसियतणुलोयणआणंदु ॥ ४

जिण गब्भिहि ऊणय नव य मास
पालिय तिहि नाणिहि घणपयास ।
सिएगारसि मग्गसिरम्मि मासि
जायउ जिणु अस्सणिमेसरासि ॥ ५

चलियासण जाणवि जिणह जम्मु
दिसिकुमरिय निम्मइ निययकम्मु ।
जिण सविधिहिं सुविधिहि गुणह गातु
निम्मइ हरिसिहि किरि अभिय पातु ॥ ६

जाणवि जिणजम्मणु ओहिनाणि
सुरगिरि सुर आवइ पवरठाणि ।
तित्थोदइ ण्हवइ मणह रंगि पूइवि जिणु गाइहि विविहभंगि ॥७

जम्मोच्छवु निम्मइ कुम्भराउ मग्गणजण पामइ घणपसाउ ।
पुरि घिरि घिरि मंगल गाइ बाल
मणरंगिहि भंगिहि बहु विसाल ॥ ८

पूरवभवकम्मह समणुसारि संजाउ जिणेसरु पवरनारि ।
संठाविउ नामिहि देवु मल्लि कुम्भंकिय नालसु देहवल्लि ॥ ९

सुरगिरि जिम वाधइ कप्पवल्लि दिणि
दिणि तिम जिणवरु गुणहि मल्लि ।
कमि जोवणलच्छि विरायमाणु पणवीसधणूसियदेहमाणु ॥१०

कुमरत्तणि वरिससयं करेवि पाणिग्गहउच्छवि परिहरेवि ।
विन्नतउ लोयंतियहि देवि तित्थेसरु वरसियदाणु देवि ॥ ११

सिएगारसि मग्गसिरस्स सामि अट्ठमतवि विसहियउ जम्मठामि।
वररायपुरिस तिहि सयहि जुत्तु
पव्वज्जिउ जिमवरु सुपवित्तु ॥ १२

छउमत्थ दिणेगय चाउनाणु असोयतले उववन्नु नाणु ।
अट्ठम अंतिहि जिणु विस्ससेण
पाराविउ खीरिहि सुहरिसेण ॥ १३

अडवीसय गणहर मुणिमणीण चालीस सहस्स तह वरमणीण।
पणपण्ण सहस्स य साहुणीण
परिवारिहि सोहइ जिणधुरीण ॥ १४

वइरुट्ट देवि कुबेर जक्खु संसेविय जिणपयकप्परुक्खु ।
चउवन्न सहसवरणिहि विसालि
पणपण्ण सहस्स सव्वाउ पालि ॥ १५

सम्मेयसिहरि जिणु मासिएण फागुणसियबारसि सुहदिणेण ।
अरसिद्धिहि कोडि सहस्स सिट्ठु
मुणि पंच सयहि संजुत्तु सिट्ठु ॥ १६

जय विहडियकम्मकठोरजाल !
जय परिणीयअविहडसिद्धिबाल ! ।
नीराग ! निरंजण ! गुणनिवास !
संपाइयसेवयवंछियास ! ॥ १७

इच्चेवं नमिरासुरेसरसुराधीसावलीसेहरे
माणिक्कोज्जलकतकंतिनिवहे नीरायमाणक्कमो ।
जो संखित्तचरित्तकित्तणतया विण्णत्तओ भावओ
सो मल्ली मुणिरायसंथुयगुणो दिज्जासु बोहिं सया ॥(शा.वि.)१८

पू.आ.श्री रामचन्द्रसूरिविरचितः

## १२. ॥ श्रीमुनिसुव्रतदेवस्तवः ॥

(वसन्ततिलका)

देवस्तनोतु हरितोत्पलकोशकान्तिः
शान्तिं श्रियं च परमां मुनिसुव्रतो वः ।
यस्य क्रमाम्बुरुहमुद्गतचक्रचाप-
माश्रित्य कर्म्मजयिनः कति नाऽऽसन् ? ॥ १

श्लाघ्यान्तरस्य विरहेण गिरां कवीन्द्राः
स्तोत्राणि ते जिन ! गृणन्ति शिवावहानि ।
यस्मात् तव स्तवनसम्भविना महिम्ना
प्राप्तिः शिवस्य कृतिनां कियती फलाप्तिः ॥ २

तेषां गिरिः खलु गिरः कविचक्रवाले
ते नाम बिभ्रति यशःकुसुमावतंसम् ।
येषां मुखाम्बुरुहमञ्चति वास्तवाय
वाग्देवता भगवती भवतः स्तवाय ॥ ३

ये त्वां स्तुवन्ति परदूषणघोषणाभि-
स्ते जाड्यकश्मलदृशः परमार्थवन्ध्याः ।
एषापि कापि विपणिर्ननु मूढतायाः
सत्तां यदन्यविषयां सहतेऽन्तरात्मा ॥ ४

तस्मै नमः सकलकालशिरोवतंस-
लक्ष्मीगृहाय समयाय महोदयाय ।
यत्र त्रिलोकविभवप्रभवैकमित्रे
चेतस्तवाङ्घ्रिकमलोत्सुकमाविरस्ति ॥ ५

श्रेयो निमित्तमपि ये गृहमेधिनोऽपि
धावन्ति वैभवभराय धनोद्भवाय ।
निःसङ्गतैकशरणानि पदं शरण्य !
स्वप्नेऽपि तेषु कृतवन्ति न ते वचांसि ॥ ६

अस्मासु दुःस्थितशिरोमणिषु प्ररूढ-
श्रद्धाकणेषु करुणा तव तन्न चित्रम् ।
श्रद्धानवन्ध्यमनसः पशवोऽपि येनाऽऽ-
कृष्टाः स्वयं भगवता भवसिन्धुमध्यात् ॥ ७

लक्ष्मीः प्रणश्यति चिरं सरुजो भवन्ति
नीचैरपि प्रसभमीश ! तिरस्क्रियन्ते ।
त्वद्वाक्यतत्त्वपरिबोधसुधापराञ्चः
कां कां न नाथ ! विपदं कलयन्ति लोकाः ॥ ८

किं तैः श्रुतं किमवधारितमार्यकार्य-
वन्ध्येषु किं परिणतं च महेश ! तेषु ।
वाचस्तवापि निशमय्य शमैकरूपा
लोकद्वयद्विषि विकर्मणि ये रमन्ते ॥ ९

कारुण्यमावह शरण्य ! कृपास्पदेषु
किं देवदेव ! तव दृष्टिरियं पराची ।
तैस्तैर्जगज्जयजयः क्षतपुण्यपापै-
स्ते सन्तु सङ्कटतमाः शिवभूमिभागाः ॥ १०

भूमीभुजां त्रिदशभूमिभुजां च कुन्द-
कोशावदातमहसः ककुभां मुखेषु ।

खेलन्ति याः सपदि कीर्तिकुरङ्गनेत्रा-
स्तास्ते पदाम्बुरुहभक्तिवधूभुजिष्याः ॥ ११

किं कौतुकं नवसुधामधुरैर्यदीश !
सूक्तैस्तवापि परितप्यति कोऽपि पाप्मा ।
वाताधिकास्तनुभृतो हि घनागमेन
विश्वोपकारिपयसापि वहन्ति पीडाम् ॥ १२

तान्यद्भुतान्यहरहः प्रविलोक्य पूर्वं
सद्दृष्टयो जिन ! भवन्तु न तत्र चित्रम् ।
अस्मादृशः खलु कुतूहलधाम योऽय-
मप्रेक्षिताद्भुतलवोऽपि यथार्थदृष्टिः ॥ १३

प्राप्तः कथञ्चिदपि तावदयं तवाध्वा
श्रद्धालुतत्त्वमिदमस्ति मनोऽपि सम्यक् ।
तं किञ्चिदप्यथ पृथुं प्रथय प्रसादं
येन क्रियास्वपि भवत्यमलासु वृत्तिः ॥ १४

कालाय विश्वमहिताय नमोऽस्तु तस्मै
तेभ्यस्त्रिधास्मि विनतः सततं जनेभ्यः ।
यामैश्चतुर्भिरुपदेशगिरोऽभिवर्षन्
यत्रासि यैर्जिन ! कृतो निजनेत्रपात्रम् ॥ १५

मार्गान्तरप्रणयवासितचेतसोऽपि
स्वर्गौकसां चिरमुपासत एव लक्ष्मीम् ।
तत्किञ्चिदस्ति मितपुण्यमपास्तपापं
स्थानं तु नेतुमलमेष तवैव पन्थाः ॥ १६

ताः सम्पदोऽपि विपदः खलु यास्त्वदुक्त-
सूक्ताञ्जनामृतदृशां सुखयन्ति चेतः ।
श्लेष्मज्वरार्त्तवपुषां शिशिराम्बुपान-
स्वास्थ्यस्य जीवितविहारपरो विपाकः ॥ १७

तस्याग्रतो बहुतृणं त्रिदशेश्वरोऽपि
यद्बाल्यमेतदखिलं भुवनं लघीयः ।
अर्वाणमध्वनि नियोजयितुं यमेष
श्रीसुव्रतो जिनपतिः स्वयमाजगाम ॥ १८

कृत्येऽपि केषु निरताः खलचेतसोऽपि
शुद्धाशया अपि चरन्ति च केऽथ कृत्यम् ।
तेषामगम्यपरलोकफलोदयानां
देवः परं फलयितुं चतुरो विपाकम् ॥ १९

क्लेशाविलेषु नरकैकनिबन्धनेषु
किं कुर्महे कलुषकर्मसु याति चेतः ।
न त्वेव देव ! परमं प्रशमाञ्चितासु
निर्वाणहेतुषु मनागपि सत्क्रियासु ॥ २०

कृत्येषु नन्दति विषीदति विक्रियासु
श्रद्धां दधाति विजहात्यपथं स एव ।
श्रीदेवसुव्रत ! य एव विकाशिकुन्द-
कोशत्विषां तव दशां ललितैः पवित्रः ॥ २१

आजन्मरोगिषु पराभवसारभाव-
पीडावृथाकृतसमस्तगुणोदयेषु ।

अस्मादृशेषु परदास्यनियन्त्रितेषु
काञ्चिद्दिशं विमृश सुव्रतदेवदेव ! ॥ २२

स्तुतयः शतशः पुरा कृताः
कविभिः सन्ति महद्भिरद्भुताः ।
तदिदं तु निजस्य जन्मनः
सुखवन्ध्यत्वनिवेदना परम् ॥ (वैतालीय) २३

नितरामतराम चन्द्रकीर्त्ते !
भवजलधिं न विना तव प्रसादात् ।
प्रथय जिन ! ततस्तथा प्रसादं
सफलमनोरथवीथयो यथा स्मः ॥ (पुष्पिताग्रा) २४

पू.आ.श्री हेमचन्द्रसूरि विरचितः
समवसरणभुवि शक्रादिसन्दृब्धः

## १३. ॥ श्रीमुनिसुव्रतस्वामि-जिनस्तवः ॥

(अनुष्टुप्)

त्वत्पाददर्शनस्यैव, प्रभावोऽयं जगत्पते ! ।
यत्त्वद्गुणान् वर्णयितुं, मादृशोऽपि प्रगल्भते ॥ १

देशनासमये पुण्यां, तव गां परमेश्वर ! ।
वन्दामहे श्रुतस्कन्ध-वत्सप्रसविनीमिह ॥ २

त्वद्गुणग्रहणात् सद्यो, भवन्ति गुणिनो जनाः ।
स्निग्धद्रव्यस्य योगाद्धि, स्निग्धीभवति भाजनम् ॥ ३

ये हि त्यक्ताऽन्यकर्माणः, शृण्वन्ति तव देशनाम् ।
त्यक्तप्राक्तनकर्माण-स्ते भवन्ति क्षणादऽपि ॥ ४

त्वन्नामरक्षामन्त्रेण, संवर्मितमिदं जगत् ।
अंहःपिशाचै नैवाऽतः, परं देव ! ग्रसिष्यते ॥ ५

कस्याऽपि न भयं नाथ !, त्वयि विश्वाऽभयप्रदे ।
स्वस्थानयायिनो मे तु, त्वद्वियोगभवं भयम् ॥ ६

अपि शाश्वतवैरान्धा, बहिरङ्गा न केवलम् ।
शाम्यन्ति तेऽन्तिके स्वामि-न्नन्तरङ्गा अपि द्विषः ॥ ७

ऐहिकाऽऽमुष्मिकाऽभीष्ट-दानकामगवी प्रभो ! ।
त्वन्नामस्मृतिरेवाऽस्तु, यत्र तत्र स्थितस्य मे ॥ ८

पू.आ.श्री ज्ञानसागरसूरि विरचितम्

## १४. ॥ श्रीमुनिसुव्रतजिनस्तवनम् ॥

(मन्दाक्रान्ता)

श्रीकैवल्याऽवगमविदिताऽशेषवस्तुस्वभावं
भावद्वेषिप्रमथनपटुं दोषनिर्मुक्तवाचम् ।
भक्तिप्रह्वं त्रिभुवननतं सुव्रतश्रीजिनाऽहं
देव ! स्तोष्ये भृगुपुरमहीमौलिमौले ! भवन्तम् ॥ १

प्रज्ञोत्कर्षाऽधिगतसकलद्वादशाङ्गार्थसार्थै-
रीशाशङ्के न कविवृषभैर्या स्तुतिं ते विधातुम् ।
मादृक्षः किं निविडजडिमा तद्विधौ स्यात्समर्थो
बालः किं वा कलयति निजाऽशक्तिशक्त्योर्विभागम् ॥ २

आद्ये भवे त्वमभवः शिवकेतुभूमी-
शः सुप्रतिष्ठनगरे सुमना द्वितीये ।

सौधर्मगोपुरवरे(ऽवरपुरे)ऽथ कुबेरदत्तः
तस्मात् तृतीयदिवि दैवतपुङ्गवोऽभूः ॥ (वसन्ततिलका) ३

श्रीवज्रकुण्डलनृपो नगरेऽजनिष्ट
पौराणनाम्न्यथ च पञ्चमकल्पवासी ।
श्रीवर्म भूपतिरुदग्रबलस्तु चम्पा-
स्वामी ततस्त्वमपराजितमाजगाम ॥ (वसन्ततिलका) ४

च्युत्वा ततो हरिकुले विपुलेऽवतीर्णः
श्रीमत्सुमित्रनृपवंशविशेषकस्त्वम् ।
पद्माऽऽत्मजः प्रवरराजगृहे गरीयः
पुण्याऽऽस्पदं जनिमहं तव तेनुरिन्द्राः ॥ (वसन्ततिलका) ५

आयुस्त्रिंशत् त्रिभुवनविभो ! वत्सराणां सहस्रा
देहोच्चत्वं तव जिनपते ! विंशतिः कार्मुकाणि ।
आद्यज्ञानत्रयपरिगतः श्यामवर्णाऽभिरामो
राजन्वन्तं मगधविषयं कूर्मलक्ष्मा व्यधास्त्वम् ॥ ६

उत्सृज्याऽन्तः पुरधनमहाराज्यराष्ट्रादिसर्वं
प्रव्रज्य द्रागधिगतमनःपर्यवज्ञानशाली ।
हत्वा मोहाद्यरिकुलबलं सारस्वादैस्तपोभि-
र्लोकालोककलनकुशलं केवलं लेभिषे त्वम् ॥ ७

देहः स्वेदाऽऽममलविकलोऽतुल्यरूपः सुगन्धः
श्वासः पङ्केरुहपरिमलः प्रोज्ज्वले मांसरक्ते ।
चर्माऽक्षाणामविषयमिहाऽऽहारनीहारकृत्यं
चत्वारोऽमी लसदतिशया जन्मनस्ते सहोत्थाः ॥ ८

देवादीनां समवसरणे संस्थितिः कोटिकोटे-
र्वाणी तिर्यग्नरसुरसदो बोधिदानप्रवीणा ।
अर्क्कज्योतिर्विजयविमलं देव ! भामण्डलं ते
मौलेः पृष्ठे स्फुरति जगतो बाढमाश्चर्यकारि ॥ ९

एकैकस्यां दिशि शतमितक्रोशमध्ये जनानां
न स्युर्मारिर्भुवनभयदा स्वाऽन्यचक्रोत्थभीतिः ।
दुर्भिक्षोऽग्राऽऽमयव(भ)र-महावृष्ट्यवृष्टीति वैरं
स्वामिन्कर्म क्षयसमुदिता एवमेकादशैते ॥ १०

आकाशे ते रुचिरचमरश्रेणयो धर्मचक्रं
भास्वत्सिंहासनमनुपमं पादपीठेन युक्तम् ।
प्रौढच्छत्रत्रयमुरुतरश्रीक इन्द्र(रत्न)ध्वजोंऽह्रि-
न्यासे चामीकरनवपयोजानि दीप्रत्रिवप्री ॥ ११

चातूरूप्यं तरुवरनतिर्न्यङ्मुखा कण्टकाली
वृक्षोऽशोकः समवसृतिभूव्यापकस्तापहर्त्ता ।
उच्चैर्नादो ध्वनति गगने सर्वतो दुन्दुभीना-
मिष्टो वातः सकलशकुना दक्षिणावर्त्तचाराः ॥ १२

वर्षं गन्धप्रवरपयसामिन्द्रियार्थत्वदौष्ट्यं
जानूत्सेधः कुसुमनिकरः केशरोमाद्यवृद्धिः ।
पार्श्वे सेवाऽवहितहृदया देवकोटिर्जघन्या -
देते विश्वेश्वर ! सुरकृता विंशतिर्ह्येकहीना ॥ १३

पञ्चत्रिंशद्वरतरगुणा वाचि संस्कारवत्त्वौ-
दात्त्याद्यास्ते मनसि परमः कोऽप्युदासीनभावः ।

स्वामिन्नष्टोत्तरदशशती बाह्यसल्लक्षणानां
सत्त्वादीनां वपुषि तु तथाऽऽनन्त्यमाभ्यन्तराणाम् ॥ १४

दीक्षाज्ञाने ह्यसितसितयोः पक्षयोः फाल्गुनस्य
द्वादश्योस्ते च्यवनमथ च श्रावणे पूर्णिमास्याम् ।
ज्येष्ठेऽष्टम्यां जनुरिन ! शितौ मुक्तिलाभौ नवम्या-
मासन्विश्वप्रमदविधयेऽमूनि कल्याणकानि ॥ १५

आसर्वार्थाज्जिन ! तनुमतामत्र संस्थो व्यपास्यन्
सङ्ख्यातीतानपि च युगपत्संशयानेकवाचा ।
धर्मं स्मात्थ त्रिभुवनगुरो पर्षदां द्वादशाना-
मग्लान्या द्विः प्रतिदिनमहो ! विष्टपानुग्रहस्ते ॥ १६

मध्ये कोरण्टकवरवनं त्वं प्रतिष्ठानतोऽत्राऽऽ-
गत्यैकस्यां सपदि रजनौ योजनानां तु षष्टिम् ।
यागे जोहूषितहरिवरं बोधयित्वा स्वमित्रं
स्वामिन् ! धर्मेऽनशनविधिनाऽजीगमः स्वर्गलोकम् ॥ १७

तद्गन्धर्वामरविरचिते श्रीमदश्वावबोधे
तीर्थेऽस्मिंस्त्वच्चरणयुगलीपाविते साधुदत्तम् ।
शुश्रावैका वटशबलिका म्लेच्छबाणेन विद्धा
निःशेषांहोहरणनिपुणं श्रीनमस्कारमन्त्रम् ॥ १८

मृत्वा साऽभूत्सुकृतवशतः सिंहलेशस्य पुत्री
बुद्धा भूयोऽपि च भृगुपुरेऽभ्योक्ततन्मन्त्रमाप्य ।
भीता दुःखात्कुगतिजनितात् सप्तशत्यातरण्डै -
रेत्योद्दध्रे जिनवरगृहमिह त्वत्पदद्वन्द्वपूतम् ॥ १९

त्वत्पूजायां भृशमवहिता ब्रह्मचर्यादिपुण्या-
न्यातन्वाना त्रिदशरमणीशानकल्पे बभूव ।
सम्यग्भावातिशयविहिता पर्युपास्तिस्त्वदीया
किं किं दत्ते न सुखमतुलं कल्पवल्लीव पुंसाम् ॥ २०

यद् बुद्ध्यन्ते प्रवरवचनाऽऽकर्णनात् प्राणिवर्गा
आश्चर्यं तत्तव नहि जगद्बोधदायिन् जिनेन्द्र ! ।
भ्राम्यन्मीनश्चरमजलधौ कोऽपि कर्मानुभावात्
जैनाकारं झषमपि समालोक्य बुद्धस्तु चित्रम् ॥ २१

यद्वत्पूर्णं पृथुतनुनदे सञ्चरन्निन्दुबिम्बं
कूर्मोऽपश्यत्पवनदलितोद्दामसेवालबन्धे ।
कर्मोत्कृष्टस्थितिविघटनेऽनन्तकालात्तथाऽहं
त्वामद्राक्षः जिन ! पुनरयं भाग्यलभ्यो हि योगः ॥ २२

आज्ञायां ते विमुखमनसां भूरिकर्माऽऽवृतानां
भूयोऽपि त्वं भवसि भविनां नाथ ! दृष्टोऽप्यदृष्टः ।
आयुर्वेदी व्यपनयति किं रोगमुग्रं जनानां
निर्बुद्धीनामवगणयता मुक्तभैषज्यजातम् ॥ २३

दुःखानन्त्यं त्रिजगति मया योनिलक्षेषु सेहे
भ्रामं भ्रामं प्रतिपदमविश्रान्ति धर्मं विना ते ।
किं पाथेयं दृढतरमृते दीर्घमध्वानमाप्तः
स्यादध्वन्यः क्वचिदपि सुखी क्षुत्पिपासाऽभिभूतः ? ॥ २४

मिथ्यात्वाद्यैर्बहुभवभवाऽभ्यासपुष्टैः प्रमादैः
संसाराऽन्तर्न सुखकणिकाः काश्चनाऽऽपं कदापि ।

सञ्ज्ञायन्ते न खलु निहितैः कोद्रवैः क्षेत्रमध्ये
शालिस्तम्बा रुचिरकणिशश्रेणिसम्पत्तिमन्तः ॥ २५

मोक्षोपायं भगवदुदितं भावतो ये प्रपन्नाः
प्रत्यासन्नीभवति भविनां निर्वृतिर्नाथ ! तेषाम् ।
पारे पाथोनिधिगुरुतराछिद्रबोधिस्थमध्याऽऽ-
सीनाः केचिज्जिगमिषुजनाः स्युर्न गन्तुं समर्थाः ॥ २६

गाढं बद्धो जिन ! भवभृतां (देवानादिर्निखिलभविनां)
कर्मराशिस्त्वदुक्ताऽ-
नुष्ठानस्याऽभ्यसनविधिना द्राग् न दीध्वस्यतेऽयम् ।
स्वर्णान्नाना भवति हि न किं वह्नियोगेन सद्यो-
ऽलोलीभावस्थितिरपि मलो भूरिकालप्ररूढः ॥ २७

लब्धे धर्मे तव शिवगतिं प्रापुरन्तर्मुहूर्त्तात्
क्लेशैर्मुक्ता भविकनिवहाः साम्यपीयूषतुष्टाः ।
गेहस्याऽन्तर्भवति तिमिराकीर्णवस्तूपलम्भः
किं नो पुंसां विलसति सुखात्सर्वतो दीप्रदीपे ॥ २८

अन्ये यूथ्याः स्वमतिनिरता वर्षकोटीतपोभिः
क्लिशत्कायाः शिवपदमगुर्न त्वदाज्ञाविहीनाः ।
किं जात्यन्धा अभिमतपुरप्रापणेऽलं भवेयुः
भ्राम्यन्तोऽपि प्रसभमभितो देव ! जङ्घाबलेन ॥ २९

संसृत्यन्तर्भ्रमिभवमहातापनिर्वापहेतोः
शिश्रायाऽसौ जनसमुदयः शासनं तावकीनम् ।
नो लीयन्ते किमु पथगतं शाड्वलं पाथसार्था
नैकेऽशोकाभिधवरतरुं ग्रीष्मभीष्माऽर्कतप्ताः ॥ ३०

त्वत्स्याद्वादेऽखिलनयमये विश्वलब्धप्रतिष्ठे
स्फूर्जत्युच्चैः परमतगणा भान्ति नो लेशतोऽपि ।
तेजःपुञ्जे प्रसरति दिवा भानवीयेऽथवा किं
द्योतन्तेऽन्तर्धरणिवलयं क्षुद्रखद्योतपोताः ॥ ३१

रागद्वेषौ रुजयत इतो हन्ति कामः प्रकामं
मोहोऽत्यर्थं तुदति सततं चैकतः शत्रुवन्माम् ।
त्रायस्वाऽतस्त्रिभुवनपते ! भीतभीतोऽहमद्य
त्वत्पादाब्जं शरणमगमं संश्रितानां शरण्यम् ॥ ३२

पारावारोत्तरणमनसो मानवा यानपात्रं
मार्गभ्रष्टा अभिरुचितपूःप्रापकं सार्थवाहम् ।
नानाव्याधिव्यथितवपुषः प्राप्य वैद्याधिराजं
मोमुद्यन्ते जिनवर ! यथा पिप्रियेऽहं तथा त्वाम् ॥ ३३

स्वामिन् ! दन्तावलघनघटा उत्कटा वाजिघट्टाः
स्थामप्रौढा विकटसुभटाः स्यन्दनाऽश्वाभिरामाः ।
भव्यं द्रव्यं कनकरजतं भूरि माणिक्यमुक्ता-
राशिर्न स्युस्तव मतमृते दुर्गतित्राणहेतोः ॥ ३४

कामाध्मातः प्रवणमनसा विश्ववन्द्यान पादां-
श्चक्रे वाचा विविधविकथा न स्तुतिस्ते गुणानाम् ।
पापं कर्म व्यरचि वपुष पर्युपास्तिर्मया नो
ही जन्मोदग्विफलमगमं देव ! दुर्दैवयोगात् ॥ ३५

पुष्पैर्गन्धैर्बहुपरिमलैरक्षतैर्धूपदीपैः
सन्नैवेद्यैः शुभफलगणैर्वारिसम्पूर्णपात्रैः ।

कुर्वाणास्ते जगदधिपतेरर्चनामष्टभेदां
सर्वाशंसारहितमयो विश्ववन्द्या भवन्ति ॥ ३६

एतत्तीर्थं प्रवरमहिमं श्रीमदश्वावबोध
त्वत्पादाम्भोरुहपरिचयप्राप्तपावित्र्यभावम् ।
तृष्णाच्छेदं मलविशरणं सर्वदाहोपशान्तिं
कुर्यात्केषां न हि मुनिपते ! देव ! भव्याङ्गभाजाम् ॥ ३७

नश्यत्यंहो जिन ! शकुनिकाश्रीविहाराभिधान-
प्रासादेनाश्रिततनुमतामत्र संस्थेन दूरे ।
प्राकारेऽन्तर्गुरुपरिवृढाधिष्ठिते सुप्रतिष्ठे
चौराः क्रौरा अपि विदधते मोषमावासिनां नो ॥ ३८

धन्यो लोको भृगुपुरगतः कस्य पुण्यात्मनोऽपि
श्लाघास्थानं न भवति विभो ! प्रत्यहं यः प्रभाते ।
उत्थाय त्वच्चरणयुगलोपास्तिमस्तान्यकृत्य-
श्चक्राणः स्वं सृजति सफलं मानुषं जन्म लब्धम् ॥ ३९

एवं श्रीभरुकच्छवर्यनगरालङ्कारचूडामणे !
नूतो मुग्धजनोचितेन मयका भक्तिस्तवेनामुना ।
संसाराम्बुनिधौ विभो ! निरवधौ मज्जन्तमत्राणकं
देव ! श्रीमुनिसुव्रतोद्धर तपाकूपार मामानतम् ॥ ४०

पू.आ. श्री ऋषिवर्द्धनसूरिरचितम्

# १५. ॥ भृगुकच्छनगरमण्डन-श्रीमुनिसुव्रतस्वामिस्तवनम् ॥

सुर-समुदय-सेवित-पद-कमलं
त्रिभुवन-जन-पूरित-शुभ-कमलम् ।
प्रणमामि विशुद्ध-विवेक-मलं
मुनिसुव्रत-जिनमकलङ्कमलम् ॥ १

नव-नीर[द] चकचिकरणं (चाकचकी-करणं)-
स्ववशीकृत-दुर्जयतम-करणम् ।
समहिम-हरिवंशाऽलङ्करणं यश-
उदय-विजय-मङ्गल-करणम् ॥ २

अविकल-केवल-कमला-सकलं
मधु-मधु[रि]म-वाणी-विलास-कलम् ।
वदनेन जयन्तमलं सकलं शशिनं वशि-मानस-हंसकलम् ॥३

अकठिन-कमठाङ्कित-वर-चरणं
भव-परिभव-भञ्जन-परिचरणम् ।
अनु[पम] शम-दम-सङ्गम-चरणं
पुरतः सुर-ताडित-पञ्चरणम् ॥ ४

भृगुकच्छ-नगर-नर-वर-महितं क्रतुरङ्गत्तुरङ्गम-परम-हितम् ।
गतवन्तमनुत्तर-धाम-हितं परिभूय-मनोभव-भटमहितम् ॥५

नत-दत्त-नरेश-सुरासुरतं रवि-मण्डल-सम-तनु-भासुरतम् ।
परमामृतधर्मकथासुरतं परिदूरित-दूरितादरसुरतम् ॥ ६

निज–जन्मविभासित–भर–[सर]सं,
शारद–शशि–शीतल–शान्त–रसम् ।
मन्दर–भूधर–समधिक–तरसं सुकृताङ्कुर–भर–जीमूत–रसम् ॥७

तमसामपनयने रविमुदितं सत्कृपोपेक्षा मैत्री मुदितम् ।
निर्विषय–विषातुषसुखमुदितं
लय–कलन–कलाऽऽसादितमुदितम् ॥ ८

इति–धाममित्र–श्रीसुमित्र–क्षत्रियाधिप–नन्दनः
पररूपपद्मा रूपपद्मा कुक्षिभूरानन्दनः ।
शमसुव्रतः श्रीसुव्रतः श्रीसञ्चयं तनुतादयं
देवः स्तुतो मम वस्तुतोऽममनायकः परमोदयम् ॥ ९

पू.आ.श्री धर्मघोषसूरिविरचितम्

## १६. ॥ श्रीमुनिसुव्रतस्वामि९भवस्तोत्रम् ॥

घणवण्णं चिण्हट्ठियकुम्मं पउमावईसुमित्तसुअं ।
वीसधणुं नवभवकित्तणेण मुणिसुव्वयं थुणिमो ॥ १

पढमम्मि सुप्पइट्ठं सिरिकेउनिवो अहेसि तुमं ।
सोहम्मे बिई तइए कुबेरदत्तो वरपुरम्मि ॥ ३

चउत्थे सणंकुमारे पंचमए, वज्जकुंडलनरिंदो ।
पोराणपुरवरम्मि छट्ठभवे बंभलोगम्मि ॥ ३

सत्तमए चंपाए सिरिवम्मु वराइअम्मि अट्ठमए ।
नवमे रायगिहपहू सिरिमुणिसुव्वय जिणवरिंदो ॥ ४

फग्गुणवइबारसि नाणु जिट्ठ अट्ठमिहि जम्मु नवमि सिवं ।
फग्गुण सिअबारसि वउ सावण पुण्णिम सुवय चवणं ॥ ५

इअ देविंदाइनओ सिरिमुणिसुव्वय जिणो ममाइथुओ ।
सुअधम्मकित्तिआणं विज्जाणं दिसउ मह दाणं ॥ ६

पू.आ.श्री रत्नसिंहसूरिविरचितम्

भरुयच्छनयर-मंडण-

## १७. ॥ श्रीमुनिसुव्रतजिनस्तवनम् ॥

तिहुयणजणमणलोयणपंकेरुहवणवियासणदिणिंद ! ।
भरुयच्छनयरमण्डण ! जय जय मुणिसुव्वयजिणिंद ॥ १

जेहि तुमं जयबंधव ! हरिसविसट्टंतनयणनलिणेहिं ।
एगंपि खणं दिट्ठो तिच्चिय धन्ना जए नूणं ॥ २

तेहिं चिय मणुएहिं पत्तं नियजम्मजीवियाण फलं ।
भरुयच्छनयरसंठिय ! मुणिसुव्वय ! जेहिं तं दिट्ठो ॥ ३

तुह नामसिद्धमंतं तिहुअणसिरितिलय ! सुव्वयजिणिंद ! ।
जे झायंति तिसंझं ताणमसेसं वसं भुवणं ॥ ४

जाइसरणाइ नाउं पच्छिमजम्मं सुदंसणाइ फुडं ।
भरुयच्छे कारवियं मुणिसुव्वयसामियं वंदे ॥ ५

न हु अत्थि किंपि नूणं एत्थ असज्झं कयावि मह नाह ! ।
आणंदबाहनिब्भरनयणेहिं जं तुमं दिट्ठो ॥ ६

सव्वंगं रोमंचो जाण न फुरिओ जिणिंद ! पइ दिट्ठे ।
लद्धम्मि वि मणुयत्ते का हुज्जा निव्वुई ताण ! ॥ ७

परउवयारं मुत्तुं न हु सारं किंपि जीवलोगम्मि ।
इय काउमस्सबोहं तं जिण !भरुयच्छमोइन्नो ॥ ८

पइं पेच्छिऊण पहु ! महु(ह) अमंदआणंदगज्जयगिरस्स ।
अप्पा वि हु वीसरिओ किमहं अवरं थुणामि तओ ? ॥ ९

जे परमाणू नूणं संसारे सारयं समावन्ना ।
तेहिं तुमं निम्माओ नयणाणं तेण अमियसमो ॥ १०

तं चिय नयणाण सुहं मणनिव्वुयमंदिरंपि तं चेव ।
मह जीवियंपि तं चिय सव्वस्सं पि य तुमं अहवा ॥ ११

अज्जं चिय कप्पतरू लद्धो चिन्तामणी वि अज्ज मए ।
अज्जं चिय ससिणेहा सिद्धिवहू मं पलोएइ ॥ १२

एवं वद्धावणयं एसो मह अज्ज ऊसवो परमो ।
जं भुवणरयण ! सूरीहिं थुव्वसि सयावि तं नाह ! ॥ १३

पू.आ.श्री जिनप्रभसूरिविरचितम्

## १८.॥ श्रीमुनिसुव्रतस्वामि-जन्माभिषेकस्तोत्रम् ॥

जय सिरिसमलंकिय गयकमलंकिय, पायपवित्तिय महिवलय।
मणिसुव्वय सामिय शिवपुरगामिय,
वीसमजिण जय गुणनिलय ॥ १

पहु पाणयकप्पविमाण मोत्तु, मइ सुयवर अवहि तिनाणजुत्तु ।
अवयरिउ सावणपुन्निमाए, रायगिहनयरि जगुत्तमाए ॥ २

पउमावइदेवीए उयरम्मि, सामिय सुमित्तनरवइघरम्मि ।
जेट्ठहकसिणट्ठमि तुज्झ जम्मु, किउ दिसाकुमारिहिं सूइकम्मु ॥३

तावह चलियासणु सक्कु एइ कयपंचरुवु मेरुम्मि मेइ ।
पंडगवणि मणिसीहासणम्मि, संमिलियचउव्विहसुरगणम्मि ॥४

मणि–कणण–रयण–रुप्पाइयाण, साहावियाण वेउव्वियाण ।
जुय जुय अट्ठोत्तर अट्ठसहस,
सुपवित्त सुरहि जलभरिय कलस ॥ ५

चंदुज्जलचमरढलंतएहिं, नाणविहनट्टकरंतएहिं ।
भत्तिब्भरनिब्भरसायरेहिं, अहिसित्तउ सामिय सुरवरेहिं ॥ ६

धणुवीसमाणु नवमेहवन्नु, फग्गुण सिय बारसिवउ पवन्नु ।
पहु पुण कसिणाए बारसम्मि, उप्पन्नु नाणु ठियज्झणरम्मि ॥७

तुह केवलमहिमा करइं देव तिहुयणजिण निरुवम विहिउ सेव ।
पडिबोहिय जोयणगामिणीए, वाणीए भविय सुहवासिणीए ॥८

अट्ठारस गणहर तुज्झ हूय, पहु तीससहससमणेहिं जूय ।
पन्नाससहस वर अज्जियाउ,
जिण दिक्खिय मोक्ख समज्जुयाउ ॥ ९

बाहत्तरि सहस सणाहु लक्खु, पडिबोहिय सावग पवर पक्खु ।
तिन्नेव लक्ख व सावियाउ, पन्नास सहस्सिहिं समहियाउ ॥१०

तुह सोहइ संघु सयाणजत्तु, चउभेउ धम्मु किर मुत्तिमंतु ।
अद्धट्ठम वाससहस्स देव, तं विहरिउ महियलि निरुवलेव ॥११

संमेयसेलसिहरम्मि पत्तु, वासाणि तीस सहसाणि भुत्तु ।
पइं जेट्ठकसिणनवमीए मोक्खु,
संपाविउ सामिय परमसोक्खु ॥ १२

इय सुव्वयमाहह नाणसणाहह, जिणपहुसूरिहिं संथविय ।
पंच वि कल्लाणाइं सुक्खनिहाणाइं, कल्लाणगु देयउ भविय ॥१३

पू.आ.श्री हेमचन्द्रसूरिविरचितः

समवसरणभुवि शक्रेन्द्रसन्दृब्धः

## ९९. ॥ श्रीनमिनाथ-जिनस्तवः ॥

(अनुष्टुप्)

केवलज्ञानसञ्ज्ञेन, चक्षुषा वीक्षसेऽखिलम् ।
जगदेतत्तदेवं ते, त्रिनेत्राय नमः प्रभो ! ॥ १

पञ्चत्रिंशदतिशय-वचसे परमेष्ठिने ।
चतुस्त्रिंशदतिशयाऽ-न्विताय भवते नमः ॥ २

मालवकैशिकीमुख्य-ग्रामरागमनोरमाम् ।
सर्वभाषानुगां नाथ !, तव वाचमुपास्महे ॥ ३

त्वद्दर्शनात् प्रणश्यन्ति, कर्मपाशाः शरीरिणाम् ।
ताक्ष्र्याऽवलोकनान्नाग-पाशा इव दृढा अपि ॥ ४

त्वद्दर्शनाद्देहभाजो-ऽधिरोहन्ति शनैः शनैः ।
निश्रेणिमिव मोक्षस्य, गुणस्थानकमालिकाम् ॥ ५

स्मृतः श्रुतः स्तुतो ध्यातो, दृष्टः स्पृष्टो नमस्कृतः ।
येन तेन प्रकारेण, स्वामिन् ! भवसि शर्मणे ॥ ६

स्वामिन् ! पुण्यानुबन्धीनि, पूर्वपुण्यानि नः खलु ।
यस्त्वं दृग्गोचरं नीतो-ऽसाधारणगतिप्रदः ॥ ७

यथा तथा ममास्त्वन्यत्, स्वर्गराज्यादि सर्वतः ।
मा जातु हृदयाद्यान्तु, नाथ ! त्वद्देशनागिरः ॥ ८

# श्री सीमंधरस्वामि-
# वीशविहरमानादि जिन-स्तोत्राणि

पू.आ.सहस्त्रावधानिश्री मुनिसुन्दरसूरिविरचितम्

# १००. ॥ श्रीसीमन्धरस्वामिस्तवनम् ॥

(उपजातिः)

जयश्रियाढ्यं कनकाभदेहं, सर्वज्ञलक्ष्मीकलकेलिगेहम् ।
सीमन्धरं पूर्वमहाविदेहं, विभूषयन्तं जिनपं स्तुवेऽहम् ॥ १

रूपं परं सन्ततमङ्गलाली, महत्त्वमुच्चैः परमा यशःश्रीः ।
ततिः सुखानां जिनसम्पदां च,
तव प्रसादस्य जनेषु लीला ॥ २

विलोकसे येन जगत्समग्रं,
ज्ञानेन तेनैव जिनाऽसि गम्यः ।
तथापि विश्वोत्तरऋद्धिमान् यै-
र्विलोक्यसे नाथ ! त एव धन्याः ॥ ३

भीतो भवक्लेशततेर्भवन्तं,
शरण्यमीशं शरणं प्रपद्ये ।
यदर्थयन्ते मुनयः सुयोगै-
र्यच्चासि गन्ता नय तत्र तन्माम् ॥ ४

यदर्थितं येन तदेव तस्य,
त्वया ददे वत्सरमर्थ्यसे तत् ।
जन्मैव मा दा मम देव ! जन्म,
चेत् तत्र यत्रास्यऽविता प्रभुस्त्वम् ॥ ५

पू.आ. श्रीमुनिसुन्दरसूरिविरचितम्

# १०१. ॥ श्रीसीमन्धरस्वामिस्तोत्रम् ॥

(उपजाति)

जयश्रिया मोहरिपोरवाप्तत्रिलोकसाम्राज्यरमाभिरामम् ।
विदेहभूमण्डलमण्डनं श्रीसीमन्धरं स्वामिनमानुवामि ॥ १

सृजन्ति यं दिव्यदृशः सुयोगिनस्-
तव स्तवं तं विदधे जडोऽप्यहम् ।
पिबेद् गजो वारिसरस्यजोऽपि वा
स्वतुन्दिपूरं समता फले पुनः ॥ (वंशस्थ) २

भवन्ति ये सिद्धरसास्तव स्तवैरिवौषधैर्भावितधातवः प्रभो ! ।
तेषां सदा शीलितयोगसम्पदः
स्फुरन्ति कल्याणसमृद्धयः पराः ॥ ३

प्लवङ्गवच्चित्तमिदं समन्तात्-पारिप्लवं मे विषयेषु लुभ्यत् ।
गुणैर्निबद्धं स्तवयोजितैस्ते स्थिरीभवत्साम्यजशर्म्मणेऽस्तु ॥४

सर्वज्ञ ! देशान्तरितोऽपि पूजा-
स्तवादिभक्तीर्मम सम्प्रतीच्छ ।
भवन्ति नाऽभ्रान्तरितेऽपि भानौ
नृणां किमर्घाञ्जलयः कृतार्थाः ? ॥ (उपेन्द्रवज्रा) ५

विजयं जिन ! पुष्कलावतीं विनुमः पूर्वविदेहभूषणम् ।
नगरीमपि पुण्डरीकिणीं त्वमभूर्यत्र जगत्तपःफलम् ॥ ६
(वैतालीय)

श्रीकुन्थुनाथारजिनान्तरे त्वं जातः शिवादन्वथ सुव्रतस्य ।
अलाव्रतं रामपितुश्च राज्ये शिवङ्गमी भाव्युदयार्हतोऽनु ॥ ७

तपांसि तान्येव तपांसि मन्ये तानेव योगानपि तात ! योगान् ।
येषां महिम्ना नयनातिथित्वं सतां शिवश्रीप्रतिभूः प्रयासि ॥८

श्लाघ्या ग्रहा भ्रान्तिजुषोऽपि तेऽमी
ये तात ! पश्यन्ति दिनान्तरे त्वाम् ।
गतभ्रमोऽपि त्वयि विश्वबन्धा-वहं त्वधन्यस्तव दूरवर्त्ती ॥९

स्तवीमि सीमन्धर ! पक्षिणोऽपि
पश्यन्ति ये पक्षबलादिनं त्वाम् ।
अहं तु पापस्तव दर्शनार्थ-मनोरथैरेव सदा कदर्थ्ये ॥ १०

मनोरथा अप्यथवा भवन्तु सदा भवद्दर्शनगोचरा मे ।
ध्यातोऽपि यत्पूजितवद्ददासि त्वमीप्सितं सर्वमिति प्रमोदे ॥११

स्तवीमि कर्म्माणि मुनीन्द्र ! तानि
बभूव येभ्यो मनसः प्रसूतिः ।
ध्यानेन साक्षादिव येन कृत्वा
त्वां दैवतं स्यां भगवन् ! कृतार्थः ॥ १२

दूरेऽपि भक्त्या विमलेऽसि चित्ते
सङ्क्रान्तिभाग् मे हर तत्तमोऽन्तः ।
किं दर्पणान्तः प्रतिबिम्बितोऽपि
रविः प्रकाशं न तनोति गेहे ? ॥ १३

त्वं सर्वसर्वेष्टहितोपकारी
दूरेपि मां बोधय विश्वबन्धो ! ।
करोति किं नो गगने स्थितोऽपि
सुधामयूखः कुमुदे प्रबोधम् ? ॥ १४

दुर्गाद्रिनद्यन्तरितोऽपि नेत-
रुल्लासयस्येव गुणैस्त्रिलोकीम् ।
किं काचकुम्भान्तरितोऽपि दीपः
प्रकाशयत्येव करैर्न वेश्म ? ॥ १५

अनाद्यविद्योदरपाशबद्धं मां मोचय त्रातरिहापि सन्तम् ।
पयोजगर्भप्रतिपन्नरोधं भृङ्गं यथा दूरतरोऽपि भानुः ॥ १६

जगन्ति पश्यन्नपि किं कषायै-
र्मां पीडितं पश्यसि न स्वभक्तम् ? ।
दृष्टस्त्वया यन्न हि पीड्यते तै-
रुरीकृतो वज्रिजितेव सर्पैः ॥ १७

यथेच्छदानैरनृणीकृते त्वया
जगत्यशेषेऽपि ऋणार्दितोऽस्मि किम् ? ।
कर्म्मोत्तमर्णैर्भवगुप्तितो न य-
न्मुच्ये जिनाद्यापि ऋणाद्भवस्थितेः ॥ १८

सुयोगविद्याविधिसम्प्रयोगतस्-
तन्मामपि प्रापय तत्त्वशेवधीन् ।
येनानृणीभूय निरस्य रोधका-
ननन्तधामा विलसामि मुक्तिभाक् ॥ १९

त्वां यत्र चित्ते विनिवेश्य मोदे
रागादयो देव ! दहन्त्यदोऽपि ।
ततो जगद्रक्षणदक्षिणोऽपि
कथं विभो ! रक्षसि नाश्रयं स्वम् ? ॥ २०

रागादयो यद्विजितास्त्वयैते वैरेण तेनैव जिनेन्द्र ! मन्ये ।
करोषि चित्ते मम यत्र वासं
दहन्त्यमी तत्तदुपेक्षसे किम् ? ॥ २१

विधूय रागादिभवान् विकारान्
दधासि रूपं निरुपाधिकं यत् ।
त्रिलोकपूज्ये भवतः प्रसादान्
ममापि तत्रानुभवोऽस्तु सम्यक् ॥ (उपेन्द्रवज्रा) २२

अशेषतः सर्वविदोऽपि भक्तान्
सीमन्धर ! प्रापयतः शिवं ते ।
किं विस्मृतोऽहं यदि दूरगत्वात्-
तत्ते न युक्तं ह्यसि दूरदर्शी ॥ २३

वृषाङ्कितोऽसीति वृषाङ्कितं मां कुरुष्व सम्यक् कृपया प्रसद्य ।
भवामि युक्तं तव सेवको य-
द्देयाः स्वसाम्यं च ममाग्रतोऽपि ॥ २४

श्रीसीमन्धर ! तीर्थनाथ ! मयका स्तुत्वैवमभ्यर्थ्यसे
नाम्नाऽहं मुनिसुन्दरोऽभवमथो कुर्याः प्रसादं तथा ।
स्यां सर्वज्ञ ! यथार्थतोऽपि विशदज्ञानादिरत्नत्रया-
ल्लब्ध्वा कर्मजयश्रियं शिवपुरे राज्यं लभे चाऽचिरात् ॥ २५
(शार्दूलविक्रीडित)

पू.आ. श्री जिनसुन्दरसूरिविरचितम्

# १०२. ॥ श्रीसीमन्धरस्वामिस्तवनम् ॥

श्रीमन्तमर्हन्तमनन्तचिन्मयं
त्वां भक्तितो नाथ ! यथार्थवाङ्मयम् ।
सीमन्धरश्रीजिनमस्तदूषणं स्तवीम्यहं पूर्वविदेहभूषणम् ॥ १
(उपजाति)

रक्तो गुणैः किं नतनाकिराज ते
सेवां श्रितोऽशोकतरुः सुराजते ।
आजानुनानाविधवर्णबन्धुरः पुष्पव्रजोऽप्यद्भुतसौरभोद्धुरः ॥२
(इन्द्रवंशा)

सर्वाङ्गभाजां प्रतिबोधकारक-स्तव ध्वनिः शान्तरसावतारकः ।
चञ्चच्चलच्चामरराजिरुज्वला पार्श्वेषु ते चन्द्रमरीचिमञ्जुला ॥३
(उपजाति)

तथांशुजालैर्जटिलं तवासनं सिंहाञ्चितं भाति तमोनिरासनम् ।
भामण्डलं भासितभूमिमण्डलं
बभस्ति पृष्ठे जितभानुमण्डलम् ॥ (उपजाति) ४

सद्दुन्दुभिस्ते दिवि विस्मयप्रदो
नदन्न केषां ददते च सम्मदम् ? ।
छत्त्रत्रयं कुन्दवरेन्दुसुन्दरं विश्वाधिपत्यं तव सूचयत्यरम् ॥ ५
(उपजाति)

स्फुरज्ज्ञानसन्तानलक्ष्मीनिधानं भजन्तेऽत्र ये ते पदाब्जं प्रधानम्।
अरं तेष्वमेया रमन्ते विरामं सहर्षं विशेषा रमाया निकामम् ॥६

(भुजङ्गप्रयात)

अवाप्य प्रजा भूरिभाग्यैकलभ्यं
भजन्ते भवन्तं विभो ! शर्मलभ्यम् ।
किमु स्थूललक्षं लसत्कल्पवृक्षं
लभन्ते न लब्ध्वा नरा मङ्क्षु सौख्यम् ॥ ७

लसत्केवलज्ञाननव्यांशुमाली मरालावलीमञ्जुलश्लोकशाली ।
धराधीश ! सीमन्धर ! त्वं लुनीषे
जनैनांसि यस्मान्न कं कं पुनीषे ? ॥ ८

प्रभो ! प्रातरुत्थाय यो नन्नमीति
भवन्तं न सोऽङ्गी भवे बम्भ्रमीति ।
त्वदुक्तेषु येषां मनो रंरमीति भयेनैव तेभ्यो भयं दन्द्रमीति ॥९

अविश्रामदृक्पेयलावण्यगेहं भवन्तं निभाल्य प्रभो ! हेमदेहम् ।
कृतार्थानि कुर्वन्ति ये नित्यमेव
स्वनेत्राणि धन्यास्त एवेह देव ! ॥ १०

महाश्चर्यमैश्वर्यमीश ! त्वदीयं प्रमोमुद्यतेऽवेक्ष्य चेतो यदीयम् ।
न केषां भवेयुस्तमां माननीया
घनश्लोकभाजश्च ते श्लाघनीयाः ? ॥ ११

(शालिनी)

आपत्तापाद्रक्षितारं क्षितारं भव्यव्रातं विश्वविश्वेशितारम् ।
सेवन्ते त्वां के न मर्त्या अमर्त्या
मूर्त्तं धर्मं नाथ ! मुक्तान्यकृत्याः ? ॥ १२

नीरागोऽपि ग्रामरागं गृणासि सन्मायोऽपि व्यक्तमायां मृणासि।
निस्त्रैगुण्यः सद्गुणौघं च धत्से कस्याश्चर्यं तेन नेतर्न दत्से ॥ १३

सीमातीतां विश्वहर्षप्रणालीं
कोऽन्यस्तेऽलं स्तोतुमास्ते गुणालीम् ।
लोकालोकाकाशसर्वप्रदेशा-
नीष्टे ज्ञातुं को विना श्रीजिनेशात् ? ॥ १४

भावारिभ्यो भूरिभीत्याऽवसन्ना देवाः सर्वे यस्य सेवां प्रपन्नाः ।
दीनं दीनं देव ! सीमन्धराख्य !
स त्वं रक्षादक्ष ! मां रक्ष रक्ष ॥ १५

प्रत्यूषे त्वां नन्नमन्नाकिनाथं क्षोणिख्यातं केवलश्रीसनाथम् ।
के के धन्या नैव मिथ्यात्वमाथं
संसेवन्ते सन्ततं तीर्थनाथम् ? ॥ १६

(मालिनी)

इति सुधमधुरत्वोऽमन्दमानन्ददायी
सुरनरवरतिर्यक्सर्वभाषानुयायी ।
वसति मनसि नेतर्ध्वस्तमोहप्रमाद-
स्तव कृतसुकृतानां देशनाया निनादः ॥ १७

अमरनरगणानां संशयान् संहरन्ती
शिवपुरवरमार्गं देहिनां व्याहरन्ती ।
भवति शरणहेतुः कस्य नो नाथ ! वाणी-
भवभवभयभाजस्तेऽघवल्लीकृपाणी ? ॥ १८

असुरसुरतिरश्चां यत्र वैरोपशान्तिः
स्फुरति हृदि वरिष्ठाऽऽनन्दचित्तप्रशान्तिः ।
समवसरणभूमिर्विश्वविश्वासभूमि-
र्जगति जनशरण्या तेऽस्त्यघानामभूमिः ॥ १९

अनुसरति तपोऽर्थं काननं वा धनं वा
त्यजति सृजति जन्तुः संयमौघं घनं वा ।
तव वचनविलासैर्यद्विना देवदेव !
भवति जिनपते ! यन्निष्फलं सर्वमेव ॥ २०

(मन्दाक्रान्ता)

भक्तिप्रह्वत्रिदशविसरं घोरसंसारसिन्धुं
भ्रान्त्वा प्रापं शरणमधुना त्वामहं विश्वबन्धुम् ।
श्रीमन् ! सीमन्धर ! जिन ! तथा तत्प्रसीद त्वमेव
यद्वद्दीनः पुनरिह भवे नो विषीदामि देव ! ॥ २१

दुःस्थावस्थास्थपुटितभवापारवन्यां विहीनः
सम्यग्मार्गाद् भ्रमणवशतो दुर्दशा देव ! दीनः ।
नाऽऽप्तः कां कामिह पुनरवाप्तेऽपि गन्तुं प्रमाद-
स्तस्मिन् दत्ते न मम हृदये तेन नेतर्विषादः ? ॥ २२

सेवं सेवं तव पदयुगं स्यां कृतार्थः कदाऽहं
पीत्वा वाक्यामृतरसमहं स्वं क्षिपे कर्मदाहम् ? ।
इत्येवं मे सदभिरुचितं देवपादप्रसादात्
पूर्त्तेर्वीथीमनुसरतु ते दत्तदुःखावसादात् ॥ २३

राज्यैराऽऽज्यैरिव विषयुतैर्नार्थना विश्वनेत-
र्भोगै रोगैरिव मम सृतं सर्वदोषापनेतः ! ।
दिष्ट्या दृष्ट्या तव परपदाम्भोजयुग्मं कृतार्थः
प्रेक्ष्य प्रेक्ष्य क्षपितदुरितः स्यां नु लब्धार्थसार्थः ॥ २४

एवं निर्भरभक्तिसम्भृतहृदा नोऽतिक्रियाकर्मतां
नीतः स्फीततमप्रभावभवनं त्वं नाथ ! सीमन्धर ! ।
तद्वत्तन्मम देव ! सुन्दरतरं कुर्याः प्रसादं यथा
भूयासं भवदुक्तशासनवराऽऽसेवाविधौ सोद्यमः ॥ २५

(शार्दूलविक्रीडित)

पू.आ श्री शीलरत्नसूरिकृतम्

## १०३. ॥ श्रीसीमन्धरस्वामिनोऽष्टकम् ॥

(उपस्थिता)

कल्याणलतासुवसन्तर्तुं, सुरभासुरभासुरभावनतम् ।
सीमन्धरजिनमतिमधुरगिरं, नम काममकाममकामहरम् ॥ १

क्रियते स्तवतस्तव येन समातारसतारसतारसना ।
सफला तमवैमि महीवलया-समहं समहं समहं कलया ॥ २

गुरुगर्वमसौ हरतात्तपना-च्छविदेह विदेह विदेहजनः ।
जिनपं सुखयन्ननु मोहकिरा, सितया सितया सितया स्वगिरा॥३

रसना हि परत्र कृते रमते, मम नाममनाममनागपि ते ।
इतरत्र पिकी तु धृतिं प्रणते, सुरसालरसालरसा लभते ॥ ४

त्वरते मम हृद्व्रजनाय भवत् पदयोरुदयोरुदयोरु न च ।
त्वमुपायमधीश तदाप्तिकरं, वद भावदभावदभाग्यहरम् ॥ ५

किल कर्म पुमांस्तवरुच्यरवैरसदस्य सदस्य सदस्यति वै ।
घनवज्जलदस्य जलैःसुचिरं, समता समता समतापभरम् ॥६

तव भक्तिरिहापि तमांसि गतेर्द्विपराजपराज पराजयते ।
अत एव बुधैर्भवतोऽत्र कृतां जपराय पराय परायणता ॥ ७

भवते हरति स्तवनाम्निममा, भवमा भवमा भवमालिसमा ।
शममुत्र भजेय भवच्चरणभ्रमरोहमरोहमरोहगुण ! ॥ ८

इति चारुचम्पककनककेतुककायकान्तिकलाज्जुषः,
सीमन्धरस्य श्रीजिनस्य प्रणत सुकृतश्रीपुषः ।
यमकाष्टकं यः प्रातरशठः पापठीति स पापतः,
शीघ्रं विमुक्तः श्रयति परमानन्दमुन्नतिशोभितः ॥(हरिगीत) ९

महोपाध्याय श्री सोमविजयगणिविरचितम्

## १०४. ॥ श्रीसीमन्धरस्वामिस्तवनम् ॥

(पादाकुलक)

चेतन ! कुरु सीमन्धरशरणं, भवसागरतरणे वरकरणम् ।
यदि तव भाति भयङ्करमरणं,
किं बहु विलपसि मूढ ! सकरुणम् ? ॥ चेतन० १

संप्रति काले यानसमानो, राजति सीमन्धरभगवानो ।
मनुजभवो नहि पुनरपि सुलभो,
निजहितसाधनमिति कुरु भो भोः ! ॥ चेतन० २

शरणागतमङ्के निजबालं, मामव भवतो भूगतभालम् ।
त्वमसि विभो ! करुणारससिन्धो !
समजनसुखदोऽकारणबन्धो ॥ चेतन० ३

संयमयोगाकरणविगानो, भवसागरपतितो जिनभानो ! ।
संप्रति तव पदसेवनलीनो,
मां किमु पारग ! तारयसे नो ? ॥ चेतन० ४

तव पदपङ्कजभजनविहीना, भवमटन्ति मनुजा अतिदीनाः ।
ये पुनरनिशं सेवनलीनाः,
ते भवन्ति सुखसागरमीनाः ॥ चेतन० ५

मां विधेहि निजसेवालीनं, सीमन्धर ! भवसङ्गतिदीनम् ।
नैव समीहे सुरनरभोगं,
किन्तु विभो ! तव सेवनयोगम् ॥ ६

चेतन ! कुरु सीमन्धरशरणम्

इति सीमन्धरजिनवरशरणं ये सततं विरचन्ति
जातिजरामृतिसन्ततिभीतिं ते भविका न करन्ति ।
मुनिजनचरिताराधनविषये निजचेतसि विकसन्ति
श्रीहीरविजयसूरीशविनेयो वदति शिवे निवसन्ति ॥ ७

पू.पं.श्री सहजमण्डनगणिविरचितम्

## १०५. ॥ श्रीसीमन्धरजिनस्वनम् ॥

(स्रग्धरा)

श्रेयः श्रीणां निधानं सुमहिमकमलावल्लरीवारिवाहं
प्राप्तं स्फातिं चतुस्त्रिंशदतिशयपरमोल्लोलकल्लोलपूरैः ।
..............ढ्याऽमरनररमणीफुल्लहल्लीहसकार्च्यम्
श्रीमन्तं तीर्थपं तं त्रिजगदवनतं स्तौमि सीमन्धराह्वम् ॥ १

वाणी वाचस्पतीया नहि गरिमवती नाऽपि गीर्देवताया
ब्रह्मा जिह्मायितो नो ऋभुविभुरपि यद्यत्र नाऽलम्भविष्णुः ।
स्तोत्रे तत्राऽपि वर्त्तेऽप्रमितगुणवतः स्वामिसीमन्धरस्य
प्रौद्धत्यं तत्र हेतुः प्रखरमुखरतास्फूर्त्तिकर्त्र्यास्तु भक्तेः (?) ॥२

उच्चत्वं पञ्चशत्या स्ववपुषि धनुषां योऽर्च्यकीर्त्तिर्बिभर्त्ति
तैर्द्वात्रिंशत्प्रमाणैर्मितमथ कवलैः शुद्धमाहारमाह ।
द्वात्रिंशन्मूटमानं प्रतिकेवलमहो पोस्फुरीतीह येषु
प्रातर्ध्यातः स मे श्रीजिनपतिरतुलं मङ्गलं पम्फुलीतु ॥ ३

पञ्चाशद्रत्निमाने तव मुखकमले केवलालोकहेलि-
रङ्गद्गीर्द्वादशाङ्गी विमलपरिमलालोलभव्यालिमाले ।
पायं पायं व्यपायं स्फुरदमृतरसं पुण्यपुण्योपदेशं
शान्तात्माहं कदा स्यामिति दिवसमुखे
ध्यायतो मे श्रिये स्तात् ॥ ४

एकैकत्रोरुचोक्षे भरतधरणिजास्ते भवन्त्यष्ट लक्षा
दैर्घ्यादायामतश्च द्विशतसमधिकैकोनविंशाः सहस्राः ।
यस्य त्यैर्मङ्गलानि प्रविदधति मुदा ते नरा धन्यपुण्याः
सोऽन्तर्ध्वान्तप्रहन्ता त्रिभुवनतरणिर्मे स्मृतः श्रेयसेस्याः ॥ ५

भावी सीमन्धराऽयं कृतसुकृतभरैर्भास्वरो वासरो मे
श्रेयस्पात्री च रात्री त्रिदशनुत ! कदा सा भवित्री धरित्र्याम् ।
यत्राऽऽप्तप्रोक्तसप्तप्रयुतदशधनुःपात्रपाणिः सुचर्यां
कुर्यां शुद्धान्नपानैस्तव पदकमलोपासनाप्तव्रतोऽहम् ॥ ६

उन्मन्नाक्षेभजैत्र स्वसमिति कलया क्रौञ्चबन्धं बबन्धे-
रागारातिस्त्वयोर्व्वीपतिरतिदरतस्त्वां नु तत्सेवतेऽयम् ।
वेल्लत्किङ्केल्लिवल्लिच्छलकलिरतुलः पल्लवैर्लोलहस्तै-
स्तन्ननर्त्ति प्रसत्यामपि च सुखयति च्छायया ते सदस्यान् ॥ ७

भक्तिप्रह्वप्रणम्रामरनरनिकरांस्तात ! चिन्ताव्यतीत-
श्रेयःश्रीणां प्रदानैः पृणसि करुणया त्यागलीलाकलां ताम् ।

देयाः स्वां नोपि.....स्त्रिदशतरुगणैर्याचमानैः किमेवं
पौष्पी वृष्टिर्यदग्रे व्यरचि स जिनपः पातु मां दुःखमार्त्तम् ॥८

पञ्चत्रिंशद्गुणी स्यात् स्तनततिरतुला यस्य ते दिव्यगव्याः
पौमर्थीप्रार्थ्यसम्पत् प्रथितिरपि पयः पाप्मभीमोष्ममाधि ।
आढ्यं माद्यत्प्रमादा कुमततृणततीश्चञ्चुरत्यास्त्रिलोके
व्यातन्तन्यादनन्तां तरतिमिरहरज्योतिरर्हन् प्रगेऽसौ ॥ ९

वर्द्धिष्णोर्ब्रह्मवार्धेरधित कुलतिकं किन्नु कल्लोलमाला
किम्वोत्ताला मरालावलिरियममला पर्युपास्ते प्रशस्या ।
यस्योच्चा चामराली तरलयति न कांस्कान् विकल्पावलीभि-
र्विश्वं बिन्दुर्जिनेन्दुः स कुशल जलधिं मेऽद्य कल्लोलयत्वम्॥ १०

दीपत्विड् नैकरत्नाङ्कुरमणिखचितं पादपीठप्रतिष्ठ-
मध्यारूढं हरीन्द्रासनममरकृतं मुक्तिवर्त्मोद्गृणन्तम् ।
अन्तः पर्षत्सतर्षत्रिदशनरवरैर्हर्षकौतूहलोत्कैः
प्रेक्ष्य त्वां सेव्यमानं जिनवृषभ ! कदाऽमन्दनन्दिं लभेऽहम्॥ ११

ॐकारोऽन्तस्त्रिलोकप्रसृमरमहसां तीव्रतापार्त्तिहर्त्ता
ह्रीँकारत्वं च नेतर्धृतिमतिविलसत्कीर्त्तिसम्पत्ततेस्तत् ।
स्वं तेजो नः प्रदेयात् प्रभुरिति मतितो यन्नु किं द्वादशाऽर्काः
शुम्भद्भामण्डलाङ्का दहरहरभज (?) च्छ्रेयसे श्रेयसे सः ॥१२

दुर्योधं क्रोधयोधं झटिति हत हतेत्येपहन्ताऽक्षयन्ता
मानादीन् दुर्मथान् यस्त्रिभुवनमथनान्नाथनाथेत्यनाथान् ।
तज्जित्यै नाथमेतं श्रयत कृतधियो यस्य दिव्यानकानां
वृन्दं गर्जन् दिवीति प्रवदति जगतां पातु नस्तीर्थपोऽसौ ॥१३

योऽधाक्षीद् ध्यानवह्नौ धगधगितिकृतिप्रोज्ज्वलत्कीलमाले
रागद्वेषोग्रमोहप्रबलपरिवृढायान् प्रतापप्रचण्डान् ।
तत्कान्तिच्छत्रिकां किं स्वशिरसि बिभृषे धारयन् स्वीयमायुः
सोऽशीतिं पूर्वलक्षा जिन ! चतुरधिकां मन्मनः पाहि पापात्॥ १४

यत्रैकत्राऽपि नेतर्भरतयतितेरास्यपोतान्यहो स्यु-
र्लक्षं षष्टिः सहस्रास्तदतुलकमलाकेलिकृद्वक्त्रवस्त्रम् ।
पाणावादाय मध्ये रविमितसदसं धर्मयन्तं वृषाङ्कं
चानूरूप्याश्रितं त्वां कलितशिवसुखं वीक्ष्य भव्या भजन्ते ॥१५

न पुष्कलश्रीः किमु पुष्कलावती पुरी गरीयस्यपि पुण्डरीकिणी ।
यो भूषयेस्त्वं कुलशेखराधिप-
प्रियासुनन्दोदरशुक्तिमौक्तिकम् ॥ (उपजाति) १६

त्रातर्जातोऽसि कुन्थोस्त्वमरजिनपतेश्चान्तराले विदेहे
भङ्गाग्र्या भाग्यभङ्ग्या तदनु शिवगमात् सुव्रतस्यात्तदीक्षः ।
मुक्तिः प्राप्यात्वयेष्यात्युदयजिनपतौ मोक्षमाप्तेऽथ तं त्वां
प्रातर्नित्यं स्मरन्तः कतिकति कृतिनो नाष्टपुष्टर्द्धयः स्युः ॥१७

स्तुत्वा त्वां गुरुसोमसुन्दरतरज्योतिष्मतीं सम्पदं
सूरीन्द्रैर्मुनिसुन्दरैरहरहः स्तुत्या श्रयन्ते न के ।
भव्याः श्रीकुलशेखरोज्ज्वलकुलोदन्वत्सुधादीधितिं
मुक्तिश्रीवररत्नशेखरलसच्चारित्ररत्नार्च्यताम् ॥(शा.वि.) १८

श्रीसीमन्धरसार्वसिन्धुरधरां शृङ्गारयन्तन्तरां
मध्ये पूर्वमहाविदेहविजयश्रीपुष्कलावत्यहम् ।
एवं त्वां स्तवयन्ननन्तमहिमन् याचे न किञ्चित् परं
देयास्त्वा भवमात्मवैभवभुवं सौवांह्रिसेवारसम् ॥(शा.वि.)१९

मुनिप्रवरश्री विनयहंसगणिविरचितम्

## १०६. ॥ श्रीसीमन्धरस्वामिस्तोत्रम् ॥

(स्रग्विणी)

यस्य नामापि सम्पत्पदानन्ददं
किं पुनदर्शनं दर्शनश्रीरसम् ।
विश्वविश्वातिशायि प्रभावाद्भुतं
तं मुदा नौमि सीमन्धराधीश्वरम् ॥ १

स्फारमारज्वरोत्तारधन्वन्तरिं
दुस्तराऽपारसंसारनिस्तारकम् ।
तारहारस्फुरत्कीर्तिपूराकरं
तं नमस्यामि सीमन्धरं स्वामिनम् ॥ २

यस्य लोकोत्तरं विश्वसंशीतिहृत्-
केवलज्ञानमानन्ददं दर्शनम् ।
चारुचारित्रपावित्र्यमत्यद्भुतं
सम्पुनीहीश ! सीमन्धर ! त्वं स माम् ॥ ३

(तोटकम्)

दिवसः स कदा भवितेश ! ममा-मितपुण्यमयः सुलभः सुकृतैः।
तव यत्र लभे भविकप्रभवं शुभदर्शनमाश्रितदर्शनदम् ॥ ४

तव सेवनभावनया न भृतोऽ-
स्म्ययमस्मि जितस्मितविस्मयितः ।
अथ सौम्यदृशेश ! विलोकय मां
श्रितमाशु भवामि यथाविभवः ॥ ५

सुमनो जनमानसहंसवरस्तिमिरप्रसराऽपहहंसकरः ।
करुणारसपूरितदेशनया नयपोषपरो विजयस्व विभो ॥ ६

(शालिनी)

भिन्नादेशादिष्टसप्तैकभङ्गैर्भावाभावात्मार्थसार्थप्रधानम् ।
शुद्धं बुद्ध्यादीदृशत्वं प्रमाणैः साध्याबाधं साधु सीमन्धरार्हन्॥७

नित्यानित्यं द्रव्यपर्यायरूपापन्नं नुन्नं सन्नयैः स्यात् पदोक्त्या ।
युक्त्याऽवोचश्चारुवस्तुस्वरूपं नान्यैर्बाध्यं जातु सीमन्धरत्वम्॥८

यस्यानन्तं पर्ययानन्त्यबोधादर्थानन्त्याद्वाऽस्ति विज्ञानरूपम् ।
सत्यासत्यं व्यक्तिजातिप्रकाशं पौनःपुन्यान्नौमि सीमन्धरं तम्॥९

(प्रहर्षिणी)

श्रीसीमन्धरवचसां नयानुगानां
सन्देहापहमहसां महार्हणानाम् ।
सेवाभिः सरसतया कदा पुनीया-
मात्मानं भविकपदं यथा भवेयम् ॥ १०

संसारप्रसरहरप्रकाररूपो
दुस्तापोपशममहामृतप्रवाहः ।
कल्याणोज्ज्वलसुकलालयोऽस्तु
मेऽसौ श्रीसीमन्धरपदपद्मयोः प्रणामः ॥ ११

आनन्दोदयविशदान्तरङ्गचेताः
श्रीसीमन्धर ! तव सेवते न शश्वत् ।
चारित्रं चरणपवित्रमिष्टशिष्ट-
श्रीसिद्ध्यै करणपदं कदा श्रयिष्ये ॥ १२

(दोधकम्)

देवनिकायनिषेवितपादश्चेतसि यस्य जिनेश ! वशे त्वम् ।
भृङ्ग इवाब्जपदे सुपदव्या पूज्यपदं लभते भविकोऽसौ ॥१३

पावकनायक ! तावक कान्तानेकगुणस्तवनं सवनं स्यात् ।
कार्मणमान्तरमद्भुतशस्तश्रीपदराज्यमिहैति ततं यत् ॥ १४

दुर्मदमानमनोभवलोभक्रोधमुखाहितदुर्द्धरपूरैः ।
दत्तसुदुस्तरदुःखमथ त्वं मामव सौम्यदृशेश ! शरण्यम् ॥ १५

त्वद्वदनं सदनन्तजयश्रीमन्महसां सदनं विशदाभम् ।
कस्य मुदं न निरीक्षितमेतत्
यच्छति विच्छवि तुच्छविकारम् ॥ १६

(भुजङ्गप्रयातम्)

कदाष्टादशांहःपदारब्धकर्म-
प्रपञ्चाननन्तैर्भवैः सञ्चितांस्तान् ।
त्रिधाशुद्धमालोच्य पूतं करिष्ये
स्वकात्मानमीश ! त्वदाज्ञोक्तयुक्त्या ॥ १७

सदा दीप्यसे पूर्वभानुप्रभावस्त्रिलोकीतमस्तोमहारिप्रचारः ।
प्रदीपप्रतापप्रदीपः प्रभुत्वोदितो विश्वविश्वेषु सीमन्धर ! त्वम् ॥१८

(द्रुतविलम्बितम्)

भविककामितकल्पतरूपमं विजयपुण्डरीकिण्यवतारकम् ।
नमत दैवतसम्मतसत्यकी-सुतमणिं द्युमणिभविनां जिनम् ॥१९

गुणवरेण्यकलालयरुक्मिणी-हृदयपद्ममधुव्रतसद्व्रतम् ।
श्रयत भो भविका ! जिननायकं भविकमौक्तिकशर्मपदाप्तये ॥२०

(मालिनी)

नृपततिमुकुटश्रेयस्करोर्वीशवंश-
प्रसृमरमहिमानं मान्यमूर्द्धन्यधर्मम् ।
सुवचनरचनाभिर्देशनाभिर्दिशन्तं
निरुपमशिवमार्गं नौमि सीमन्धरं तम् ॥ २१

शमदमसरसश्रीसम्पदालिङ्गिताङ्ग-
नमदसुरसुरालीपूज्यपादाब्जलक्ष्मीम् ।
समवसरणसंस्थं शोभि सौभाग्यभोगं
त्रिभुवनगुरुराजं नौमि सीमन्धराप्तम् ॥ २२

(शिखरिणी)

जगज्ज्येष्ठश्रेष्ठः प्रकटितपटुप्रष्ठविभुतः,
सदा कन्दः श्रीणां त्रिभुवनमुदां कार्मणपदम् ।
जयस्तम्भारम्भः प्रसभमशुभादृष्टविकट,-
द्विषां जीयात् सीमन्धरवरजिनः सर्वसुखदः ॥ २३

(शार्दूलविक्रीडित)

इत्यानन्दपदोदितैकमनसा नीतः स्तुतेर्गोचरं,
श्रीसीमन्धरतीर्थपः श्रितवतां सर्वार्थचिन्तामणिः ।
सौभाग्याभ्युदयस्थहर्षविनयश्रीसूरिताभ्युन्नति-
र्देयान्मे वरधर्महंससरसक्रीडाब्जबोधिप्रथाम् ॥ २४

पू.उपा.श्री समयसुन्दरविजयविरचितम्

## १०७. ॥ श्रीसीमन्धरस्वामिस्तवनम् ॥

पूर्वसुविदेहपुष्कलविजयमण्डनं,
मोहमिथ्यात्वमतितिमिरभरखण्डनम् ।
वर्त्तमानं जिनाधीश-तीर्थङ्करं,
भव्यभक्त्या भजे स्वामि-सीमन्धरम् ॥ १

असुर-सुर-खचर-नरवृन्दकृतवन्दनं,
रूपसुररमणिसम-सत्यकीनन्दनम् ।
वृषभलाञ्छनधरं ज्ञातगुणसुन्दरं,
भव्यभक्त्या भजे स्वामि-सीमन्धरम् ॥ २

परमकरुणापरं जगति हितकारकं,
भीमभवजलधिजलपार उत्तारकम् ।
धर्मधारिमधरा धरणधरमन्दरं,
भव्यभक्त्या भजे स्वामि-सीमन्धरम् ॥ ३

ऋद्धिवर-सिद्धिवर-बुद्धिवर-दायकं,
त्रिदशपति-भवनपति-मनुजपतिनायकम् ।
भविकजननयनकैरववने शशिकरं,
भव्यभक्त्या भजे स्वामि-सीमन्धरम् ॥ ४

स्वर्णसमवर्णवरमूर्तिशोभाधरं,
सुगुरुजिनचन्द्र-जितसिंहगुणसागरम् ।
समयसुन्दर-सदानन्द-मङ्गलकरं,
भव्यभक्त्या भजे स्वामि-सीमन्धरम् ॥ ५

पू.पं.श्री जिनहर्षगणिविरचितम्

## १०८. ॥ श्रीसीमन्धरजिनस्तवनम् ॥

(भाषाऽष्टकमयम्)

श्रीसर्वज्ञसमग्रसौख्यपदवीसम्प्राप्तिचिन्तामणे !
सत्कल्याणनिवासवासवनत ! त्रैलोक्यचूडामणे ! ।
सम्यग्ब्रह्ममयस्वरूपविहरतीर्थङ्कराऽग्रेसरं
श्रीसीमन्धरधर्मनायकमहं भक्त्या भवन्तं स्तुवे ॥ १

त्रातारं भुवनत्रयस्य परमं सद्योगमार्गाऽध्वम-
ध्येयं ध्येयपदावधिं निरवधिज्योतिःप्रकाशात्मकम् ।
ये पश्यन्ति भवन्तमुत्तमदृशः स्वान्ते निवेश्य स्थिरं
धन्यानामुपरि श्रयन्ति गुरुतां ते देव ! देहस्पृशः ॥ २

भक्तिप्रह्वसुपर्व-पूजितपदाऽम्भोजं जगज्जीवनं
ब्रह्माऽजिह्मलयाऽवदातहृदया ध्यायन्ति योगीश्वराः ।
प्रातः पूर्वविदेहभूषणकरं त्वात्माविभेदे नयं
स श्रीमान् हृदये करोतु वसतिं सीमन्धरः श्रीजिनः ॥ ३

भास्वान् येन निरीक्ष्यसे तनुमतां दोषाऽन्धकारं हरन्
पद्मोल्लासमयं सृजन् जगदिदं गोभिः प्रकाशात्मभिः ।
नश्यद्दुर्दिनता सतामभिमता तस्योल्लसत्यन्वहं
श्रीसीमन्धरदेव ! चेव सुदिनश्रीः सोत्सवं वेश्मनि ॥ ४

संस्कृतं । शार्दूलविक्रीडित

तेलुक्कलोअणसुहंजण सुंदरंग
सव्वन्नुसंपयपयं कयमोहभंगं ।

झायंति जे निअमणे जय ईसमेगं
सीमंधरं जिनवरं कणयासणत्थं ॥ ५

सज्झाणजोगनिउणा परबंभरूवं
देवाहिदेवमरविंदसमाणणाभं ।
ते सव्वसुंदरसमिद्धिपयाहिरूढा
पुज्जा हवंति तिअसिंदनरिंदमज्झे ॥ ६

सोवण्णवण्णतणुकंतिविरायमाणं
देविंदवंदिअपयं गयरायमाणं ।
निसेसलोअकुमुआकरपुण्णमिंदुं
सीमंधरं जिनवरं सययं नमामि ॥ प्राकृतं । वसन्ततिलका ७

केवलकमलाकलितं देवासुरवन्दितं परममहसम् ।
चिन्तामणिमिव फलदं वन्दे सीमन्धर देवम् ॥ ८

मोहमहीरुहवारण-करणिं करुणामयं महिमगेहम् ।
नयवल्लिवारिवाहं सीमन्धरं देवमभिवन्दे ॥ ९

सन्देहतिमिरतरणिं भवपारावारतरणिसमचरणम् ।
नरसिद्धिकरं देवं नमामि जिनवर ! भवन्तमहम् । ॥ १०

समसंस्कृतं । आर्या

सुसाहूल्लदो पत्तसंपत्तिदित्तो सुपच्चस्सिदो ताव वारं हरंतो ।
सया देसु सीमंधरो सामिआतु
सुरद्दुव्व इट्ठस्स सिद्धिं जणाणं ॥ भुजङ्गप्रयातं ११

देव विदेहमहीसमहंदाणंद–मईजिणसंतिकरादो ।
तुम्ह भवेदिसुहा किरणा–दूल्लासमओ जह केरववारो ॥ दोधकं १२

बहुदुक्खभरी रादुभवादुनदे जिणरक्खदुदेवभवं भयवं ।
कडुआ समवय्य पसायमिधा–तुल माणमहीधरमेअपवी ॥
तोटकं । शौरसेनी १३

अपुलवगुणवारो पुच्चवट्कालवाले
दलिदसयलकमृनमृदुस्यालवाले ।
सलसमहुलवाणी पीणिदासेसदंके
जयमुजिणयलेतुं दत्तभव्वंगिमुट्के ॥ १४

सुलअसुलनलाली याह सेसंव्व अच्चं
सिलसिधलदिच्चिं सत्थकल्लाणहेदुं ।
कलदुकलतलस्तं सालसुक्खं तदाह
पलमसिलिसणाधे देवसीमंधलेसे ॥ १५

असमपसमलच्छी सुंदलं वीदलायं
विमलतलविलासिज्जाण विज्जादभावं ।
लुचिलुचिलसलीलं मोहमल्लं ययंतं
नदसुलपदिशस्तं सामि आतंसलेमि ॥ मालिनी । मागधी १६

हियमंबुरुहम्मि धरंति ये जिन ! जना तुह नाममनारतं ।
तसतिसासु मिगंककरुज्जला पसरिरेनगुनाकिरतान किं ॥ १७

गतसिनेहभरोसुरभारिया विहिंतपूजमहो जिनराचिता ।
पनतभूमितलस्स नमामिहं तुहपभो तवसातु पतंबुजं ॥ १८

मनुजभीसटतान सुरद्दुमे नरसुरासुरनाथनतक्कमे ।
तइवीभूभगवो भवभंजके भवतु मज्झ तढंतरवासना ॥ १९

द्रुतविलम्बित । पैशाची

थेरियाथक्कतामच्चफूमीवलो पुज्जकारुज्जकंतालथालाथलो ।
ते तु सीमंथलो मे सिवं मंचुलो
तालकित्तीहि सुक्किक्कतुव्वीतलो ॥ २०

पफलाचीवसंहप्पपोथालुतो खोलफीतिं हलंतोचि नाथीसलो ।
ते व सीमंथलो फूलिफूतिइफे
फोतुचिसूतकं फीलसालालवो ॥ २१

वट्टते सव्वतायंनिरामं चकं लाचिलेतेहिलामोहिलायं ।
पुनो सुतलाहि समाहिं रमाहिं
चिनोतेव तुच्छप्पहा वोतहिं कारनं ॥

स्रग्विणी । चूलिकापैशाची २२

बहिल्ला देहिल्ला पयकमलुजा संनमणहिं
भवं ते तुम्रेसो करविपमए भावुहियडे ।
गुणुल्लासो हुल्ला तवरणहमुत्थुव्वुपरमा
जरामुत्ता दित्ता न सिवरमणी किमूफरदे ॥ २३

दवाद्दामोहारी दडवडतणानासुवुत्तहिं
तिलोगे रेहंते सिदकरसिदासद्दलगुणा ।
न चुल्लीकं तुली भवदि जणहं नायगुपइं
पसन्ने सव्वन्ने सवदि सिरि सीमंधरजिणो ॥ २४

जिणिंदो देवालीपदिमहिदु कारुण्णसहिदो
रवण्णो दित्तीहिं तमतिमिरसूरो जय हिदो ।

हरंतासातावाचरणकमलाकेलिसरणा
सरण्णा तुम्हारा चरणीभवहिं मज्झ सरणा ॥
शिखरिणी । अपभ्रंशभाषा २५

कंतज्झाजिप्पहावो जस कलरचयन् ज्ञस्य हर्षप्ररोहं
अप्पाणं नम्मदाणिं गदमलदुरितारातिनोकम्मजातु ।
तिव्वष्काहम्मनासेयिणनलमसमामुत्तमायं विनीतं
तं तोफत्तिं कलंतं अवसु तिजयहं ढोल्लुतुम्हारडीतं ॥ (स्रग्धरा) २६

इदं काव्यं कविनागर्भमष्टभाषामयं षडरचक्रबन्धेन ।
श्रीसीमन्धर नाथमनिशं भाषाऽष्टकस्याऽष्टया
भक्त्येति त्रिजगत्समीहितकरं यः स्तौति भव्याङ्गभाग् ।
स श्रीमान् गुरुसोमसुन्दरपदप्रौढिप्रभावोदयां
नित्यानन्दसखीं वृणोति विमलां जैनेश्वरीं सम्पदं ॥ २७

वाचकश्रीसकलचन्द्रगणिरचितम्

## १०९. ॥ श्रीसीमन्धरजिनस्तवनम् ॥

ब्रह्माण्डमण्डलविबोधविरोचनाय
राजीवलोचनजगत्त्रयलोचनाय ।
सीमन्धरस्तुतिकृते मलमोचनाय
वीरार्हते मम नमो गतशोचनाय ॥ काव्यम् ॥ १
(वसन्ततिलका)

पुरिसुत्तम ! जह सयले उत्तममंगंमि उत्तमंगं च ।
तह तुह नमणं धम्मे उत्तममिह उत्तमंगेणं ॥ २

जह लोअणमुक्किट्ठं उद्दिट्ठं नाह ! इंदियग्गामे ।
तह तुह मुद्दालोयण-मुक्किट्ठं दंसणे सव्वे ॥ ३

॥ राग (श्रीराग) गउडी ॥

जय रे भगवति सुधानुकारि
सीमन्धरजिनवदनहिमाचलजाते प्रवचनसुरगङ्गे
सकलचतुर्द्दिशिपूर्वप्रसङ्गे वह वह मुनिहृदि कृतिरङ्गे ।
नेदाम्बुधिकृतबहुभङ्गे जय रे भगवति सुधानुकारि ॥ ४

धर्म्मारामा भुवि अतिफलिता त्वमेह करुणाभरसारे
सीमन्धरजिनगगनप्रसूता शुभधाराधरवरधारे ॥ जय रे. ५

पञ्चाचारलता अतिपुष्पिता उपशमगजगजरिचता रे (रचिता रे?)
जिनवचनातिथितृषितनराणां श्रुतिशदमृतानुकृतपारे ॥जय रे.६

मदगद कामकद्र्दमाधौता मिथ्यावागसिशितधारे
मथितापापदावानलतापा कृतसुसी(शि)क्षजनानिधरि ॥ ७
जय रे भगवति सुधानुकारि

॥ राग हुसेनी वइराडी ॥

सुधि ओ रे सुधीरीयमहोच्च(?)जय जिनगुणकीर्तनकरणम् ।
तदिदं बहुभवपातकहरणं उत भवजलनिधितरणम् ॥ ८

शै(सै)व वरा सुधियां धीरमला भुविसुनाणगेहं (?)
ध्यायति या सीमन्धरदेहं सुरनरहतसंदेहम् ॥ ९

गुणरत्नाङ्कितमनोहरदेहं बहुसु (शु)भलक्षणभूषितदेहम्
भु(भ)विजनमङ्गलरोहं सयोगिमुनिवरधे(ध्ये)यं विधेयं (?)
सुरपतिरमणीगेयम् ॥ १०

त्रिभुवनपातकशातककुशलं भुवि जीवितसुविशालम् ।
पदसुरमौलिकुसुमसु(शु)चिमालं अद्र्धचन्द्रसमभालम् ॥११

राग मल्हार

भगवती सीमन्धरवाणी मित्राचारमयूरी रे
संश(स)दी(दि) शंसति शिवपथकुशलं दर्शनमङ्गलपूरी रे ॥
१२ भगवती...॥

सीमन्धरमुखमेरुवासिनी गणिमुखगहनि(न)मटन्ती रे
भविभवकर्मभुजङ्गमसङ्गम-अमृतमास (?) घुटन्ती रे ॥भग.१३

त्रिभुवनमोहनकोटकोटिकुलचरणकृते विचरन्ती रे
सुरनरमुनिजनमोदकारिणी कर्ण्णदरिषु रमन्ती रे ॥भग. १४

शिवपथकेकारवं धरन्ती गुणकलापभरपूरी रे
सकलसभाजनबोधकारिणी मेघनादे मुखिसूरी (?) रे ॥भग.१५

राग मालवा गउडी

नवकनकाम्बुजपदसञ्चारं जनहितकृतावतारम् ।
त्रिभुवनजनशिवपददातारं रागादिकजेतारम् ॥
भज रे सीमन्धरनेतारम् ॥ १६

प्रातिहार्यरमणीगलहारं त्रिजगतईलतनिवारं
भवपारावारागतपारं भविजनकर्मकुठारम् ॥
इन्द्रसभागुणसुगणविचारं (?) मोहमदनहोतारम् ॥ १७

दर्शनजिन (निजन ?) गतदुरितविकारं जन्तूपकारविहारम् ।
विहरमानपुरुषोत्तमसारं अनन्तवरविदगारम् ॥ १८

जन्मादिषु कृतमरुदधिकारं जनतादली(लि)तभवारं
श्रुतमणिकनकरूपप्राकारं पदहरचामरधारं ॥
शुभज(य)शसो विस्तारम् ॥ १९

### राग घोरणी

चेतनचतुरविचार चेति(त)सि चिन्ति(न्त)य सार
सीमन्धरगुणमणिसागरं रे ॥ २०

समवसरणशृङ्गारमशोकतरूणा(णां) विस्तार-
मतिशयकुमुदसुधाकरं रे ॥ २१

सिंहासनपदकारमुत हरिचमेति (?) चामरं रे
छत्रत्रयतलतारममरामृतसुखकारजगदाधारमुदार-
मुपवर (?) चेतन चेतसी रे ॥ २२

### राग मल्हार

त्रिलोकपूजितपादनलिनं अनन्ततूं(?) बलिनं (देवदेवं)
अर्हतं(न्तं) सीमन्धरसुभगं निरीहनिः
सङ्गं प्रणमत हृदि रङ्गम् ॥ २३

कुङ्कुमवसुतनुमृदुकुन्तलिनं शममरालनलिनं
वार्षिकदानावसरे भविनं सुरतरुकरतलिनं
भजत मधुर-गलिनम् ॥ २४

निर्ज्जितभवकर्मरिपुदलिनं अतिसु(शु)चिसु(शु)भकलिनं
प्रादुरजोगङ्गाम्बुतरङ्गमनशुत्प्रं (?) गुलिनं
र(अ?) मलीकृतभलिनम् ॥ २५

स्वस्तिकमङ्गलप्रमुखमङ्गलैरङ्कितपदनलिनं
सकलचन्द्रमुनिसुरतरुफलिनं
विनतमुशलहलिनं जिनवरपरमतलिनम् ॥ २६

कलशः राग धन्यासी (श्री)

धीधना हे जना सहृदया वरदया धरत हृदये च परमात्मरूपम्।
दुर्धार(र्धरे) कर्मरिपुसङ्गरे विदी(दि) तजितमेदिनं मोहभूपम्॥
धीधना. ॥ २७

जयसदोंकारह्रींकारनामाङ्कितं तिग्मसंसारवररायभारम् (?)
बोधितानेकनररामहरिभूधरा देवराजादिचेतावतारम् ॥ २८

कम्बुवरकन्धरं नरगन्धसिन्धुरं वदनवासन्तिकागन्धधारम् ।
हीरविजयादरं सकलसीमन्धरं विहरमानादिमानन्दकारम् ॥२९

पू.मु.श्री भावविजयविरचितम्

## ११०. ॥ श्रीसीमन्धरस्वामीचैत्यवन्दनम् ॥

जयतु जिन जगदेहभानु, काम–कश्मलतमहरम् ।
दुरितओघविभाववर्जितं, नौमि श्रीजिनसिमन्धरम् ॥ १

प्रभुपादपद्मे चित्तलयनो, विषयदोलितनिर्भरम् ।
संसाररागअसारघातिकं, नौमि श्रीजिनसिमन्धरम् ॥ २

अतिरोषवह्निमानमहीधर, तृष्णाजलधिहितकरम् ।
वचनोर्जितजन्तुबोधकं, नौमि श्रीजिनसिमन्धरम् ॥ ३

अज्ञानतर्जितरहितचरणं, परगुणो मे मत्सरम् ।
अरतिअर्दितचरणशरणं, नौमि श्रीजिनसिमन्धरम् ॥ ४

गम्भीरवदनं भवतु दिन दिन, देहि मे प्रभुदर्शनम् ।
भावविजय श्री ददतु मङ्गलं नौमि श्रीजिनसिमन्धरम् ॥ ५

# १११. ॥ श्रीसीमन्धरस्वामिचैत्यवन्दनम् ॥

(अनुष्टुप्)

जय स्वामिन् ! जिनाधीश ! जय देव ! जगत्-प्रभो ? ।
जय त्रैलोक्य-तिलक ! जय संसार-तारण ॥ १

जय जङ्गमकल्पद्रो ! जयार्हत् ! परमेश्वर ! ।
परमेष्ठिन् ! जयानन्दिन् ! जय व्यक्त-निरञ्जन ! ॥ २

स्वामिनामपि यः स्वामि गुरूणामपि यो गुरुः ।
देवानामपि यो देवस्तस्मै तुभ्यं नमो नमः ॥ ३

पू.आ. श्री ऋषिवर्द्धनसूरिरचितम्

## ११२. ॥ श्रीविहरमानजिनस्तवनम् ॥

सकल–सुरासुर–नर(न)त–चरणं
श्रीसीमन्धरमविचल–चरणं, सेवे विशदाचरणम् ।
युगमन्धरजिन–पञ्जितकरणं बाहुजिनं सेवक–सुख–करणं,
पञ्चचाप–शत–करणम् ॥ १

श्रीसुबाहुनाथं नयशरणं श्रीसुजातदैवतमविशरणं
श्रयत शरण्यं शरणम् ।
श्रीस्वयम्प्रभजिनं भयहरणं श्रीवृषभाननमजरामरणं
भवजलतारणतरणम् ॥ २

नमतानन्तवीर्य जिनराजं सुरप्रभमभिभूतरमाजं,
रञ्जित–सुजन–समाजम् ।
श्रीविशालनायकमव्याजं वज्रधरं वरवैभवभाजं,
ज्ञा(न)कला विभ्राजम् ॥ ३

चन्द्राननमाननजितचन्द्रं चन्द्रबाहुमुत्साह–वितन्द्रं,
बोधित–बहु–बुध–चन्द्रम् ।
भजत भुजङ्गमङ्ग–रुचि–चन्द्रं जगदीश्वरमीश्वरं जिनचन्द्रं,
तनु–परिमल [शुचि] चन्द्रम् ॥ ४

नेमिप्रभविभुमभिवन्देऽहं वीरसेनमपगत–सन्देहं
परम–रूपमदेहम् ।
प्रगुण–गौर–गुण–गौरव–गेहं महाभद्रमुज्झित–रागेहं,
निहत–मोहमन्देह [म्] ॥ ५

भव-परिभव-भवविषयापरतं देवयशः
स्वामिनमनवरतं, शान्त-रसाशननिरतम् ।
हृदयस्थं सुर-गिरि-सम-गुरुतं भो !
भविकाजितवीर्यं कुरुतं, मधुर-सुधारस-सु-(र)तम् ॥ ६

इति संस्तुतादिति तनय-सुरपति-सेव्यमान-पदद्वयाः,
श्रेयः-प्रकाशन-धर्मदेशन-लालसानल-साशयाः ।
विहरन्त एते सन्तु मे ते विंशतिर्जिन-नायकाः
शोभाशालाः कुशलमाला श्रीसुखोदयदायकाः ॥(हरिगीत) ७

पू.आ.श्री जयतिलकसूरिविरचितः

## ११३. ॥ श्रीविहरमाणविंशतिजिनस्तवः ॥

(उपजाति)

सीमन्धराधीश ! महाविदेह-क्षोणीवतंसः सुमहा विदेह ।
भवान् भवत्ताविष वै नतेऽय-श्रीदोऽस्तु मे रुग्विषवैनतेय ॥१

युगन्धर ! त्वं परमां प्रदेहि-काम्यां मम ब्रह्मरमां प्रदेहि ।
दुरन्तदुष्कर्मभवाधिकार-स्करावलीभो विभवाधिकार ॥ २

श्रीबाहुनेतस्तनुतां भवस्य, दुष्कर्मबन्धात्तनुतां भवस्य ।
भवान्नतस्यासुमतोऽसमान-गुणावले सत्सुमतोऽसमान ॥ ३

सुबाहुतीर्थेश ! नवारिदाव-नीरर्द्धिवल्लीवनवारिदाव ।
भवोदपाने पततो मम त्वं, नुदन्नतालीकृततो ममत्वम् ॥ ४

हे पोत ! संसारमहोदधाव-भितो हि ते सारमहो दधाव ।
देयाः शिवं वः (नः) स सुजात रूप-
स्मराङ्गकान्त्यस्तसुजातरूप ॥ ५

दुःखं जिनेशापनयस्व कान्त-द्युसत्कृतोद्यद्विनय स्वकान्त ।
स्वयम्प्रभ ! त्वं विनमज्जनानां, कृतक्षमाजीवनमज्जनानाम् ॥६

नमोऽस्तु ते श्रीऋषभाननाय प्रदाय शश्वद्वृषभाननाय ।
सुरासुरेन्द्रैर्महिताय कामं, विनिघ्नते विश्वहिताय कामम् ॥ ७

(उपेन्द्रवज्रा)

अनन्तवीर्यो वरराजितोय - वर्षे घनः संवरराजितो यः ।
तनोतु संसृत्युदयासमुद्रः, श्रेयो जिनो वः स दयासमुद्रः ॥ ८

सूरप्रभाधीश्वर ! मा मुदारा-न्नतं ददच्छैवरमामुदाराम् ।
रक्षाक्षयज्ञानतमोहरागः - सारङ्गसिंहो गतमोहरागः ॥ ९

विशाल ! तायिन् सनय स्वराम-भेदिन् प्रबोधं जनयस्व राम ।
स्थैर्यास्तभूभृद्वरमेरुजन्तु-हितस्तमोजा हर मे रुजं तु ॥ १०

आज्ञां वरां मूर्ध्नि वहेम धाम-नीराग यत्ते नवहेमधामन् ।
मानद्विपे वज्रधराङ्गजारे-र्नोऽव श्रिताच्चित्तधरां गजारे ॥ ११

(इन्द्रवज्रा)

भव्यास्तलोभाशममानमार, चन्द्राननार्हन्तममानमार ।
श्रये जिनाधीश ! सुधामनोज्ञ-वाचं भवन्तं वसुधामनोज्ञ ॥१२

दूरीचरीकर्ति तमःसमूहं, यद्वाक्चयो वर्यतमः समूहः ।
श्रीवज्रबाहोः कमलाशयस्य, तस्य क्रमौ नौम्यमलाशयस्य ॥१३

(इन्द्रवज्रा)

भुजङ्गभर्तर्भवतोयदस्य, भिद्युग्रवायो भवतोऽयदस्य ।
वचश्चयः श्रीजिनराज पाता-न्मां दुर्गतेर्नम्रनराज ! पातात् ॥१४

व्रतं दधौ यः शुभरं विहायः, सदर्चितो भोगभरं विहाय ।
तमीश्वरं तीर्थकरं नु वाम, पञ्चेषुपङ्क्तोष्णकरं नुवामः ॥ १५

नमन्नरामर्त्यसभाजनाय, माध्यस्थ्यचञ्चद्रसभाजनाय ।
नेमिप्रभाधीश्वर ! तेऽस्तु तारं, नमो बुधैर्धर्मरते स्तुतारम् ॥१६

श्रीवीरसेनं जितमोहसेनं, मुक्तं सदा मानतमोहसेन ।
स्तुवन्नरः स्याद्दमदं तु दन्त-
पङ्क्त्या सुखी पुष्पमदं तुदन्तम् ॥ १७

मम प्रदेया वृजिनाधिराज-रवे महाभद्र ! जिनाधिराज ।
भवभ्रमोत्थश्रमहामहीन-कीर्ते मतिं नम्रमहामहीन ॥ १८

दद्यान्मुदं देवयशा हिमानी-हंसावलिश्वेतयशा हि मानी ।
कैवल्यलक्ष्मीसदनं तरङ्ग-रङ्गद्गुणालीसदनन्तरङ्गः ॥ १९

(इन्द्रवज्रा)

यं पाददीप्त्या सुरराजराजी-वास्यं नमन्ती सुरराजराजी ।
तन्यान्मतं मेऽजितवीर्यपार-गतः स दक्षागतवीर्यपारः ॥ २०

श्रेयस्करः श्रीऋषभः सदा नः, सोऽस्तु क्षमाधूर्वृषभः सदानः ।
जवेन कर्ता नमदङ्गिराय-श्छिनत्ति पीयूषमदं गिरा यः ॥ २१

श्रीवर्धमानेशमलोभवन्तं, यः स्तौति भक्त्या विमलो भवन्तम् ।
सङ्गं शिवश्रीस्तरसा न तस्य, चिकीर्षते सा न रसानतस्य ॥२२

श्रीवारिषेणं तरसा परागं, भव्यव्रजत्राणरसापरागम् ।
नमामि कीर्त्यस्तहरं नदीनं, गाम्भीर्यतो मोहहरं नदीनम् ॥२३

गङ्गेव तापं जलतासु गौरा-च्छिनत्ति यस्यावनतासु गौरा ।
चन्द्राननोऽसौ धृतिलो ममाल-
मस्तु श्रियेऽस्तप्रतिलोममालः ॥ २४

कृतं यतीनां गुरुणा कृतान्तं, भवस्य नोनोम्युरुणा कृतान्तम् ।
कुवादिवीथीविपदाधिरोहं, प्रजाभवत्सिद्धिपदाधिरोहम् ॥ २५

रतिं जिना मे सकलाः क्रियासु,
शस्यासु शश्वत्सकलाः क्रियासुः ।
दिवाकरामानतनुप्रभा वाः - पवित्रवाक्या अतनुप्रभावाः ॥२६

प्रह्वाशया शासनभासनाया-र्हतां यशःपूर्णनभाः सना या ।
गीर्देवताढ्या प्रवरक्षणेन, धिनोतु वः शात्रवरक्षणेन ॥ २७

पू.आ. श्री आणंदविमलसूरिविरचितम्

## ११४. ॥ श्रीविहरमानजिनस्तोत्रम् ॥

(उपजाति)

श्रेयांस वप्ता जननी तु सत्यकी, वृषस्तु चिह्नं दयिता तु रुक्मिणी।
जम्बूविदेहाभरणस्य यस्य, सीमन्धरं तं सततं स्मरामि ॥ १

माता सुतारा सुदृढः पितास्य, प्रियङ्गुमाला ललनाधिनाथः ।
गजध्वजो धर्मधुराधुरन्धरः, सार्वः श्रिये मे भवताद् युगन्धरः॥२

सुग्रीवसूनुर्विजयाजयप्रदः, सुमोहिनीमोहितमानसाम्बुजः ।
मृगाङ्कतुल्याननभृन्मृगाङ्कभृत्, श्रीबाहुसार्व्वः शिवसम्पदे वः॥३

भूतंदया श्रीनिसढस्य सार्द्धं, मुदः प्रदः किम्पुरुषाधिनाथः ।
सन्मर्कटाङ्को विहरन् विदेहे, जीयात्सबाहुः कदलीसुबाहुः ॥४

श्रीदेवसेनातनयो नयेन, युक्तः सदानन्दितदेवसेनः ।
दिनेश्वराङ्को जयसेनाऽर्च्यो, जिनोऽभिजातो जयतात् सुजातः॥५

सुमङ्गला मङ्गलमालिकाप्रदः, स्वयम्प्रभोश्चित्रविभोर्विभूतिदः ।
प्रियसेनापतिः शशिलाञ्छितक्रमो,
महाविदेहे जयताज्जिनेश्वरः ॥ ६

ऋषभाननामकतीर्थनायकः, स्फुटं च कीर्त्याश्रितराजनन्दनः ।
जनितो वरवीरसेनया, हरिचिह्नस्तु जयावतीश्वरः ॥ ७

यस्य माता मङ्गलावती सती, मेघराजतनयस्य वर्त्तते ।
अङ्गना विजयवत्यभीप्सिताऽनन्तवीर्यजिनराट् द्विपध्वजः ॥८

(रथोद्धता)

सूरप्रभः सूर्य्यसमप्रतापः, श्रीनागसूनुर्विमलाधिनाथः ।
भद्रो महाभद्रकरोऽर्यमाङ्कः, श्रीधातकीखण्डविदेहसार्व्वः ॥९

चन्द्रलाञ्छनधरो वरनन्द-सेनयानत इनोऽस्ति विशालः ।
यस्य सा विजयवत्यभिधाना, यस्य सो विजयभूमिपतिश्च ॥१०

(स्वागता)

सरस्वतीपद्मरथस्य नन्दनः, खड्गाङ्कितो वज्रधरो जिनेश्वरः ।
विनायुतश्रीविजयवत्युदर्च्यः, श्रीधातकीपश्चिमसद्विदेहे ॥ ११

चन्द्राननश्चन्द्रसमानतोयं, वल्मीकवंशे वरदीप्रदीपः ।
लीलावतीशो वृषभध्वजोऽस्ति, पद्मावतीसूनुवरो वरश्रीः ॥१२

पद्माङ्कभाक्रेणुकया प्रसूतः सुगन्धयाच्र्यो जिनचन्द्रबाहुः ।
देवाश्रितानन्दनृपप्रमोदकृत, श्रीपुष्करार्द्धे विजयासुदारः ॥१३

श्रीभुजङ्गभगवन्तमाश्रये, श्रीमहाबलनृपस्य नन्दनम् ।
पद्मलाञ्छनधरं वरगन्ध-सेनया नतपदं महिमाभाजम् ॥ १४
(रथोद्धता)

ईश्वरं मदनमद्दर्नेश्वरं, पालितं च सुयशोज्ज्वलाम्बया ।
चन्द्रलाञ्छनधरं गलसेन-नन्दनं मुदितचन्द्रवतीशं ॥ १५
(रथोद्धता)

## ११५. ॥ श्रीविंशतिविहरमानजिनस्तुतिः ॥

(उपजाति)

द्वीपेऽत्र सीमन्धरमानमामि, युगन्धरं बाहुजिनं सुबाहुम् ।
सद्धातकीखण्डगतं सुजातं, स्वयम्प्रभं श्रीवृषभाननं च ॥ १

अनन्तवीर्यं च विशालनाथं, सूरप्रभं वज्रधराभिधानम् ।
चन्द्राननं नौम्यथ पुष्करार्द्धे, श्रीचन्द्रबाहुं च भुजङ्गनाथम् ॥ २

नेमिप्रभं चेश्वरनामधेयं, श्रीवीरसेनजिनदेवयशोऽभिधौ च ।
वन्दे महाभद्रमनन्तवीर्यं, निरन्तरं सम्प्रति वर्तमानम् ॥ ३

अभिनतमतिजम्बूद्वीपसंस्थं चतुष्कम्
जिनवरवृषभानामष्टकं धातकीस्थम् ।
अथ भुवनतानामष्टकं पुष्करार्द्धे
हरतु गतिचतुष्कं कर्मणामष्टकं च ॥ (मालिनी) ४

## ११६. ॥ श्रीविहरमानजिनस्तवनम् ॥

(उपजाति)

महाविदेहावनिमण्डलश्रीशृङ्गाररत्नाभरणायमानान् ।
क्रमेण सीमन्धरदेवमुख्यान् जिनेश्वरान् विंशतिमानुवामि ॥ १

सीमन्धराह्वं प्रथमं जिनेन्द्रं द्वितीयमानौमि युगन्धरं च ।
बाहुं नमस्यामि तृतीयमाद्ये द्वीपे सुबाहुं च जिनं चतुर्थम् ॥ २

सुजातमञ्चाम्यथ पञ्चमं च स्वयम्प्रभं षष्ठमिह द्वितीये ।
तं सप्तमं श्रीऋषभाननं च वन्देऽष्टमं श्रीमदनन्तवीर्यम् ॥ ३

सुरप्रभाऽऽख्यं नवमं नमामि स्तुवे जिनेशं दशमं विशालम् ।
एकादशं वज्रवरं च चन्द्राननं जिनं द्वादशमर्चयामि ॥ ४

त्रयोदशं स्तौम्यथ चन्द्रबाहुं चतुर्दशं श्रीभुजगं भजेऽहम् ।
श्रीईश्वरं पञ्चदशं मुनीशं नेमिप्रभं षोडशमाश्रयामि ॥ ५

श्रीवीरसेनं प्रणमामि सप्त-दशं महाभद्रजिनेश्वरं च ।
अष्टादशं देवयशोऽभिधान-मेकोनविंशं स्मृतिमानयामि ॥ ६

विंशं निषेवेऽजितवीर्यदेवं सार्वा अमी अष्ट च पुष्करार्धे ।
एवं विदेहेषु जिना जयन्तः सर्वे सतां सन्तु मनीषिताप्त्यै ॥७

## ११७. ॥ श्रीविंशतिवहरमानजिनस्तवनम् ॥

(उपजाति)

सीमन्धरं श्रीयुगमन्धरं च,
बाहुं सुबाहुं च भगवत् सुजातम् ।
स्वयम्प्रभं श्रीऋषभाननं च, विह्रीयमानं जिनमानमामि ॥ १

अनन्तवीर्यं भगवद्विशालं, सुरप्रभं वज्रधरं जिनेन्द्रम् ।
चन्द्राननं केवलि चन्द्रबाहुं
विह्णीयमानं जिनमानमामि ॥ २

भुजङ्गनाथं च जिनेशमीश्वरं नेमिप्रभं श्रीश्रितवीरसेनम् ।
प्रभुं महाभद्र-जिनाधिराजं, विह्णीयमानं जिनमानमामि ॥ ३

श्रीमज्जिनं देवयशाभिधानं, अनन्तवीर्याजिनवीर्यदेवम् ।
छत्रत्रयीचामरचारुशोभं, विह्णीयमानं जिनमानमामि ॥ ४

इति स्तुता विंशतितीर्थनाथा, महाविदेहेषु विह्णीयमाणा ।
भव्याम्बुजो(द्वो) ?धनभानवो (ते)
भवन्तु कल्याणधनोदयाय ॥ ५

## ११८. ॥ श्रीविंशतिविहरमानजिनस्तुतिः ॥

(उपजाति)

सीमन्धरं स्तौमि युगन्धरं च, बाहुं सुबाहुं च सुजातदेवम् ।
स्वयम्प्रभं श्रीवृषभाननाख्यमनन्तवीर्यञ्च विशालनाथम् ॥ १

सूरप्रभं वज्रधरं च चन्द्राननं नमामि प्रभुभद्रबाहुम् ।
भुजङ्गनेमिप्रभतीर्थनाथावथेश्वरं श्रीजिनवीरसेनम् ॥ २

स्तवीमि च महाभद्रं श्रीदेवयशसं तथा ।
अर्हन्तमजितवीर्यं वन्दे विंशतिमर्हताम् ॥ (अनुष्टुप्) ३

पू.पं.श्री मेरुनन्दनोपाध्यायविरचितम्

# ११९. ॥ श्रीसीमन्धरजिनस्तवनम् ॥

अतिरसहरिसरसेण विहसियलोयणमणवयणु ।
थुणिसु भावि नियसामि सिरिसीमंधरु जिणरयणु ॥ १

जो कप्पूरदलेहिं निम्मइ निम्मलु जिणभवणु ।
जो नियपायबलेहिं हारावइ चंचलु पवणु ॥ २

ससहरकिरण करेण धरवि जो य हिंडइ गयणि ।
अह नियसत्तिवसेण करइ दिवसु फेडिवि रयणि ॥ ३

जइवि हु सो वि समत्थु न हु तुह गुणगणसंकलणि ।
कवणमत्त नीसत्तु हूउं मूरषसिरि मउडमणि ॥ ४

तहवि हु भत्तिभरेण तरलिउ विरचिसु संथवणु ।
जिणि कारणि जिणभत्ति वंछिउं साहइ नवि कवणु ? ॥ ५

भास–

तं जंबुयदीवह मंडणउ गिरिवरमेरुपवित्तु
त तसु निवसइ जो पुव्वदिसि महाविदेहु सुखित्तु ।
त तसु विसिट्ठ अट्ठमविजउ पुक्खलवइ इय नामि
त तहं विहरइ किरि भुवणगुरो सिरि सीमंधर सामि ॥ ६

त कणयवण्णतणु पंचसयधणुहपमाणसरीरु
त चउतीसइं अइसयसहिउ सायर जेम गंभीरु ।
त पइदिणु पयपंकयलुलियचउविहदेवनिकाउ
त धण्ण ति जे पिक्खिहिं नयणि सीमंधरु जिणराउ ॥ ७

त (कु)लहलहंतु पागार तउ वरतारेणु चउबारु
त सुरजोयणपिहुलत्तण ए उंचउं वलयाकारु ।
त मणिकंचणघणुरुप्पमउ समवसरणु अइचारु
त सुरसंधिहिं मिलि निम्मविउ कलसदंडधयसारु ॥ ८

त तसु अंतरि रयणिहिं घडिउ सिंहासणु झलकंतु
त पायपीढु तसु तलि विमलो मणि निम्मिउ दिप्पंतु ।
त तह सीमंधरु जिणपवरो पउमासणउवविट्ठु
त सहसकिरण जिम उदयगिरि पुण्ण ति जेहिं सुदिट्ठु ॥ ९

त बार गुणउ जिणदेहतउ किउ असोगतरु तुंगु
त कुसुमवुट्ठि चामरढलणु छत्तत्तउ सिरि चंगु ।
त भामंडलु दिणयरुसरिसो अंबरि भेरिनिनाउ
त गज्जइ किरि जिणु भंजि करि मोहरायभडवाउ ॥ १०

त रणउणंतकिंकिणिरयणि ऊगगमंत सुविमाण
त सपरिवारसुररमणिगणि लवणिमरूवनिहाण ।
त बहुलभत्तिउल्लसियहिय दसदिसि घणु पसरंत
त समवसरणि आवइं सयल सामिय गुण गायंत ॥ ११

त मणहरगणहरसाहुजण साहुणि गयरयलेव
त वासुदेव जुगबाहुमुह माणवदाणवदेव ।
त गयगामिणि कामिणि मिलिय इणपरि उत्तम वंस
त समवसरणि पविसंति सवि जेम सरोवरि हंस ॥ १२

घाता–

तत्थ पिक्खहिं तत्थ पिक्खहिं तयणु चउवयणु चउरूव चउगइहरणु

चउविहेहिं अमरेहिं वंदिउं सिरिकेवललच्छिरो ।
कंतकंति तियलोयनंदिउ
सिरि सीमंधरु तिजयगुरु वरु पंचंगपणामि ।
पुण पुण पणमिउं रंगभरि चिट्ठइ नियनिय ठामि ॥ १३

भास–

अह धणूए चउविहधम्ममम्मपयासणि सुहकरणि
जोयणए गामिणि वाणि तिहुयणमणसंसयहरणि ।
जिणवर ए महुरसरेण विहसियकोमलमुहकमलो
सुललिउ ए करइ वषाणु नवरसो सुंदरो अइविमलो ॥ १४

निम्मल ए गंगतरंगचंगु पणासियसयलतमु
भवदव ए संभवदाह फेडणअमियपवाहसमु ।
सामिय ए तणउ वषाणु जिम जिम गाजइ मेह जिम
तिम तिम ए भवियण चित्त नाचइ फरफर मोर जिम ॥ १५

मुणिवर ए सावयधम्मपयडणु विहडणु भूरिभय
सायर ए रूपसंसारतारणु कारणु परमपय ।
धन धन ए ते नरनारि सिरिसीमंधर जिणवयणु
मेल्हइं ए नहु हियडाह जे दालिद्दिय जिम रयणु ॥ १६

घाता–

मुत्ति पुरवर मुत्तिपुरवरसरणि वरतरणि
पणतीसइं अइसयलसियविसमसोगदोहग्गवारिणि
देवासुरतिरियगणमणुयलोयभासाणुकारिणि

एवंविहवक्खाणझुणि सामि विसज्जइ जाम
सज्जइ सुरसुंदरि मिलवि जिणगुणकित्तणि ताम ॥ १७

भास-

जय जिणवर ! ससहरहारिवयण !
जय कोमलकमलविसालनयण ! ।
जय सरसअमियरससरिसवयण !
जय महिममहियह देवरयण ! ॥ १८

जय विउलमिउलक्खणनिहाण ! । दीहरकरपल्लवमलियमाण ।
मणवंछियपायवरायपाय ! लवणिमभरभंजियमयणराय ! ॥१९

जय मोहनरिंदगइंदसीह ! नीराग ! निरंजण ! जिण ! निरीह ! ।
गुरुदुरियतिमिरभरहरणदीह !
तियलोयसिरोमणिलद्धलीह ! ॥ २०

विलसंतअणंतगुणाण ठाण ! । संवच्छरमिच्छियदिन्नदाण ! ।
भवसिंधुतरणतारणसमत्थु ! ।
पडियहं आलंबणु देहु हत्थु ॥ २१

अइउत्तमखत्तियवंसजाय ! सिवसुंदरिसुक्खनिबद्धराय ! ।
करुणारससायरपुण्णचंद ! सीमंधर ! सामिय ! नंद नंद ॥२२

भास-

अइघणुपरउवयारपरायणु नाणचरणदंसणगुणभायणु ।
जिणवरआणविहाणपरेसु पुंडरगिरिपुरिपमुहपुरेसु ॥ २३

सुररइएसु ठवंतु नवेसु पायकमलु कंचणकमलेसु ।
चउविहसुविहिसंघपरिवारो सिरिसीमंधरु करइ विहारो ॥२४

नमिरसुरतरुवरसिहरिसमुच्चउ धयवडु लहलहइ अइउच्चउ ।
धम्मचक्कु गयणंगणि सोहइ
इणिगुणि जिणु महिमंडलु मोहइ ॥ २५

चउगइ रायभवभमणु निरोहइ गामि नयरि भवियण पडिबोहइ।
तारायणि ससहर जिम राजइ
केसरि जिम जिणेसरु गाजइ ॥ २६

भास–

आज हुयउं सुविहाणु आजु पवित्तु मुहुत्तुमहो ।
जं नियमणरंगेण राससबंधि संथुणिउ पहो ॥ २७

रोमंचिउ महु देहु हियडउं हरिसिहिं उल्लसइ ।
नयणे लद्धु विकासु जं सज्जिउ जिणकित्तणए ॥ २८

जिम महुयरु वणराइ रायहंसु जिम सरु विमलो ।
मेहागमु जिम मोरु झायइ हुं तिम पयकमलो ॥ २९

दीणु हीणु अन्नाणु माणविवज्जिउ विन्नवउं ।
हिव तिम किरिसु पसाउ छुट्टउं जेम दुहाउ हउं ॥ ३०

इय भत्तिसत्तिभरेण निम्मिउं सत्थसंथवगोयरो
अक्खीणधारिम 'मेरुनंदणु' भुत्तिसिरिसीमंधरो ।
सग्गाइकामियचित्तकामियकप्पपायवु जंगमो
महु झाणगाणगुणाणुराइण देउ नियपयसंगमो ॥ ३१

पू.पं.श्री धर्मशेखरगणिविरचिता

# १२०. ॥ श्रीसीमन्धरस्वामिविज्ञप्तिः ॥

श्रीसीमंधरदेव देवनरदाणवनायग,
वंदिउ निम्मलकंतकंति मणवंछियदायग ।
सिववणपल्लवणंबुवाह दुहदोहगखंडण
सोहगसुंदर मेरुधीर जय तिहुअणमंडण ॥ १

दाणवमाणवरायजायसुरनायगखोहण
वम्महघायणजक्खलक्खथुय लोगविबोहण ।
जय जय संजय मुख(क्ख)दुख(सुक्ख) अइनिम्मलसोहण
केवलकमलाकेलिगेह गुणगणमणिरोहण ॥ २

निज्जियदुज्जयरायरायमहिमंडलपावग
तिहुअणगंजणलोहजोहबलपायवपावग ।
सग्गयनिग्गयरोगसोग जिणखंडियपावग
करुणावल्लिसुकंद नंद सिवयरपुरपावग ॥ ३

मुणिवर ! जय जय वीयराय ! गयभव विसमागम
सारय तारय रायराय मुहु सागसमागम ।
जलहर जलहर दुक्खलक्खहर हारिसमागम–
सोहग खोहगरोसदोसगयसीहसमागम ॥ ४

नरवइ–सुरवइहारिनारिवरचक्ख(क्खु)सहंजण
लक्खणलक्खियपाणिपाय जिणसज्जणरंजण ।

सुह सुह हर हर मोहकोहबलिकुंजरगंजण
जय जय जय जयकारि मारिगुरुभूरहभंजण ॥ ५

दमसमसंजमतार पारगयवम्महदुद्धर
विसहर विसहर सोम सोम गइनिज्जियसिंधुर ।
भव भवभयभरभंगरंग जणमोहग सोहग-
दायग नायग पावदाव जय दोहगखोहग ॥ ६

जणमणपंकयभाणु माणुकरिमारणवारण-
रिउसम समसमसारुदार भवसायरतारण- ।
निग्गयदुग्गयतिक्खदुक्ख जय दारिददारण
जलहर जलहरराव भावरिउवारणकारण ॥ ७

जय गयरय रयमाय रायनयसंनयसज्जल-
सरवर सिरिवर संत दंत बहुबाहुमहाबल ।
पणिमिरसुरवरमौलिमौलिमणिसुंदरभासुर-
रइभररंजियपायपीढ जय विस्सदिणेसर ॥ ८

ससहरहरहिमहारिहार हस सेससहोदर
सियजसपूरियविस्स विस्सगुरु पत्तमहोदर ।
संजय संजयहारिहारितर वाणिविनिज्जिय-
सारसियामय नंद देव दहदोसविवजि(ज्जि)य ॥ ९

इय जिणवरथुत्तं गुणगणजुत्तं,
जंपइ गुणइ जो भवि(य) जणु ।
सो दुहतरुखंडण जय जणमंडण
लहइ सिवलह(सुह) सुद्धमण(णु) ॥ १०

पू.उपा.श्री विनयप्रभविजयविरचितम्

## १२१. ॥ श्रीसीमन्धरस्वामिस्तवनम् ॥

नमिर-सुर-असुर-नर-वंदिय-पयं
रयणिकर-निकर-कर-कित्ति-भर-पूरियं ।
पंच-सय-धणुह-परिमाणु-परिमंडियं,
थुणह भत्तीइ सीमंधरं सामियं ॥ १

मेरुगिरि-सिहरि धयबंधी जो कुणइ,
गयणि तारा गणइ वेलुयाकण मणइ ।
चरमसायरजले लहरिमाला मुणइ,
सो वि न हु सामि ! तुह सव्वहा गुण थुणइ ॥ २

तह वि जिणनाह ! नियजम्मसफलीकए,
विमल-सुह-झाण-संधाण-संसिद्धए ।
असुह-दल-कम्म-मल-पडल-निन्नासणं,
तात ! करवाणि तुह संथवं बहुगुणं ॥ ३

मोहभर-बहुल-जलपूर-संपूरिए,
विसय-घणकम्म-वणराज-संराजिए ।
भवजलहि मज्झ निवडंत-जंतूकए,
सामि सीमंधरो पोय जिम सोहए ॥ ४

तेयभर-भरिय दिसि - विदिसि गयणंगणो,
पबल-मिच्छत्त-तिमिर-विद्धंसणो ।
भविय-जणकमल-वणसंड-बोहंकरो,
सामिसीमंधरो दिप्पए दिणयरो ॥ ५

सुजण-मण-नयण-आणंद-संपूरकं,
दुरित-हर-तार-तारक-मणी-नायकं ।
सयल-जग-जंतु-भव-पाप-तापापहं,
नमउ सीमंधरं चंदसोभावहं ॥ ६

सुरभवणि गयणि पायालि भूमंडले,
नयरि पुरि नीरनिहि मेरुपव्वयकुले ।
देव-देवीगणा नारि-नर-किन्नरा,
तुम्ह जस नाह ! गायंति सादरपरा ॥ ७

नाणगुणि झाणगुणि चरणगुणि सोहिया,
सार-उवयार-संभार-संसोहिया ।
रयण-दिणि हरिसवसि सुत्त-जागरमणा,
नाह ! तुह नामु झायंति तिहुयणजणा ॥ ८

सिद्धिकर-रिद्धिकर-बुद्धिकर-संकरं,
विसयविस-अमियभर सामि सीमंधरं ।
पुव्वभव-विहिय-वरपुन्न-चय-पामियं,
राखिहिव भूरि भवभमणु गोसामियं ॥ ९

कम्म-भर-भरिउ संसार अइभग्गउ,
घणउ फिरिऊण पाय तुह लग्गउ ।
मज्झ हीणस्स-दीणस्स सिगामिया,
करवि करुणारसं सार करि सामिया ॥ १०

कठिन-हठ-घाइ तिरियत्तणे ताजिउ,
नरयगइ करुण विलवंतु न हु लाजिउ ।

मणुयगइ हीणघरि कम्मवसि पडियउ,
लागि तुह चलणि आणंदि हिव चडिवउ ॥ ११

के वि तुह दंसणे देव ! सिवसाहगा,
के वि वाणी सुणी चरणि भवमोयगा ।
भरहखित्तंमि हउं झाणि छउं लग्गउ,
देहि आलंबणं नाह ! जइ जुग्गउ ॥ १२

धन्न ते नयरि जहि सामि सीमंधरो,
विहरए भवियजण-सव्व-संसयहरो ।
कामघट-देवमणि-देवतरु फलियउ,
तीह घरि जीहरइ सामिर ! तुम्ह मिलियउ ॥ १३

करजुयल जोडि करि वयण तुह निसुणिसो,
बाल जिम हेल दे पाय तुह पणमिसो ।
महुर-सरि तुम्ह गुणगणह हउं गाइसो,
निय-नयणि रूव रोमंचिउं जोयसो ॥ १४

तुम्ह पासे ठिउ चरणु परिपालिसो,
हणिय कम्माणि केवलसिरि पामिसो ।
तुम्ह जिण ! नियय-करु सिरसि संठविसउ,
सो वि कईया वि मम होइसइ दिवसउ ॥ १५

भरहखित्तंमि सिरि कुंथु अर अंतरे,
जम्मु पुंडरगिणी विजय पुक्खलवरे ।
मुणिसुव्वय तित्थ नमि अंतरं इह जया,

रज्जसिरि परिहरवि गहिय संजमु तया ॥ १६

हणिय कम्माणि लहु लद्ध केवलसिरी,
देहि मे दंसणं नाह ! करुणा करी ।
भाविए उदयजिण सत्तमे सिवगए,
बहुय कालेण सिद्धिगमी सामिए ॥ १७

मोहभर मानभर लोभभर भरियउ
दंभभर रागभर कामभर पूरिउ ।
एहु परि भरहखित्तंमि मूं सामिय,
सार करि सार करि तारि गोसामिय ॥ १८

भोगपद-राजपद-नाणपद-संपदं,
चक्किपद-इंदपद जाव परमं पदं ।
तुज्झ भत्तीइ सव्वं पि संपज्जुए,
एह माहप्पु तुह सयलि जगि गज्जुए ॥ १९

तुहुं जि गति तुहुं जि मति तुहुं जि मम जीवनं,
तात ! तउं परमगुरु कम्ममलपावनं ।
कम्मकर विनयपह जोडि कर वीनवुं,
देहि मे अलजया दंसणं अभिनवं ॥ २०

इय भुवण-भूषण-दलीय-दूषण सव्व-लक्खण-मंडणो,
मद-मान-गंजण मोह-भंजण वाम-काम-विहंडणो ।
सुरराय-रंजण नाण-दंसण-चरण-गुण-जय-नायगो,
जिननाहु ! भवि भवि तात भव मे बोधिबीजह दायगो ॥ २१

पू.मु. श्री विजयतिलकोपाध्यायकृता

# १२२. ॥ श्रीसीमन्धरस्वामिविज्ञप्तिः ॥

(भुजङ्गप्रयात)

सलूणउ सुसोहामणउ श्रीजिणिंदो,
त्रिलोकी सदानंद संपुन्न चंदो ।
महाकेवलन्नाणकेलीविलासो,
जयउ देव सीमंधरो सामि सालो ॥ १

सवे जासु वंदंति देवह निकाया,
सुविद्याधरा किंनरा भूमिराया ।
भली जेहनी पंचसयधणुह काया,
नमउं तासु सीमंधरसामि पाया ॥ २

मुखं जेहनउं पूनि(न्नि)माचंद तोलइ,
जगज्जीव संतोष पूरंत बोलइ ।
अहो धन्न ते अमियपूरह समाणी,
सुणह जे य सीमंधरसामि वाणी ॥ ३

जगन्नाथ तू सर्वकल्याणगेहे,
घणउं सोहए विहरमाणो विदेहे ।
रहउं जइवि हुं भारहमज्झखित्ते,
विभो तह वि तुम्हे सदा मज्झ चित्ते ॥ ४

प्रभो उपरे वृक्ष रूडओ असोको,
रुलियामणउ रंजियओ जेण लोको ।
समोसरण भूमीतणइ संनिवेसि,
सवे देव वरिसावइं फूलरासि ॥ ५

जिम ब्रह्मवीणा नवनादि वाजइ,
तिम सामिनी वाणि गंभीर गाजइ ।
बिहुं धर्मनउं नाह ए राजु पालइ,
तिणि कारणि इंद्र बे चमर ढालइ ॥ ६

प्रभो पाखले तिन्नि प्राकार राजइ,
तिहां सामि सिंहासणारूढ वा(छा?) जइ ।
तुम्ह पूठि भामंडल देव दीपइ,
महा तेजनइं पुंजि ते भानु जीपइ ॥ ७

भली वाजए दुंदुभी देवकेरी,
इसउं जाणीयइ पुण्यभूपालभेरी ।
तुम्ह सीसि तिन्हइ महाछत्त सोहइ,
जगा(गि)ज्योति करि लोकना चित्त मोहइं ॥ ८

इसा केवलश्रीतणइ अंगि आणिया,
महाप्रातिहारिजु आठइ वखाणिया ।
तुम्ह देव अतिसय अनेरा घणाइं,
तिमइं एक जीभइं कहउ किम भणाइं ॥ ९

घरे पूरव लक्ख तिआसी वसेई,
इग पूरव लक्ख जो चरण लेई ।
हणी कम्म जो लद्ध केवलह रिद्धि
सु(मु) विहरंतु सीमंधरो देउ सिद्धि ॥ १०

प्रभो पासि देवांगना देव नाचइं,
सवे नागिनी नाम गायंत माचइं ।

सुविद्याधरी किंनरी वीण वायइं,
नमइं नारिनग(र) अंग रंगिहिं न मायइं ॥ ११

अम्ह कप्पतरु कामघटु देव तुठउ,
अम्ह उपरे अमियमय मेह वूठउ ।
सुचिंतामणि गहगहइ अम्ह गेहे,
महासिद्धि आठइं वसइं अम्ह देहे ॥ १२

जिनाधीस मू भवतणी भीड भागी,
जिनाधीस मू धर्मनी वृ(बु?)द्धि जागी ।
जिनाधीस मइं जनमनउं सारु पामिउं,
जिनाधीस जइ तूं भणी सीसु नामिउं ॥ १३

हियउं मू हूउं हर्षकल्लोलिताढउं,
अम्हं अंगु रोमंचिउं आजु गाढउं ।
अम्हं वाच सीमंधरसामि राचइ,
तुम्हारइ गुणग्गामनइ गानि माचइ ॥ १४

तुम्हं बापु तुं बंधवो तुंह जि माया,
तुमं सुगुरु आधारु तूं जि राया ।
तुम्ह दंसणे अलजयउ हउं अपार,
कृपा सार मूं भेट दइ सवइं वार ॥ १५

ने जाणउं करी वीनती बुद्धिहीणओ,
तुम्हं पयकमलि भमर जिम भावि लीणओ ।
तुम्ह भक्तिसेवा जि पोतइ अम्हारइ,
ति संसारना फेर निश्चइ निवारेइ ॥ १६

इमं वीनविउं भोलिमा भावि सामी,
जगन्नाथ सीमंधरो सिद्धिगामी ।
त्रिलोकी प्रभो मू त काई करेवउं,
जिम विजयवंता तुम्ह पाय सेवउं ॥ १७

## १२३. ॥ श्रीसीमन्धरस्वामिस्तवनम् ॥

केवलनाण सणाहं, विदेहवासंमि संठियं धीरं ।
सुरमणुअनमियचलणं, सीमंधरसामियं वंदे ॥ १

जय सीमंधर सामिय, भवियमहाकुमुयबोहणमयंक ! ।
समरामि तं महायस !, अहं ठिओ भारहे वासे ॥ २

सीमंधरदेव तुमं, गामागरेट्टणेसु विहरंतो ।
धम्मं कहेसि जेसिं, सहलं चिय जीवियं तेसिं ॥ ३

किं भयवं मह कम्मं, समुट्ठियं तारिसेहिं पावेहिं ।
जं न हुं जाओ जम्मो, तुह पयमूले सया कालं ॥ ४

चिंतामणि सारिच्छो, अहवा कप्पद्दुमुव्व सुहफलओ ।
अप्पुव्व कामधेणू, न हु न हु ताणंपि अहीअयरो ॥ ५

छज्जइ तुह सामित्तं, तिहूयणमज्झंमि न उण अन्नस्स ।
जम्हा एरिस रिद्धो, न हु दीसइ सेसपुरिसस्स ॥ ६

कइयाऽहं सामि ! तुमं, सिंहासणसंठियं सपरिवारं ।
धम्मं वागरमाणं, पिच्छस्सं नियनयणेहिं ॥ ७

पुज्जंतु ते मणोरह, निच्चं जे हिययसंठिया मज्झ ।
पावइ रंकोवि फलं, संपत्ते कप्परुक्खंमि ॥ ८

निच्चं झाएमि अहं, तुह पयकमेलेसु निम्मलं धीर ।
तह कुरु देव ! पसायं, जह दरिसायं ममं देसि ॥ ९

ते धन्ना कयपुन्ना, देवा देवी य माणवा सव्वे ।
जे संसयवुच्छेयं, करंति तुहपायमूलंमि ॥ १०

अहयं पुन्नविहूणो, ठाणे ठाणंमि संसयावडिओ ।
अच्छामि विसूरंतो, छउमच्छो नाणपरिहीणो ॥ ११

कुणसु पसायं गुरुयं, वुच्छत्ती संसयाण जह होइ ।
जम्हा महाणुभावा, सरणागय वच्छला हुंति ॥ १२

कम्मवसेण य अहयं, भारहवासंमि जइवि चिट्ठामि ।
तहवि तुमं मह हियए, रयणायर चंदणाएण ॥ १३

तं पहु तं मज्झ गुरु, तं देवो बंधवो तुमं चेव ।
गुरु संसारगयाणं, जीवाणं हुज्ज तं सरणं ॥ १४

संसारजलहिमज्झे, निबुड्डमाणेहिं भव्वसत्तेहिं ।
पइदिवसं समरिज्जइ, सीमंधरसामिपयकमलं ॥ १५

जइ इच्छह परमपयं, निव्विन्ना तह य जम्ममरणाणं ।
ता समरह जिणनाहं, विदेहवासंमि विहरंतं ॥ १६

जो निच्चं भव्वाणं, विदेहवासंमि सामि विहरंतो ।
सद्धम्मदेसणाए, मिच्छत्तपणासणं कुणइ ॥ १७

पच्चूसे मज्झण्हे, संझासमयंमि सव्वकालंमि ।
सीमंधरतित्थयरं, वन्देहं परमभत्तिए ॥ १८

पंच धणुस्सय माणो, चउरासी पुव्वलक्ख वरिसाऊ ।
सो सीमंधरनाहो, अणंतनाणी सया जयउ ॥ १९

मुणिसुव्वय नमि तित्थयर, अंतरे रज्जलच्छि विच्छड्डुम् ।
च्छंडिय पव्वन्नदिक्खं, सीमंधरसामियं वंदे ॥ २०

इय सीमंधरनाहो, थुओ मए भत्तिरायकलिएणं ।
सासयसुहिक्कजणओ, ज(न)यनाहो होउ भवियाणं ॥ २१

पू.आ.श्री जयशेखरसूरिविरचितम्

## १२४. ॥ श्रीविंशतिविहरमाणजिनस्तवनम् ॥

जय जणिय सुक्ख, जय कप्पह रुक्ख,
उवलद्ध मुक्ख, भवभय परुक्ख ।
वन्नेमि सुरासुर विहिय सेव, विहरंत वीस अरिहंत देव ॥ १

सीमंधर जिनवर पय नमामि, मणु रहिउं जुगंधर सामि नामि ।
सिरिबाहु मुक्क संसारदाहु, सिवसत्थवाहु एक जिसु बाहु ॥२

गुणगणहं ठाउ समरउ सुजाउ, जिणराउ सयंपहु मुद्धभाउ ।
रिसहाणणु आणण जणिय चंदे, वंदे अणंतवीरिय जिणंद ॥३

सूरप्पह कप्पह तिमिरसूर, जिणवरु विसालु हय पावपूर ।
विज्जहर गुहिर वरकाण वाणि,
चंदायणु आणइ चित्त ठाणि ॥ ४

पुरपरिह बाहु सिरिचंद बाहु, बहुगुण भयंग भुवणेग नाहु ।
वीसरइ नइसिर एक पाल, नेम्मिप्पह निम्मल गुणविसाल ॥५

ध्यायंति धीर सिरि वीरसेण, महभद्देवु हय मोहसेण ।
वंदामि देवु जसि जगहसार, अरिहंत अजियं वीरिय उदार ॥६

कप्पदुम चिंतामणि समाण, निम्महिय मोहमह सुहडमाण ।
नामीय नरिंद अमरिंद सीस,
ए जिण नमामि निसि दिस वीस ॥ ७

आईल्ल चउरजिण जंबुदीवि, तउ अट्ठय धाइयसंडि दीवि ।
तत्तो य अट्ठ पुक्खरवरद्धि, सव्वोवि देव महदितु सिद्धि ॥ ८

विहरंता संपई दंता संपई वीसई जिणवर मइं थुणीय ।
ते केवल नाणिय जगगुरु जाणिय उलग मानउ मह तणीय ॥ ९

पू.उपा.श्री मेरुनन्दनविरचितम्

## १२५. ॥ श्रीविंशतिविहरमाणजिनस्तवनम् ॥

भत्ति-सरोवरु ऊलटिउ जागिय हियइ जगीस ।
साहिब आणंदिहिं संथुणिमो विहरमाण जिण वीस ॥ १

जंबुदीवि चत्तारि जिण धायईसंडिहिं अट्ठ ।
पुक्खरद्धि तह अट्ठ इम वीस नमउं गय-कट्ठ ॥ २

सामिय करुणारसभरिय सीमंधर जिणराय ।
नियदंसणु दइ अमिय-समु पूरि मणोरह ताय ॥ ३

जाणउं ते सुकयत्थ जण जे तुह वयण सुणंति ।
धन्न ति जे तुह करि चरणु पामिय कम्म हणंति ॥ ४

पावपंक जगउद्धरण सधर जुगंधर सामि ।
भव सायर उत्तारि मम लीणउ छउं तुह नामि ॥ ५

मयणानलि संतावियउ वंछउं तु पय छांह ।
नंदणवण सम बाहुजिण दह अवलंबण बांह ॥ ६

जीव जोनि चउगइ भमिउ जिण चउरासी लक्ख।
सिरि सुबाह हिव तुह सरणि आविउ दय करि रक्ख॥ ७

गुण संकुल कमला निलय निम्मल सामि सुजाय।
करउ केलि महु हियइसरि कमलोवम तुह पाय॥ ८

सामि सयंपहु सो जयउ जसु पसाइ मयकुंभो।
मोह महाभडु भंजि करि ऊभिज्जइ जस खंभो॥ ९

गुण-काणण सिंचण सुघण रिसहाणण पय-रंगो।
किम पामिय हुं रंजवियो निय मणे स सारंगो॥ १०

जे नमंति मनि खंति धरिऽणंतवीरिय पय कंत।
भोगवंति ते भविय जण सिव सुह-रिद्धि अणंत॥ ११

पहु सुरप्पहु संघवणि नाण-किरण गण चूरि।
पुन्नपयोहर उल्लसिय पाव तिमिर गय दूरि॥ १२

ते अजरामर हुंति जिण सिरि तित्थयर विसाल।
सवणंजलि जेति तु पीयइं वाणिय अमिय-रसाल॥ १३

नाण महीधर वज्जवर पुद्धर वयरधर धीर।
रक्खि रक्खि जिण वज्जधर रयणायर गंभीर॥ १४

तिय दंसणि वण-कुमुय जिम उल्लसिय मुणिविंद।
नंद नंद आणंदमय चंदाणण जिणचंद॥ १५

निच्छइ हिव नहु संभवए भूरि भमणु संसारि।
चंदबाहु जउ भमर जिम ठिउ मण-कमल मझारि॥ १६

काम-भुयंगम बल-दलणु नाममंतु मण रंगि।
जे समारइं सिरि भुयग जिण रोग नहीं तिह अंगि॥ १७

रयणि दिवसु किम वीसरइं ईसर जिण तुह पाय ।
सासय-सुक्खहं कारणिहिं जह सेवइं सुरराय ॥ १८

कवण सु होसिइ मुज्झ दिणु नेमिप्पहु नयणेहिं ।
जिणि जोइ सु रोमंचियउ थुणिसु महुर-वयणेहिं ॥ १९

विस्ससेण जिण विसय-विस लहरिउ अम्ह सरीरो ।
निय संगम पीयूष-रसि-छंटिय करि वयधीरो ॥ २०

कलि कलमल-नासण सलिल महिमालउ गमह भद्द ।
निय सेवय महु देहि पहो सिव मंगल महभद्द ॥ २१

सुर नर तिरि संसय विसर देसण सद्दिहरंतो ।
समवसरण भूसणु जयउ देवेसरु अरुहंतो ॥ २२

तह मंदिर अंगणि रमइं सिद्धि बुद्धि जस रिद्धि ।
जे तिसंउ झायंति मणि तित्थेसरु जस रिद्धि ॥ २३

देह माणि धणु पंचसय सवि जिण कंचण-वन्न ।
चउतीसइ अइसय सहिय वसहंकिय सिरि-पुन्न ॥ २४

सुरतरु सुंदरु इय थुणिय विहरमाण जिण सार ।
वसउ मेरुनंदणिहिं जिम महु मणि सुह फलकार ॥ २५

# परिशिष्ट

## સ્તોત્રસંદેશમાલાના ૨૦ ભાગમાં આવેલા છંદોની યાદી

अचलधृति
अतिधृति
अतिशर्करी
अतिशायिनी
अतिरुचिरा
अनङ्गशेखर
अनुष्टुप्
अपरनाराचक
अपरललितक
अपरवक्र
अपराजिता
अपरान्तिका
अभिमुखी
अवितथ
अशोकपुष्पमञ्जरी
अष्टि
असम्बाधा
आख्यानकी
आपातलिका
आर्या

आर्यागीति
आलिंगनक

इन्द्रवंशा
इन्द्रवज्रा

उज्जवल
उत्कलिका
उदयम्
उद्गता
उद्धत
उपचित्रा
उपजाति
उपेन्द्रवज्रा
उर्वशी

ऋषभ
ऋषभगजविलसित

एकावली
औपच्छन्दसका-
परान्तिका

औपच्छन्दसिक

कन्या
कामक्रीडा
कामबाण
किसलयमाला
कुटज
कुटील
कुसुमलता
कुसुमविचित्रा
कुसुमितलता
कुसुमितलतावेल्लिता
केकीरव
केसर
क्रीडनक

क्षिप्तक

खिञ्जित

गाहा
गीतपद्धति
गीति
गुणमणिनीकर

चन्दनप्रकृति
चन्द्रवर्त्म
चन्द्रलेखा
चन्द्रिणी
चपलम्
चम्पकमाला
चलधृति
चलम्
चित्रमाला
चित्रलेखा
चित्राक्षरा
चूडामणि

छाया

जगती
जया

जयानन्द
जलधरमाला
जलोद्धतगति

तामरस
तोटक
त्रिभङ्गी

दण्डक
(अर्णवदण्डक
उद्दामदण्डक
गगनदण्डक
चण्डवृष्टिदण्डक
प्रयातदण्डक
महादण्डक
सुरामदण्डक)
दयाविमल
दीपक
दोधक
दोहा
द्रुतविलम्बित

द्विपदी

धृति

नगस्वरूपिणी
नन्दितक
नन्दिनी
नर्कुटक
नवमालिनी
नाराचक
नारी
निशा

पङ्क्ति
पञ्चकावली
पञ्चचामर
पत्रपतितं
पथ्या
पथ्यावक्त्र
पद्म
पद्धतिका
पादाकुलक

पुष्पदाम
पुष्पिताग्रा
पृथ्वी
प्रकृति
प्रमिताक्षरा
प्रभावती
प्रबोधिता
प्रमाणिका
प्रमुदितवदना
प्रियंवदा
प्रहरणकलिका
प्रहर्षिणी

बृहती

भद्रक
भद्रिका
भाराक्रान्ता
भासुरक
भुजगशशभृता
भुजङ्गपरिरिङ्गितक
भुजङ्गविजृम्भित
भुजङ्गप्रयात

भ्रमरविलसिता

मञ्जुभाषिणी
मणिगुणनिकर
मणिमध्य
मत्तक्रीडा
मत्तमयुर
मत्ता
मत्तेभविक्रीडित
मदनावतार
मदिरा
मधुनामा
मधुमती
मन्दाक्रान्ता
ममातिशायिनी
महास्रग्धरा
मागधिका
माणवक
मालभारिणी
मालाचित्र
मालिनी
मुखमोटनक
मेघमाला

मेघविस्फूर्जिता
मोटनक
मौक्तिकदाम
मौक्तिकमाला
मृगचपला
मृगी
मृदका
मृदङ्गक

युगलम्
युग्मविपुला

रत्नमाला
रथोद्धता
रमणा
रासकनन्दितक
रासकलुब्धक
रुक्मवती
रुचिता
रुचिरा

लक्ष्मी
ललितक

ललिता

वंशपत्रप्रतितं
वंशस्थ
वक्त्र
वनमञ्जरी
वसन्तचामर
वसन्ततिलका
वस्तु
वस्तुवदन
वाणिनी
वानवासिका
विद्युद्विलसित
विद्युन्माला
विभावरी
विभ्रमगति
वियोगनी
विषम
वेगवती
वेष्टक
वैतालीय
वैश्वदेवी
वृन्दारक

श्री
श्लोको
शङ्ख
शरभललित
शर्करी
शशिलेखा
शशिवदना
शशीकला
शार्दूलविक्रीडित
शालिनी
शिखरिणी
शुद्धविराट्
शोभा
श्येनी

संगतक
सान्द्रपदं
सिंहोद्धता
सिद्धि
सुदन्त

सुधा
सुधाकळश
सुन्दरम्
सुप्रभा
सुभद्रामालिनी
सुमति
सुमुख
सुवदना
सोपानक
सोमराजी
सौभाग्यविमल
स्रग्धरा
स्रग्विणी
स्त्री
स्वागता

हंसमाला
हंसलयं
हंसी
हक्काषट्पदी
हरिगीत
हरिणी

# स्तोत्रसंदेशमाला

१ अर्हदादिसहस्रनामसमुच्चयः
२ अनेककर्तृकृतचतुर्विंशतय
३ बहुकर्तृकृतानेकस्तोत्रसमुच्चयः
४ श्रीपञ्चजिनेश्वर–गणधराणां स्तोत्राणि
५ कल्याणक–छायापूर्तिस्तोत्राणि
६ चतुर्विंशतिजिनस्तोत्राणि
७ श्रीआदिनाथजिनस्तोत्राणि
८ श्रीनेमिनाथजिनस्तोत्राणि
९ श्रीपार्श्वनाथजिनस्तोत्राणि –१
१० श्रीपार्श्वनाथजिनस्तोत्राणि –२
११ श्रीपार्श्वनाथजिनस्तोत्राणि –३
१२ श्रीमहावीरस्वामिजिनस्तोत्राणि
१३ शेषतीर्थंकरजिनस्तोत्राणि
१४ सामान्यजिनस्तोत्राणि
१५ पञ्चपरमेष्ठिसिध्दचक्राणां स्तोत्राणि
१६ शाश्वताशाश्वततीर्थानां स्तोत्राणि
१७ सम्यग्दृष्टिदेव–देवीनां स्तोत्राणि
१८ पू.आचार्यादियोग्यमन्त्रस्तोत्राणि
१९ स्तुतयः १
२० स्तुतयः २